232

गीता माहात्म्य [illegible] पत्रं १८

1

गी० टी० श्रीगणेशाय नमः ॐ नत्वेवाहं जातु नासमित्याऽत्मानात्मविवेचनमुपक्रम्य नजायते म्रियते वेत्यादिना स
१ म्यगात्मतत्त्वं निर्धार्य वेदाविनाशिनमित्यादिना ब्रह्मविदः सर्वकर्मसंन्याससमुत्कृते स्यैवमजहातो सारभ्य स
र्गं नित्यसौ प्रोक्तीत्येतेन ग्रंथेन ब्रह्मनिष्ठां तत्फलं च मोक्षं प्रतिपाद्य नकामकामी भोति कामकामिनो मोक्षाभावः
प्रतिपादितस्तेन सर्वकर्मसंन्यासपूर्वकं ब्रह्मनिष्ठया मोक्षः संपाद्य नीय इति सर्वेषां प्रवृत्तानां प्रसक्तानां विरक्तः
प्रव्रजेद्बुद्धिमान् सरजस्तमो हेव सेत् मरणो तेनकं पाति प्रव्रजन् हि द्विजो धर्मः पदाम ने प्रसंज्ञानं वैतत् ब्रह्मसर्वेत
स्तुभ्य तेदा संन्याससमिच्छंति यतितेः स्याद्धि पर्यये प्रवृत्तिलक्षणं कर्म त्यागं संन्यासलक्षणं तस्मात्त्यागेनैव
रक्तत्यसंन्यसेदिह बुद्धिमान् पदानुविदितं तत्त्वं परं ब्रह्म सनातनं नदैकदंडं संगृह्य सोपवीतं शिखां त्य
जेत् अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं इति बोधो हृष्टो पस्यतदा भवेति भैक्ष्यभुक् मारणेनते पथा रे
हः सुखं हे स्वं न विरोति न याचेत्स्मारणपक्षो यिसकैवल्याश्रमेव सेत् अनधीत्याखिलान् वेदान् द्विजो
वाखिलान् सुरान् अनुत्पाद्य सुतान् विप्रो न संन्यसितुमर्हति अकुर्वन् विहितं कर्म निंदितं च समाचर
न् प्रसज्जनिंद्रियार्थेषु नरः पतनमृच्छति ज्ञात्वा नैष्कर्म्यमाचरेत् सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद् बुधः तेहम
पत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति परं ब्रह्मस्वपरिज्ञायप्रव्रजे
द्ब्रह्मस्यरणो तमः अन्यथा कर्म कुर्वीत न संन्यासोऽत्र कर्हिचित् स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः वि
पर्ययस्तु दोषः स्यादुभयोरेष निश्चयः इत्यादिश्रुतिस्मृतिवचनेभ्यो ह्यधिकारिणामेव संन्यासो नानधिका

एन०
५७

५

हासोवृद्धिश्चभवतिनतुसाम्येनप्रवृत्तिर्यथा तत्कर्मतत्फलवैचित्र्यासंभवात् ततोऽमीषांगुणानांप्रधानभावेनप्रवृत्ति
रितिबोधयितुमाह रजस्तमश्चाभिभूयसत्वंभवतिभारत रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा ॥१०॥ प्राणिपद
ष्टेनसुखेसाध्येसतिरजःस्तमोगुणौ तमःस्तमोगुणौचाभिभूय ह्रस्वीकृत्यसत्वंस्वयमुत्कृष्टंभवतिगुणद्वयम
गीकृत्यस्वयमंगीभूयस्वकार्यंकरोतीत्यर्थः कर्मणिसाध्येसतिसत्वंतमश्चाभिभूयैवरजोगुणउत्कृष्टोभ
वतिगुणद्वयमंगीकृत्यस्वयमंगीभूयस्वकार्यंकरोतीत्यर्थः ॥ तथाज्ञानावरणेसाध्येसतिरजःसत्वेचाभिभू

2

यतमःस्वयमुत्कृष्टंभवतिनद्वयमंगीकृत्यस्वयमंगीभूयस्वकार्यंकरोतीत्यर्थः ॥१०॥ ननुसत्वादिगुणानांह्रा
सोवृद्धिश्चकथंकेनलिंगेनज्ञायतेज्ञातेखलुतत्तत्कार्यंतत्तदुपक्रामाययतितुंशक्यतेनज्ञानमित्याकांक्षाया
माह सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायतेज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत ॥११॥ यदायस्मिन्का
लेसर्वद्वारेषुसर्वेष्वंतःकरणप्रवृत्तिद्वारेषुत्वक्चक्षुःश्रोत्रजिह्वाघ्राणेषुअस्मिन्देहेचज्ञानंज्ञानप्रसा
दलक्षणःप्रकाशःस्फुरणमुपजायतेविजृंभतेतदासत्वंसत्वगुणंविवृद्धंप्रवृद्धमुत्तमंविद्याज्जानीयात्सोऽर्हस एम
मपिविधानत्र्यंतःकरणप्रसादात्ज्ञायेनलिंगेनसत्वस्यवृद्धिंतदन्यह्रासंचजानीयादित्यर्थः ॥११॥ रजो ५
वृद्धेरेतानि [illegible] लिंगानि ॥ लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा ॥

देति अज्ञानं जडं तद् इत्यस्य त्वादेव विवेकविज्ञानावरकं तमः स्वयं प्रमादालस्यनिद्राभिः प्रयत्नेन कर्त्तव्ये कार्ये विस्मृति
प्रमादः कर्त्तव्येपि च कार्ये अनुद्यमो धैर्योत्साहाभाव आलस्यं बुद्धिजाड्याधिक्येन कर्तव्यं परित्यज्य स्वापो नि
द्रा निहन्ते रर्थः प्रमादादिभिर्देहिनमात्मानमात्मज्ञमिये तन्निबध्नाति नितरां स्व गुणानां मोहं पित्वा प्रसवि
रूपापित्वनिष्ठाविमुखं करोतीत्यर्थः बुद्धेर्नैर्मल्येन विषयस्वरूपसत्त्वाच सत्त्वाविर्भावं ज्ञात्वा विषयेषु गुणाविर्भा
व्यापार्याः सत्त्वाच रजस आविर्भावं ज्ञात्वा बुद्धिजाड्येन विपरीतप्रवृत्त्याविर्भूतप्रमादनिद्रालस्यादिभिस्तमस आ
विर्भावं च ज्ञात्वा प्रयत्नविधातिः स्वयं सत्वादिगुणविकाराणामवेक्षो भूत्वा तत्तद्विकारप्रतियोगिगुणावलं
बनेन गुणदोषानपनाभाव्य स्वदात्मा ज्ञभूत्वा वेव तिष्ठेदिति सूचितं भवति ॥८॥ ज्ञाननिष्ठापरिपंथिभूतगुणा
कार्यं निरूपणं कुर्वता भगवता उक्तमेव गुणकार्यं पुनरिहि योग्रे त्वविधत्ते सत्त्वमिति ज्ञानदार्ढ्याय पुनरप्या
ह सत्त्वं सुखे संजयति रजः कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥९॥ पुरुषं सत्त्वं सत्त्वगुणः
सुखे वैषयिके संजयति सक्तं करोति रजः कर्मणि वैदिके चान्यत्र च संजयति तमस्तु ज्ञानं स्वरूप ग
ज्ञानमावृत्य प्रमादे नियमेन कर्तव्याज्ञाननिष्ठाविस्मरणे संजयति उत आप्यर्थः आलस्यादावपि संज
यतीत्यर्थः ॥९॥ ननु वैदिकगुणके त्रयाणां गुणानामिवत्रयाणाम चित्रणानां साम्येन प्रवृत्तौ सत्यां समस्त
स्वकार्यारंभकत्वं विना कथं जो षां प्रत्येकं कार्यारंभः संभवतीत्याकांक्षायां प्रागुक्तकर्मफलानुरूपेण गुणानां

लयंगत्वा रजः प्रवृद्धे वेगेन पुनः कर्मसंगिषु कर्मयोग्येषु मनुष्येषु जायत इत्यर्थः तथा तमसि तमोगुणे प्रवृद्धे
सति प्रलीनो मृतः प्राणी तमःप्रवृद्धिवेगेन मूढयोनिषु पश्वादिषु जायत इत्यर्थः ॥१५॥ एवं गुणानां स्वरूपं पृ
थक्त्वं वृद्धिं वृद्धिकार्यं च प्रतिपाद्य सत्त्वादिगुणप्रधानानां कर्मणां फलमाह कर्मणः सुकृतस्याहुः सात्त्वि
कं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं ॥१६॥ सुकृतस्य शमदमश्रद्धादिसत्त्वगु
णसंपन्नस्येश्वरार्पणबुद्ध्या वा सम्यगनुष्ठितस्य सात्त्विकस्य कर्मणः सात्त्विकं सत्त्वोपबृंहितं निर्मलं
दुःखगुणावैषम्यकृतं तेनानिर्गतं निर्मलं बाह्यैरेवं वा सुखं फलमाहुः मुनयो वदंति रजसो राजस
स्य रजोगुणप्रधानस्य कामसंकल्पादिपूर्वकं समनुष्ठितस्य कर्मणो दुःखं गमनागमनसंपातादि दुःखम
पिष्टं स्वर्गं सुखं फलं प्राहुः तमसः तमोगुणनिष्पन्नस्याविधिनिपमश्रद्धाशून्यस्य तामसस्य कर्मणोऽज्ञा
नं मोहरूपं मोहप्रगुणारसत्त्वाज्ञानरूपं निद्रामयं सुखं फलं प्राहुरित्यर्थः ॥१६॥ सत्त्वादिगुणानां कार्यांतरमा
ह कार्यं कारणं ज्ञानं प्रसन्नात्सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोऽज्ञानमेव च
॥१७॥ सत्त्वात्सत्त्वगुणाद्विवृद्धेः ज्ञानं कार्याकार्यविवेकज्ञानं संजायते समुत्पद्यते रजसो रजोगुणाद्विवृद्धेः
लोभः परद्रव्यादिलिप्सा संजायते तमसः तमोगुणाद्विवृद्धेः प्रमादमोहौ भवतः अज्ञानं बुद्धिजाड्यमिति
कर्तव्यताऽनभिज्ञत्वं च संजायत इत्यर्थः ॥१७॥ गुणानां ज्ञानादिकार्यं सत्त्वाद्युत्तमत्वादि गुणनिष्ठानां गति
माह ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥१८॥ स
त्त्वस्थाः सोद्धृत्यपाः सत्त्वगुणोत्पन्ने सदसद्विवेकज्ञाने कार्ये च परमेश्वरे यासक्ता दोषेति ष्ठंति ते सत्त्वस्थाः ग म
पुरुषाः ऊर्ध्वं लोकं ब्रह्मविष्ण्वादिस्थानं गच्छंति राजसाः रजोगुणनिष्पन्ने ज्ञाने कामसंकल्पादिगुणवृत्ते
ज्ञाने कार्ये च श्रौतादौ कर्मणि भोगेच्छया प्रतिष्ठंति ते राजसाः पुरुषाः मध्ये ब्रह्मतिर्यग्लोकयोरंतराले ग्रामा ६

हारजस्येतानिजायंते विवृद्धे भरतर्षभ ॥ १२ ॥ लोभो विद्यमानेवस्तुन्यागासहिष्णुता प्रवृत्तिः सामान्येन सदैव द्वि
पचेष्टा लौकिकानां वैदिकानां महाकर्मणामारंभः उपक्रमः अशमः कामसंकल्पादिभिरंतःकरणस्योपश
माभावः स्पृहा विषयेषु वांछा रजसि रजोगुणे विवृद्धे सत्येतानि कार्याणि जायंते एतैर्लिंगै रजोवृद्धिमनुमाय संव
द्विजानीयादित्यर्थः ॥ १२ ॥ तमोवृद्धेर्लिंगान्याह अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जा
यंते विवृद्धे कुरुनंदन ॥ १३ ॥ अप्रकाशो बुद्धेः स्फूर्त्यभावः अप्रवृत्तिरालस्यं प्रमादः कर्तव्यानवधानता
मोहो मूढतावकारान्निद्रापारवश्यं च एतान्येव तमसि प्रवृद्धे लिंगानि एतैस्तमोवृद्धिं तदनुमाय संविज्ञा
नीयादित्यर्थः ॥ १३ ॥ गुणानुबंधानुरूपेण वृत्तानां पारलौकिकीं गतिं न तु वर्णाश्रमोचितरूपेणेति गु
णानामेव मृत्यनंतरगतिकारणत्वं बोधयति यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् तदोत्तमविदां लो
कानमलान्प्रतिपद्यते ॥ १४ ॥ तुशब्दस्तमोरजसोर्व्यवच्छेदार्थः यदा यस्मिन्काले सत्त्वे तु सत्त्वगुणे प्रवृ
द्धे सति देहभृत्प्राणी प्रलयं याति म्रियते तदोत्तमविदो हिरण्यगर्भादय उत्तमास्तान्विदंति उपा
सत इत्युत्तमविदस्तेषां प्राप्यानमलान्मलं जन्मजरादिदुःखमेव तद्रहितान्लोकान् हिरण्यगर्भा
दिलोकान्प्रतिपद्यते प्राप्नोतीत्यर्थः ननु यत्कर्म कुरुते तदभिसंपद्यत इति श्रुतेः पुण्यपापकर्मानुरूपेण
परलोकगतिः श्रूयते कथं गुणानुगुणेन गतिरुच्यते इति चेत् सत्यं प्राणिनां स्वकर्मानुरूपेणै
व शुभाशुभगतिर्न तु वर्णाश्रमोचितरूपेण नापि पापादिमात्रानुरूपेण स भवति तथाप्यमुमंतामृतिकाले
जन्मांतरीयपुण्यपापकर्मवशादेव सत्त्वादिगुणोत्कर्षः तदनुरूपेणोर्ध्वलोकप्राप्तिस्ततो न श्रु
तिविरोधो न स्मृतिविरोधश्चेति सिद्धम् ॥ १४ ॥ [illegible] माह रजसि प्रलयं गत्वा
कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १५ ॥ रजसि रजोगुणे प्रवृद्धे सति देहभृत्प्र

नुपश्यति तत्त्वकर्मनिष्ठस्तत्र गुणा एव तत्तत्कर्मकर्तारं देहेन्द्रियादिकमेवान्यं इति चक्षुरेव पश्यति श्रोत्रमेव शृणो-
ति मन एव मनुते बुद्धिरेव विजानाति वा तेषां वा इति नाहमिन्द्रियपरमात्मा न मम कर्तारमेव पश्यति गुणा गुणेषु
वर्तमानं पश्यति न त्वात्मनोऽपि यातथा ब्रह्मविस्तरं पश्यतो भिन्नतया गुणस्य मायां देहेन्द्रियादीनामेव कर्तृत्वं सत्वादिगु-
णकार्याणामविद्याकामादीनां कारयितृत्वं विज्ञानात्मन एव तत्फलभोक्तृत्वं च पश्यति न तु स्वस्य पापात्मनो देप-
था तद्भुतं यद्वै ब्रह्म विद्यते गुणात्मनां त्वविवेकविज्ञानेन स्वात्मस्येव देहेन्द्रियादेः कर्तृत्वं भोक्तृत्वं चानुपश्यति
देवगुणो गुणकार्यमोऽहंकारादिस्वपरं विलक्षणमकर्तारमभोक्तारमगतं तारमात्मबोद्धारमविका-
रमविक्रियं क्षेत्रं तद्गुणतत्कर्मसाक्षिणं द्रष्टारमात्मानं वेत्ति निष्कलं निष्क्रियं शान्तमाकाशवत्सर्वगतं पश्यति
एवं देहेन्द्रियादेरेव कर्तृत्वमात्मनश्चाकर्तृत्वं यः स्वपश्यन् पश्यति स विद्वान्मद्भावं मम निर्विशेषस्य
परस्य ब्रह्मणो भावो मद्भावः स्वरूपं तं गमति अधिगच्छति निरन्तरसमाध्या साक्षात्सम्यक् ज्ञानेन स-
र्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्ममात्रत्वमेव पश्यन् गुणा तत्कार्यलक्षणमनर्थजातमतीत्य
जीवन्नेव ब्रह्मानन्दमनुभवति मुक्तो भवतीत्यर्थः ॥१९॥ कर्तृत्वभोक्तृत्वादिधर्मकाद्देहेन्द्रियादिभ्यो भिन्नमेवा-
त्मानमविक्रियं विदित्वा ब्रह्म विशति रजस्तमांसि सत्त्वं चातिक्रम्य मुक्तो भवतीत्याह यथा तं ति-
गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥
मेवादेहेन्द्रियादिभ्यो भिन्नमात्मानं तत्कार्यैरस्पृष्टं चापश्यात देहेन्द्रियादिभ्यो भिन्नं देहं तत्कार्यैरस्पृष्टमेवा-
त्मानमकर्तारमभोक्तारं विदित्वा देही ब्रह्म विशति रतान्त्रिगुणान्प्रसादरागमोहलोभादिलिङ्गान्
पमानान्सुखज्ञानकर्मप्रवृत्तिप्रमादादिदोषान् पुरुषस्य तापस्वरूपमापादयन्ता नतत्फलं च प्रति बन्धनं
तदेव देहसमुद्भवान्देहसमुद्भवो येषां ते देहसमुद्भवा देहारम्भकाः स्वपरिणामविशेषैर्देह

णमाप्यां देवलोके मनुष्यलोके चातिष्ठंति जघन्यो निकृष्टो यस्तमो गुणस्तद्वृत्तौ तमःप्रधाने ज्ञाने सदसद्विवेक
वर्जिते कर्मणि वा ये तिष्ठंति ते जघन्यगुणवृत्तिस्थास्तामसाः पुरुषाः कृत्याकृत्यविवेकशून्या नरपशवः अधो गच्छंतीति ति
र्यग्योनि भुजायंते पुनः पुनः म्रियंत इत्यर्थः॥१८॥ त्रिभिर्गुणमयैर्भावैरिति दैवी ह्येषा गुणमयी मम माया
दुरत्ययेति कारणं गुणसंगो संसृतिं च प्रपंचं कृत्वा गुणानां मोहकत्वं दुर्जयत्वं सदसद्योनि भुजन्मभु कारणत्वं तत्रैव
विस्पष्टत्वाय पुनरपि सत्वं रजस्तम इत्यादिना गुणानामेव सुखज्ञानतृष्णासक्तिकर्मप्रवृत्तिप्रमादालस्यनि
द्रादिषु संजकत्वेन पुरुषस्याविद्यादिदोषवतो गुणतत्कार्येष्वहंममेति मिथ्याज्ञानेन तिष्ठतो देवमनुष्यतिर्य
ग्योनि भुजन्माद्यनर्थकारणत्वं प्रतिपाद्याधुना मामेव ये प्रपद्यंते मायामेतां तरंति ते इत्युक्तरीत्या गुणात्ययाचा
र्यप्रसादेन मदनुग्रहेण च सम्यग्विविक्तविज्ञातात्मस्वरूपो बुद्धविदितगुणसंगकृतानर्थविज्ञाया
नात्मवासनायाः स्वरूपमवष्टभ्य प्रसमग्रदृष्टिमनुसंधानः सन् सर्वास्ववस्थासु सर्वदा गुणानामेव कर्तृ
त्वं कारयितृत्वं भोक्तृत्वं च स्वस्यासंगत्वं गुणतत्कार्यतदवस्थासाक्षित्वं च पश्यन् सदात्मनिष्ठया सकार्यान्
त्रीन् गुणानतीत्य मुक्तो भवतीति प्रतिपादयति द्वाभ्यां नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च परं
वेत्ति मद्भावं सोऽधिगच्छति॥१९॥ चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा प्राणस्य द्र
ष्टा तमसो द्रष्टा सर्वस्य द्रष्टेति साक्षी चेता केवलो निर्गुणश्चेति श्रुतिप्रमाणो स्वमनाः श्रुभ्नरत्वादिश्रुतिभि
श्चात्मा देहेंद्रियमनोबुद्ध्यादिभ्यो भिन्नः द्रष्टृत्वात् घटद्रष्टृवदित्यादियुक्तिभिश्च देहेंद्रियादिभ्यो भि
न्नत्वेन स्वात्मनो यः सम्यग्विज्ञातात्मस्वरूपः स्वस्याविक्रियत्वं द्रष्टृत्वं च पश्यति यदा यस्मिन्काले समाधिनाऽज्ञान
परिपाकदशायां गुणेभ्यो गुणकार्येभ्यः तद्देहेंद्रियादिभ्यः स्वस्मादन्यमतिरिक्तं कर्तारं नानुपश्यति कापि कवाचि
कमानसिकानां विहितानां प्रतिषिद्धानां सामान्यानां च सर्वेषामपि कर्मणां कर्तारं देहेंद्रियातिरिक्तं ना

णः समाधेरंतरायस्तं प्रकाशं च प्रवृत्तिं च प्रवृत्तिः रजःकार्यं रागमूलकं मनस इंद्रियाणां च बहिः प्रावण्यं विक्षेपलक्षणाः
समाधेरंतरायस्ताम् इंद्रियाणां विषयप्रवृत्तिं च मोहमेव च पाण्डव इत्यर्थः मोहस्तमोविकारः निद्रालस्यप्रमादासंज्ञकः लयः
कषायः इत्येवंलक्षणः समाधेरंतरायस्तं मोहमपि चकारादेतानि सत्वरजस्तमःकार्याणि संप्रवृत्तानि सम्यक् प्रसक्ता
नि न द्वेष्टि प्राप्तेषु प्रकाशादिषु प्रतिकूलत्वबुध्या द्वेषबुद्धिं न करोति विद्याभासविषयत्वात्तेषां स्वस्य संबंधाभा
वान्न किंचिद्विक्षेपं प्राप्नोति यथा साधको निदिध्यासुः रसास्वादविक्षेपलयकषायरूपाणि प्रकाशादीनि समा
धेर्विघ्नभूतानि सत्वादिगुणकार्याणि संप्रवृत्तानि द्वेष्टि न तथैते समाधिविघ्नाः प्राप्ता इति विक्षिप्यति निवृत्तानि कांक्ष
ति च तेषां निवृत्तौ हृष्यन् निद्रादिप्रतिक्रियां च करोतीत्यर्थः न तथा गुणातीतः स सिद्धः प्रकाशादीनि संप्रवृत्तानि
न द्वेष्टि न निवृत्तानि कांक्षति च तेषां विक्षिप्तलक्षितत्वेन ब्रह्मदृष्ट्या वंतमत्तत्वान्निवृत्तिमपि नापेक्षत इत्यर्थः स
सध्यासतोप्यनात्मतादात्म्यरागद्वेषादयः संभवेयुः नित्यनिरंतरनिर्विकल्पकसमाध्यग्निनिर्दग्धाहंममा
ध्यासबंधत्वाद्विदुषो रागद्वेषाद्यनात्मगुणाविर्भावाभावो युक्त इति भावः एतेन विक्षेपकेषु गुणकार्येषु प्राप्तेष्व
पि द्वेषाद्यभावो गुणातीतस्य लिंगमांतरं स्वप्रत्यक्षमिति सूचितं भवति ॥ २२ ॥ ननु गुणातीतो विद्वान् सत्वादिगुणका
र्येषु संप्रवृत्तेषु सत्सु यदि द्वेषं च न करोति निवृत्तिं च न कांक्षति तर्हि स वर्तमानेपि तत्र दुराग्रहमनुरूपेण किं यथे
ष्टं वर्त्तत इत्याशंक्याह न तस्य प्रवृत्तिर्हेतोरविद्यायाः वासनाख्यायाः स्वकार्याणां निर्विकल्पकसमाध्यग्निनिर्दग्धत्वाद्वै
दिके लौकिके चाप्यत्रापि प्रवृत्तिर्न संभवति किंतु स्वानंदानुभूत्या स्वस्मिन्निश्चल एव तिष्ठतीति न किंचिद्विक्षिपत इ
त्याह उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्त्तत इत्येव योवतिष्ठति नेंगते ॥ २३ ॥ वादि
प्रतिवादिनोर्मध्ये यः कस्यापि पक्षमनवलंबमानस्तद्वदुपमपापारदृष्टा तटस्थः पुरुषः उदासीन इत्युच्यते तद्वद्वि
षयेषु प्रवर्त्तकानां प्रकाशादयादीनां पसलस्विनयरागद्वेषलोभमोहादीनां सत्वादिगुणानां तथा प्रवर्त्तनां दे

पासत्यशौचविनयदानशीलत्वादिभिः सात्विकैः रागद्वेषलोभासूयादिभिः राजसैर्मोहाभिनिवेशाहंकारमम
कारादिभिस्तामसैश्च विकारैः पुण्यपापाभ्यां च सत्वादिगुणा एव देहोत्पत्तिहेतवो भवंति तानेतानुक्तलक्षणा
न्त्रीन्सत्वादिगुणान्गुणधर्मीभूतविद्याकार्यादीनतीत्य प्रसन्नात्मा सर्वमिदमहं च ब्रह्मैवेति सर्वत्र ब्रह्म
मात्रदर्शी नान्यं गुणान्गुणकार्यं मन्तानहं ममेदमित्यादिविपरिणामप्रपञ्चं सर्वान्नि देहसत्तामात्रालं
कोऽमृतत्वाजन्ममृत्युजरादुःखैर्देहसंबंधसंभावितैर्विमुक्तः जन्मादिदुःखैरस्पृष्टः सन्नमृतं विदेहकैव
ल्यमश्नुते निष्ठाखंडानंदैकरसाद्वितीयब्रह्मात्मनावतिष्ठतीत्यर्थः ॥२०॥ देहव्यतिरिक्तात्मवेत्तापतिर्जीवन्ने
वत्रीन्गुणानतीत्य मुक्तो भवतीति श्रुत्वाऽतिविस्मितः सन्गुणातीतस्य लक्षणमाचारं च गुणातिक्रमणोपायं
च पृच्छन्नर्जुन उवाच कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो किमाचारः कथं चैतांस्त्रीन्गुणानति
वर्तते ॥२१॥ प्रकृष्टभास्वररूपत्वात्प्रभुस्त्विह नस्तस्य संबुद्धिः हे प्रभो एतानुक्तलक्षणानेत्रीन्गुणा
न्गुणानतीतः समतिक्रम्य ब्रह्मात्मनास्थितो ब्रह्मविद्यतिः कैर्लिंगैर्लक्षणैस्तैस्तो भवति गुणातीतस्य सि
द्धस्य कानि लक्षणानि यैरयं गुणानतीत इति ज्ञातुं शक्यत इत्यर्थः गुणातीतस्य किमाचारः को हि विधाचा
रः किं यथेष्टं वैदिकमाचारति किं लौकिकमाचरतीति वा उत यथेष्टमाचरतीत्यर्थः एतान्स्वस्वविकारैः सानुरू
पमान्त्रीन्सत्वादिगुणान्गुणाद्वः साधनस्य दुर्लभत्वद्योतनार्थः कथं तु केन प्रकारेणातिवर्त्तते केनोपाये
नायं गुणत्रयातिक्रमणं कृतवानेतत्प्रश्नत्रयं सम्यग्वक्तुमर्हसीत्यर्थः ॥२१॥ त्वत्प्रथमप्रश्नस्योत्तरं वक्तुं श्रीभगवा
नुवाच प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥२२॥ गुणानां गुणा
कार्याणां च स्वरूपमविषयीभूतं दृश्यप्रपंचं विद्धि यो मम मतिं [illegible] तदात्मना पश्यति इति स गुणाती
तो ब्रह्मविद्यतिः प्रकाशं च प्रकाशः सत्वविकारः विषयेषु खत्तानयोरानजकं [illegible] तेंद्रियप्रसादः रसादलक्ष

भ८

कार्यहमित्यध्याससंबंधरहितइत्यर्थः॥ ततएव स्वस्थः सर्वावस्थासु सर्वदा स्वस्मिन्नेव परे ब्रह्मणि आत्मनाऽतिष्ठतीति ब्र
ह्मविदेकएव स्वस्थइत्युच्यते ततएव जन्मादिदुःखैराध्यात्मिकादिदुःखैश्चानभिभूयते तत्समत्वं स्वस्थ एव भ
वतीति हि युक्त्वा स्वस्थस्ततएव जन्मादिदुःखैरनात्मधर्मैरध्यात्मिकाधिभौतिकादिभिरनभिभूयते सति विक्षेपे ब्रह्मात्मनास्थि
तत्वात्तेरप्रच्युतत्वमेव स्वस्थत्वं न तु देहेन्द्रियाणां सहितत्वं ततएव तुल्यप्रियाप्रियः प्रियमिष्टमप्रियमनिष्टं तुल्ये प्रियाप्रिये
यस्य स तुल्यप्रियाप्रियः उभयत्र सम इत्यर्थः ननु प्रियाप्रिययोः सुखदुःखयोश्च विदुषः समत्वं न संभवति अत्यंतम
धुरमतिकटु च द्रव्यं भुंजतश्च ज्ञातयाऽनातपयोस्ति ष्टतश्च विदुषो पीष्टानिष्टत्वोपलब्धेर्दुर्वारत्वात्तदनुभूतावि
षमबुद्धिः स्यादेवेति चेत्सत्यं सुखदुःखयोः प्रियाप्रिययोः प्राप्तयोः सतोर्विदुषोपि विषमबुद्धिः स्यादेव यावत्प्रभे
दात्प्रहणाभेदोपपत्तेः तथापि ब्रह्मनिष्ठस्य विषमबुद्धिर्न संभवति कारणाभावाद्धि विषमबुद्धेः खलु कारणं बुद्धे
र्विषमपदार्थसंयोगः सत्येव तस्मिन्निष्टानिष्टत्ववृत्त्या न संपद्यते सत्येवेष्टानिष्टत्ववृत्त्या नैव विषमबुद्धिः स्यान्नाऽस
ति न हि चिरकालनित्यनिरंतरसमाध्यभ्यासबलेन ब्रह्माकारतामापद्य बुद्धिवृत्तेः सर्वदा ब्रह्मरूपेवनिश्चलत
या संस्थितायां बुद्धेर्विषयैर्विषमैः संयोगः संभवति तदसंभवे त्विष्टानिष्टत्ववृत्त्यानं संभावयितुं न शक्यते तदभा
वे विदुषो ब्रह्मनिष्ठस्य विषमबुद्धिश्च न संभवति ततः सुखदुःखयोः प्रियाप्रिययोश्च विदुषः समत्वं न विरु
द्धं ननु बलवति विक्षेपकारणे प्रसक्तेपि उद्बुद्धैर्ब्रह्मात्मनोऽवस्थितिः कथमुपपद्यत इति चेदभ्यासातिशय
एव तत्र कारणमिति ब्रूमः नत्वौषधं नापि मंत्रो न बलं प्रयोगश्च अनभ्यासवशाद्देवसतामपि बहिर्मुखत्वं
न त्वविवेकतः अभ्यासेन तु कौंतेयेत्युक्तत्वाच्छ्रद्धाभक्तिपूर्वकसमाध्यभ्यासेन वा त्वानालंबिनी ब्रह्मनिष्ठा
सिध्यति सर्वत्राप्यभ्यास एव बलवत्कारणं अभ्यासात्कवित्तानं कैवल्यं लभते नर इति स्मृतेः यदुक्तं तुल्यप्रिया
प्रिय इति प्रिययोः समत्वं तद्विस्पष्टयति समलोष्टाश्मकांचनः इति समानि प्रीत्यप्रीत्योरविषयाणि लोष्टाश्मकांचनानि य

६ व रामा०

प्रिया२

देहेंद्रियादीनां तथा पराणां च दृष्टा स्वयमुदासीनवत्तेषां तथा पराणां च साक्षित्वेनासीनो दूरे वर्त्तमानः यो विद्वान् गुणैः
प्रकाशादिभिः सात्विकैः रागादिभिः राजसैः मोहादिभिस्तामसैश्च न विचाल्यते स्वनिष्ठायाः न प्रच्याव्यते यथा वा
स्वैरासनावष्टब्धस्थाणुवत् [illegible] त्वेष्वात्मेष्यपि तु न शक्यत इत्यर्थः ननु यद्येवं तर्हि अयं विद्वान् देहयात्रापि क
थं प्रवर्तत इत्याकांक्षायामाह गुणा इति चिरकालं नित्यं निरंतरं निर्विकल्पसमाधिनिष्ठया स्थिरीभूतप्रज्ञो यः
संसिद्धो ब्रह्मविद्वृत्तिः स गुणा देहेंद्रियादय एव फलानुभावककर्मणा यथाकालं प्रेर्यमाणाः संतो गुणे
षु विषयेषु प्रवर्त्तंते भोजनादिक्रियां कुर्वंति तेषां तथा पराणां च साक्षी प्रत्यग्रूपोऽहं तु न प्रवर्त्ते सदा निष्क्रिय एवा
स्मि इत्येवं तिष्ठते ब्रह्माकारवृत्त्या ब्रह्मरूपेणैव सदा [illegible] न करोति न तु स्वयं गुणेभ्यो गुणाकार्यैर्भेदबुद्धिं कि
चिदपि नातेनच त्वेति कर्त्ताहं भोक्ताहं ममेदं भोग्यमिति कर्तृत्वभोक्तृत्वाध्यासं न करोतीत्यर्थः अवतिष्ठतीति
परस्मैपदं छांदसं एवं लक्षणो यो बुधाविचिंत्य मः स गुणातीत इत्युच्यत इत्युत्तरेणान्वयः एतेन गुणप्रेरणायां देहें
द्रियादीनां विषयेषु प्रवृत्तौ सत्यामपि द्रष्टा सीमसविकारित्वं च विदुषो गुणातीतत्वलिंगमिति सूचितं किमाचार इति प्र
श्नस्योत्तरं च दत्तं भवति ॥ २३॥ ननु देहेंद्रियादेः स्वस्थत्वदशायामयं गुणैः स्वनिष्ठातो न विचाल्यते दुःखशा
लके चालिमौति केचन निंदादिपवनैर्वसंप्राप्ते गुणैर्निष्ठायाः प्रचालितः स्वदमोहादिकं भजत्येवेत्याशंकायां न वात्स्व
सुखदुःखादीनां निंदास्तुत्यादीनां च विषयोऽनात्मैव न त्वहमात्मा निर्विशेषो निराकारश्चिद्रूपैकरस इति
धीनिश्चयेन नात्मसुखदुःखाद्यवस्थापि स्वात्मनि भवतीति। न च नात्म [illegible] हं ममेति बुद्ध्यै तं [illegible] वल्करो
तीत्याह द्वाभ्यां समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ २४॥
पत्रशीमनाति हृष्टानिष्टानि [illegible] सुखदुःखे विषमसमं दुःखसु
खः समचित्तः सुखदुःखे स्वस्थः समत्वनात्मवित्स्पष्टत्वात् निश्चलभावनावैधृत्यमेव तदेव समचित्तत्वं परइवतद्द्रष्टा

टी॰ २ ३

प्रख्यापनं तमपां करोतीत्यर्थः॥६॥ एवं निर्मलत्वं प्रकाशकत्वमनामयत्वं च सत्त्वस्य स्वरूपं सुखसंयोजनं ज्ञा
४ नसंयोजनं च तत्कार्यं माया निरूप्य रजसः स्वरूपं कार्यं चाह रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्ना
ति कौन्तेय कर्मसंगेन देहिनं॥७॥ यस्य त्वं रजइस्य प्रकृतिं तद्रजो गुणो रागात्मकं स्रगादिविषयेष्वनुरागात्मकं प्रमाणे
नेनेति रागो रतिः सैवात्मा स्वरूपं यस्य तद्रागात्मकं रागस्वरूपकं लौकिकवेद्यं च तत्साः संगसमुद्भवं च अप्रा
प्तेषु अर्थेषु अभिलाषात्मिका प्राप्तेषु ग्रहणेच्छा संगस्तयोः समुद्भवः उत्पत्तिर्यस्मात्तत्तृष्णासंगसमुद्भवं देशकालाभ्यां
व्यवहिताः अवहितार्थस्पृहाजनकं च रजो विद्धि जानीहि इत्यर्थः एवं लक्षणो रजोगुणो देहि
7 नमात्मानमात्मवियुक्तमेनं कर्मसंगेन कर्मासक्त्या हि कामधीकार्यं कर्मप्रयोजनानि लौकिकानि वैदिकानि
च तेषु संगः सेजननं तत्परत्वं तेनैव ध्नाति सुखरूपाविर्भूतेः प्रवृत्तार्यं प्रवृत्तविदमपि कर्मठं करोतीत्यर्थः॥७॥ त
मसोपि स्वरूपं कार्यं च प्रातिपादयति तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्नि
बध्नाति भारत॥८॥ रजःसत्त्वाभ्यां दोषाधिक्येन बंधकत्वेन विशिष्टत्वात्तमसस्तु स्वरूपत्वबोधनार्थस्तु
शब्दः तमस्त्वज्ञानजं यदज्ञानं सत्तोंतःकरणेन तदज्ञानं तज्ज्ञानाभावः अभावस्य कार्यकारित्वासंभवा
त्तस्मादज्ञानमज्ञानजं प्रधानयोः प्रकृतिसंभवा इति त्रयाणां गुणानां प्रकृतिजत्वस्योक्तत्वात्तमस्त्व
ज्ञानस्वभावावृत्ति वा आद्ज्ञानजत्वविशेषेण विशिष्टं तत्त्वं सर्वदेहिनां सर्वेषां ब्रह्मादिस्तंबान्तानां प्रा
णिनां स्वीयस्वरूपानामविशेषेण मोहनं मोहयति स्वाविर्भूतत्वाविद्यमानमेव सदसद्विवेकज्ञानं निरोभावय एम
तीति मोहनं तमस्त्वज्ञानजं मोहकं स्वरूपं ज्ञानावरकं च विद्धीत्यर्थः तमसः संबंधस्वरूपं बोधनकार्यमाह प्रमा ४

दोषेण तं तत्त्वपतेः संभ्रम सज्ञान संकोचो विक्षेपश्च जन्मादिबंधश्च भवति तस्माद्देहेंद्रियादिष्वनात्मस्वहंममा।
ध्यासराहित्यमेव विदुषो जीवन्मुक्तिः तत्राहंममाध्यास एव बंधः सत्त्वादिगुणदोषेणानेकत्वाविद्यानापि व ध्वतेस्व
सत्त्वगुणात्स्वतं दपा दोषेण दूषितो नैगुणः सत्त्वनाम्नम्यात्स्वभावं कृत्वा विद्यानपि भ्रमनेः कुरुते च योऽप्यत्वममताध्यासं कृ
त्वानेहपाशेन बद्धो जन्मादिबंधं प्राप्नोति न समत्वा दिगुणा न ताप्यैकोपि न चित्तेनैव दिड्यामि देहकैवल्यार्थिना
सदात्मनिष्ठ पेव स्यात् तत्समि निबोधाद्गुणमेव बद्धं दृशाध्यासाय प्रांस्मः ॥५॥ तामात्मनैवं गुणतासम हिंकार्यं दर्शयन्
प्रत्येकं गुणानां स्वरूपं कार्यं बंधफलं बध्नाति पादपतित्रयोदशाभिः तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् सुखसं
गेन बध्नाति ज्ञानसंगेन चानघ ॥६॥ तत्र तेषु त्रिषु गुणेषु सत्त्वं सत्त्वगुणो निर्मलत्वान्मलाभ्यां रजस्तमोभ्यां निर्गत
त्वेनातिस्वच्छत्वात्प्रकाशकं स्वस्य वस्तुस्वरूपावभासकं अनामयं च सत्त्वस्याम योनामयावि सेषेजाड्यं च तत्का
रणयोरजस्तमसोरभावात् अनामयं विस्मितमजडं चैवंलक्षणमपि सत्त्वं त्वोय स्वंभ्र सविदमपि सुखसं
गेन ज्ञानादीष्वविषयेंद्रियसंपर्कजन्यं पतस्सुखं तत्र संगः सक्ति तेन बध्नाति विषयसुखलंपटं करोतीत्यर्थः रजो राग
मदधाऽहिंसा स्यात्सादिसा ध्यानसंचय मात्रमविद्धि सुखसंगेन पड्यालिसाभ्यंभ्रा स्वं वै स्मवश्रो वे वापार ज्ञो कि वसुख
तत्संगेन तत्कर्मेण बध्नाति ब्रह्मसज्ञानन तत्त्वखानुभूति स्पांच्यावापि त्वावां हर्षं खं करोतीत्यर्थः किंच ज्ञानसंगेन
ज्ञानं नानाशास्त्रविचारजन्यं तत्र संगः प्रज्ञा तेऽनेनेति संगः कामस्तेन बध्नाति तर्कमीमांसासांख्ययोगागम
तंत्राणामर्थज्ञानाभ्यासं बहुविदं करोतीत्यर्थः पद्धात्ज्ञापनेपरमेश्वरेऽनेनेति ज्ञानमीश्वरमहत्त्वप्रतिपादकं शास्त्रं
तत्र रोगात्तन्मतियाघमानयां तेनैव बध्नाति ब्रह्मनि खायाः

१०

नसाध्यं च सर्व बुध्या परित्यक्तुं शीलमस्यास्तीति सर्वारंभपरित्यागी न हि ब्रह्मभावापन्नस्याप्तकामस्याप्तो निपसा कामहृ
तस्य ब्रह्मविदः कर्मणा साध्यमस्ति यस्मिन् सति कर्मणः कर्त्तव्यता स्यात्तदभावात्सर्वारंभपरित्यागी युक्त एव ननु कर्म
साध्याभावेऽपि अस्ति साध्यं श्रुत्या सार्वभौमादिब्रह्मांतानां आनंदविशेषाः शतोत्तरगुणिताः सत्येव विदुषोऽप्याशास्य इति चेन्न
निरतिशयानपायिब्रह्मानंदरसानुभूतेर्विदुषस्तदाशासंभवात्तेषां क्षयिष्णुत्वेनानित्यत्वादल्पत्वाद् सत्ता
त्त्वविदुषः आशास्यत्वानुपपत्तेः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः तेषामपि ब्रह्मानंदांतर्भूतत्वा
त् ब्रह्मानंदावाप्त्या आशाते(षां) स्वाशान्यायेन तदवाप्तेश्च संभवात् ब्रह्मविदो महात्मनः सर्वात्मभावापन्नस्य न प्राप्तव्य
शेषोऽस्ति न हि सार्वात्म्यसिद्धिः प्राप्तव्यशेषस्यैकस्य संभवति तस्मात् ब्रह्मविदः सर्वकर्मसंन्यासो युक्त एवेति सिद्धं
एतेन किमाचार इत्यस्य प्रश्नस्य उत्तरीकृतम् सर्वत्रौदासीन्यं विना न किंचिदस्याचार इत्युत्तरं दत्तं निष्कर्मत्वं विदु
षो जीवन्मुक्तस्येव प्रत्यक्षं लिंगमिति सूचितं भवति गुणातीतः समदुःखसुखादिलक्षणो लक्षितो यः स एव गुणा
तीतः गुणा देहेंद्रियादिषु प्रतिबिंबप्रतिष्ठापापरदेहिष्विवात्मभावमुत्सृज्य गुणकार्यविलक्षणतद्धर्मकर्माविस्पृ
ष्टस्वस्वरूपे परब्रह्मणि नित्यतादात्म्येन स्थितत्वात् प्रकाशं च प्रवृत्तिं च मोहं च योऽतिक्रामति स गुणातीत इत्युच्यते गुणानां
गुणकार्याणां मयि विषयरतिकृत्वा जीवन्मुक्तो ब्रह्मविद्यतिस्तल्लक्षणोऽपरपर्यायगुणातीत इति निगमितस्यार्थः ॥२५॥
कथं चैतान् त्रीन् गुणान् अतिवर्त्तत इति द्वितीयप्रश्नस्योत्तरमाह मां च योऽव्यभिचारेण भक्तियोगेन सेवते स
गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६॥ चशब्दस्यार्थः यस्तु ब्रह्मविद्यतिस्तु मोक्षेच्छुः पादास नात्कं तं वा यः सर्वं
परित्यज्यात्मतत्त्वैराग्ये शांतबुद्धित्वादिसाधनसंपत्यायुक्तो भूत्वा मां प्रत्यगभिन्नं निर्विशेषं निरामासं निरंजनं रमणं
द्वितीयं करसं यदि परं ब्रह्म भक्तियोगेन श्रवणाकारेण श्रवणमननादिस्वविषयानुकूलैर्विनाःपरिणामो भक्तिरेवं
ज्ञाकारवृत्तिः तदुक्तं मत्कथाश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गांगांभसोऽम्बुधौ अहैतु

स्वस्थः समलोष्टाश्मकांचनः पद्ध्यासमानि मृत्पादृष्ट्या समभावं गमितानि ब्रह्मात्मना दृष्टानि लोष्टाश्मकांचनानि येन सम
मलोष्टाश्मकांचनः सर्वत्र ब्रह्मबुद्धिरित्यर्थः विदुषः सुखदुःखप्रियाप्रियादिषु सर्वत्र समदर्शने सिद्धौ हेतुमाह
धीर इति आभासवासनया बहिर्मुखापमानांधियं राति तिनि त्यक्त्वा निस्वाकारे गौवस्थापयतीति धीरः स्वनिष्ठोऽव
स्थितबुद्धिर्व्यक्तिरित्यर्थः तत एव तुल्यनिंदात्मसंस्तुतिः [illegible] गोचरे निंदा द्वेषणामात्मनो देहादेर्गुणा
णां कीर्तनं स्तुतिरात्मसंस्तुतिः तुल्ये अनात्मगोचरे निंदात्मसंस्तुती यस्य स तुल्यनिंदात्मसंस्तुतिः अनात्मैकगो
चरयोर्निंदास्तुत्योरविषयीभूतस्वरूप इत्यर्थः सुखदुःखप्रियाप्रियादिषु समत्वं विदुषो जीवन्मुक्तत्वे पर
प्रत्यक्षं लिंगमिति सूचितं भवति ॥२४॥ गुणातीतोपमिति विदुषो गुणातीतत्वविज्ञानायलिंगोत्तरं किमाचार
इति प्रश्नस्योत्तरं वदन् जीवन्मुक्तलक्षणमुपसंहरति मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभ
परित्यागी गुणातीतः स उच्यते ॥२५॥ मानः उपचारैर्बहुकरणं अपचारैर्लघुकरणं अवमानस्तयोरुभयोस्तुल्यः
स्वप्रारब्धवशात्तयोर्विषयभूते देहे आत्मत्वभावनाऽभावाद्धर्मयत्राप्यविक्रिय इत्यर्थः पूजावमानयोर्हर्षविका
सवैवर्ण्यादिविकाररहितत्वेन समचित्तत्वं जीवन्मुक्तस्य लिंगं यद्यपि सर्वं ब्रह्मैव पश्यतो ब्रह्मविदः प्रियाप्रिय
मित्रामित्रादिभेददृष्टिर्न संभवति तथापि यदि दृष्टिमिव मन्यते तत्प्रियमिति परे निष्प्रमिवोदास्यते न तु प्रियमिति
यस्तु ब्रह्मविद्वेषी दृष्टोऽनुमोदते स मित्रपक्षः यस्तु नानुमोदते सोऽरिपक्षः इति लोकदृष्ट्या संभवति तयोर्मित्रा
श्री रिपक्षयोः स्वबुद्धिदोषगौणे मित्रभावं गयोरुभयोस्तुल्यः समदर्शी सर्वत्र समदर्शनमेव जीवन्मुक्तस्य पर
प्रत्यक्षं लिंगं किंच सर्वारंभपरित्यागी मम प्रारब्धमनोभवितव्यमिति फलकामनया आरभ्यंत इति आरंभाः कर्माणि दृ
ष्टादृष्टफलविषयकाणि श्रौतानि स्मार्तानि उपासनालक्षणानि च यानि कान्याश्रमोचितानि च शारीरव्यतिरिक्तानि
लौकिकान्यपि च कर्माणि सर्वारंभा इति सर्वपदेन गृह्यंते ब्रह्मभावापन्नतया वाप्तसकलकामत्वात्तान् सर्वारंभा

१७ ध्यतेनात्रप्रत्यगात्मविरोधोदृश्यतेतद्वदत्रापिकिंचसर्वाणिरूपाणिविचित्यधीरः नामानिकृत्वाभिवदन्यदास्तइत्यनेनजीवे
नात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिचश्रुतिः ब्रह्मणएवनामरूपव्याकरणोपाधौतात्रूपेणावस्थितत्वं
प्रतिपाद्यमतोज्ञातुर्विशुद्धउपाध्युपरमेब्रह्मभावउपपद्यतेघटोपाध्यभावेघटाकाशस्यमहाकाशत्ववद्यथातद्व
त्ज्ञोतोस्तिविज्ञाताऽविज्ञातंविज्ञातइतिविज्ञातृब्रह्मणोऽभेदश्रवणाच्चब्रह्मणः प्रतिष्ठात्वाच्चप्रत्यगात्मनिविदुषो
ब्रह्मभावउपपद्यतइतिबोधयितुमाहब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यचशाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्य
च॥२७॥ अमृतस्यएतदमृतमभयमेतद्ब्रह्मेतिश्रवणाद्मृतस्यामरणधर्मस्याऽविनाशिनःजन्मरहितस्यैवाविना
शित्वंप्रुक्तंततोऽमृतस्यैत्यनेनाद्यंतविकाराभावः सूचितः अव्ययस्यअपरहितस्यअविकारिणःइत्यनेनवृद्धिविपरि
णामाभावः सूचितः शाश्वतस्यनित्यस्येत्यनेनआगंतुकास्तित्वापक्षयाभावः सूचितः तद्रूपं सम्यक्प्राप्यर्थः धर्मस्याऽ
विद्याजन्ममरणादिदुःखप्रवाहेपात्यमानः पुरुषोध्रियतेनेनेतिधर्मोज्ञानंतस्यधर्मस्यधर्मीवानास्येत्यर्थः सु
खस्यानंदरूपस्यएकांतिकस्यांपतेरुदमेवमेवेतिनिश्चीयतेऽनेनेत्यतएकोऽसावंतश्चेत्येकांतएकप्रत्ययस्तेनाव्या
प्तइत्येकांतिकंतस्यैकांतिकस्यसर्वत्राव्यभिचारितसत्ताकस्यपरिपूर्णस्यब्रह्मणोनिर्विशेषस्यहियस्मादहमहमर्थःप्रत्य
ति(गात्मासर्वदृश्यज्ञाताप्रतिष्ठाप्रतिष्ठत्यनेनज्ञातस्वरूपेणनामरूपव्याकरणायप्रवर्ततइतिप्रतिष्ठातदेवानुप्राविशदि
तिश्रुतेः प्रत्यगात्मस्वरूपेणोपाधौस्थित्वापरंब्रह्मैवबुद्ध्यादिसर्वदृश्यजातंजानातिप्रकाशयतिचतेनात्मनोब्रह्म
त्वंनव्यभिचरतियथाज्ञीपरूपेणार्थप्रकाशयतोऽग्नेर्द्दीपरूपस्याग्नित्वंनव्यभिचरतितद्वत्ततोज्ञातुरात्मनउपाध्यभा
वेब्रह्मत्वंयुक्तंज्ञातैवात्माविद्वानतस्मात्ज्ञाताविद्वान्ब्रह्मैवभवतीत्यर्थः यद्वातिरूपेणब्रह्मणःसनिर्विशेषस्यपर रामा०
स्यब्रह्मणोहमात्माप्रतिष्ठास्वभावस्थितिहेतुत्वात्प्रत्यगात्मनाखलुपरंब्रह्मस्वभावस्थितिंप्राप्नोतिब्रह्मणासत्यचिदानंद १४
रूपत्वपरिपूर्णत्वाद्धितीयत्वादिकंबुद्ध्युपाधिकेनप्रत्यगात्मनैवहिचेतनेनतिष्ठतिनतुस्वातोनिर्विशेषत्वान्नतोहमर्थो

ध्यव्यवहितायाभक्तिः पुरुषोत्तमे लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं इत्युक्तलक्षणाया भक्तेः सैव योगः कै
वल्यसिद्धौ परमोपायस्तेनाव्यभिचारेणाप्रत्ययांतरेणाव्यवच्छेदोऽभिचारः क्वचिदपि तद्व्यवहितेन नित्यनिरंतरस
माधिना सेवते विषयग्रहणाविमुखतानिर्मलतानिश्चलतया चिदाकारापन्नया तैलधारावदविच्छिन्नया व्यासमु
त्थानासमुत्थानयोर्बहिरंतश्च परिपूर्णं सर्वोपाधिविनिर्मुक्तं निष्कलं निष्क्रियं शांतमनंतं गगनोपममानंदघनं
मो परं ब्रह्म सर्वमिदमहं च ब्रह्मैवेति स्वं च विश्वं च मदाकारमेव पश्यन् यो वेत्ति सर्वदानुसंधत्त इत्यर्थः॥ एवंवि
कालनिरंतरब्रह्मनिष्ठायामेव प्रतिष्ठितः स यतिः मदाकाराकारितांतःकरणतया सर्वदा सर्वं ब्रह्मैव पश्य
न् स्वयमेतानुक्तलक्षणान् सत्वादीन् तत्कार्यैः प्रपंचेन सहातीत्यातिक्रम्य प्रकृतिं प्रकृतिकार्यं च वि
श्वं सर्वं ब्रह्मरूपाधिष्ठाने सन्मात्रत्वेन प्रविलाप्यैवं गुणांस्तत्पंकत्वा गुणानामयोनामाधिष्ठानस्य सम्यग्दर्शनेना
रोपितगुणात्तत्कार्ययोराभासतः प्रतीयमानयोरधिष्ठानमात्रत्वेनावगाहनशीलया चिदाकारवृत्त्या उन्नरह
मिदं ब्रह्मेत्यवगाहनं कृत्वा ब्रह्मीभूतसर्वप्रपंचो ब्रह्मवित्तमो ब्रह्मभूयाय ब्रह्मभावाय जीवन्नेव ब्रह्मात्मनावस्था
नाय कल्पते शक्तो भवति मामेव ये प्रपद्यंते मायामेतां तरंति ते इत्युक्तन्यायेन स्वस्मिन् सर्वत्र ब्रह्ममात्रदर्शनलक्ष
णायां भावनायामतिस्तीव्रब्रह्मनिष्ठायां यः प्रतिष्ठितो भवति स एव गुणामयीं गुणातत्कार्यतद्व्यवहाररूपां मायां
तत्कृतसंसृतिं अतीत्य विदेहकैवल्यसुखं प्राप्नोति नान्य इति तात्पर्यार्थः एतेन सर्वमिदमहं च ब्रह्मैवेति
वृत्त्यभ्यासस्य सर्वत्र ब्रह्मदर्शनमेव प्रत्ययांतरानंतरितत्वाद्गुणातत्कार्यातिक्रमणोपाय इति सूचितं
भवति॥ २६॥ ननु गुणातत्कार्यव्यामोहमात्रेण ब्रह्मविद्ब्रह्मीभवितुं नार्हति ब्रह्मविदोऽहमर्थत्वेन तत्त्वात्त्व ब्र
ह्मणा इदमर्थत्वेन तद्रूपत्वाज्जंतोस्तद्रूपभावो नहि संभवति प्रत्यक्षविरोधादिति शंकायामाह लोके अप्यहमितिव
वाहं सर्वं शब्दार्थयोः शब्दोपाधितत्त्वात्तद्रूपेणाभेदप्रतीयमानेऽपि विचार्यमाणे तयोरर्थतः एकत्वमपप

२

प

कै

१

॥श्रीगणेशाय नमः॥ ॐ॥ मुमुक्षूणां सत्वशुध्यर्थमीश्वरोपास्तिरवश्यं कर्त्तव्येति तेषां मंदाऽतिमंदा-
त्यंतमंदप्रज्ञानां तामुपासनाभेदं चोपास्यापरिच्छिन्नात्मनाम स्वरोपास्तिः विदेहमुक्त्यै कर्त्तव्येति स्व-
चयितुं पूर्वस्माद्देरुत्तरोत्तरस्योत्कृष्टत्वं प्रतिपाद्य ब्रह्मात्मैकत्वविज्ञानेनानात्मबंधनिर्मुक्तानां जीव-
न्मुक्तानां ब्रह्मविदामद्वेष्टृत्वादिकं लक्षणं साधकानां तु तदेव साधनमनुष्ठातव्यमिति बोधयित्वाऽ-
धुना जिज्ञासोर्मोक्षैककामस्य कथं ब्रह्मात्मैकत्वविज्ञानं किं ब्रह्म कस्त्वात्मा कः पुनरनात्मा तत्कृतो

10

बंधश्च कः स कथं ज्ञानेन निवर्त्तते किं ज्ञानं ज्ञानसाधनं च कथं वा जीवन्मुक्तिश्चेत्याकांक्षायां क्षेत्रक्षे-
त्रज्ञयोरनात्मात्मलक्षणार्थयोः प्रकृतिपुरुषयोर्विवेचनं विविक्तस्यात्मनः क्षेत्रज्ञस्य ब्रह्मणैकत्वं वि-
विक्तयोरपि क्षेत्रक्षेत्रज्ञयोर्वैलक्षण्यं ज्ञानहेत्वर्थं पुनः पुनर्विवेचनं प्रकृतेर्बंधकत्वमात्मनो-
ऽप्यध्यासकृतो बंध इति बोधयितुमात्मनोऽद्वितीयत्वं च सम्यक्प्रतिपादयितुं त्रयोदशाध्यायमा-
रभ्यते तत्रादौ क्षेत्रं क्षेत्रज्ञं तत्संक्षेपेण विविच्य विविक्तस्यात्मनो ब्रह्मणैकत्वं बोधयितुं॥ श्रीभ-
गवानुवाच इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः॥ आस-
त्वादीनां त्रयाणां गुणानां साम्यावस्थालक्षणा यात्वः परा प्रकृतिः सैव भोक्तुः पुरुषस्याऽदृष्टद्वारे-
श्वरप्रेरणया गुणवैषम्यं प्राप्य सुखदुःखानुभवे बंधस्य च मोक्षस्यापि च साधनतया स्वयमेव दे-
हेंद्रियप्राणमनोबुद्ध्यादिरूपेण रागद्वेषादिरूपेण शमदमादिरूपेण च शब्दादिविषयरूपेण

१

ग्रं. १२. पत्र२०

नेन चेदं शब्दार्थः संघात एव भवति आयुराशास्तेयजमानोऽसाविति संघातस्यैव आयुराद्याशासाश्रूय
ते असावित्यदःशब्दस्य प्रत्यक्षार्थवाचकत्वादिति चेत् भवानत्र प्रष्टव्यः ज्ञाताऽत्र देहो वा इंद्रियग-
णो वा प्राणो वा मनो वा बुद्धिर्वा अहंकारो वा एतत्समुदायो वा तदवयवो वेति नाद्यः स्वापपारवश्या-
दौ देहस्य ज्ञानादर्शनात् पादे मे वेदना शिरसि मे सुखमिति देहस्य सुखदुःखज्ञातृत्वे देहान्यत्वेनोपलभ्यमा-
नत्वाच्च न द्वितीयः दृष्टिर्मे मंदा वाङ्मे अस्पष्टेति तत्सोढा वा सोढव्यं परिज्ञातृ तद्भिन्नत्वेनावगमात् न तृतीयः निद्रा-
दौ स्वपरज्ञानादर्शनात् न चतुर्थः न पंचमो नापि षष्ठश्च मनो मे व्यथितं बुद्धिर्मे चपला हृष्टो मे अहंकार इति
मनआदीनां स्वान्यज्ञेयत्वावगमात् यज्ज्ञेयं तज्जडमिति ज्ञेयस्य घटादेर्जडत्वदर्शनात् जडस्य मनआदेर्ज्ञा-
तृत्वासंभवात् तेषां तु तथात्वे घटस्यापि तथात्वं स्यात् ज्ञेयत्वस्योभयसाधारण्यात् नैव च सप्तमः अवयवा-
नामचेतनत्वेऽवयविनोऽपि काष्ठभारवदचेतनत्वोपपत्तेः यदि चैत्रेण ज्ञातस्य मैत्रस्याप्यचेतनत्वं प्रसज्ये-
तेति चेन्न दृष्टापत्तेः चैत्रेण मैत्रशरीरस्यैव ज्ञातत्वाच्छरीरादेरचेतनत्वस्य साधितत्वान्नास्माकमेतदनिष्टाय
भवति किंच देहादीनां ज्ञाता देहादिभ्यो भिन्न एव भवति ज्ञातृत्वात् घटज्ञातृवदित्यादियुक्तिभिः चक्षुषोऽद्र-
ष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा मनसो द्रष्टा बुद्धेर्द्रष्टा तमसो द्रष्टा सर्वस्य द्रष्टेत्यादिश्रुतिभिश्च सम्यग्विचा-
र्यमाणे क्षेत्रस्याऽनात्मनस्तद्धर्माणां तदवस्थानां च ज्ञाता क्षेत्राद्भिन्न एव भवति ननु क्षेत्रं देहेंद्रियादि तद्ध-
र्माणां तथात्वे ममेदं शरीरं च चक्षुरिति शरीरादिषु स्वभिन्नत्वज्ञानं न स्यात् स्वभिन्नत्वज्ञानस्य विवेकिप्रसिद्ध-
त्वात् क्षेत्रात् क्षेत्रज्ञो भिन्न एव तत एवोच्यते भगवता सर्वज्ञेन इदं शरीरं क्षेत्रमेतद्यो वेत्ति स क्षेत्रज्ञ इ

तृज्ञातृत्वा

पिज्ञानाद्याकारेणापि च बहुधा परिणमते तदेवेदं कार्यकारणसंघातलक्षणं प्रत्यक्षेणानुभूयमानं श
रीरं क्षेत्रं रागद्वेषादिदोषविशिष्टः पुमान् क्षीयतेऽनेनेति वा क्षितिः क्षयात् संसारात्मकादनर्थाद्धर्मादियु
क्तं पुरुषं त्रायत इति वा सर्वदा दीपशिखावत् स्वयं क्षिणोतीति वा सुखदुःखादिफलोत्पादने क्षेत्रवद्वा चर
तीति वा क्षेत्रमिति क्षेत्रशब्देनाभिधीयते विद्वद्भिरित्यर्थः प्रकृतिः प्राकृतं च दृश्यजातं सर्वं क्षेत्रं तदेवेदं शरीर
मिति क्षेत्रशब्देनानात्मस्वरूपं निरूप्यात्मस्वरूपं बोधयितुमाह ॥ एतद्वेत्ति एतदनुभूयमानं शरीरल
क्षणं क्षेत्रं यो वेत्ति स्वाभाविकेन ज्ञानेनापादतलमस्तकं विषयीकरोत्यहमिति गुरूपदेशजन्येन च स्वस्य वि
षयभूतं बुध्यादिस्थूलांतमिदं शरीरमिदं चक्षुरयं घ्राणोयं प्राणोयं गंध इति यः प्रत्यक्षेणेदं शब्दप्रत्यया
र्थत्वेन दृश्यजातं विजानातीति क्षेत्रस्यानात्मनो दृश्यजातस्य वेदितारमहंपदप्रत्ययार्थं चेतनं पुरुषं क्षेत्र
ज्ञ इति क्षेत्रं प्रकृतिं प्राकृतं च सर्वं दृश्यं स्वतो भिन्नं जानातीति क्षेत्रज्ञ आत्मेति प्राहुः बहिरंतः सर्वं दृश्यं स त्रे
र्वं प्रत्यक्षादिप्रमाणैः साक्षाच्च वा धानेन च यो विजानाति स एव क्षेत्रज्ञ आत्मेति तद्विदः आत्मस्वरूपज्ञाः संतो व
दंति यद्वा तयोः क्षेत्रक्षेत्रज्ञयोः स्वरूपं ज्ञेयत्वज्ञातृत्वप्रकाश्यत्वप्रकाशकत्वविकारित्वाऽविकारित्वादिल
क्षणैः परस्परविलक्षणं ये विजानंति ते तद्विद आत्मानात्मस्वरूपज्ञाः वसिष्ठादयो ज्ञेयं सर्वमनात्मा तज्ज्ञातात्मा
त्मैवाहंपदार्थ इति निगदंतीत्यर्थः ननु कार्यकरणसंघातव्यतिरिक्तो न कश्चिदहंपदार्थो ज्ञातोपलभ्यते कथमि
दं शरीरं क्षेत्रमेतद्यो वेत्ति स क्षेत्रज्ञ इत्युच्यते प्रत्यक्षादिप्रमाणाविरोधात् अहं गच्छाम्यहं भुंज इति तां तव्यभोक्त
त्वपदार्थे ज्ञातृत्वं क्रियाकरणं च संघातस्यैव दृश्यते अयमेतस्य पुत्रो भवति एतत्सदृशत्वादित्यनुमानेनोपमा

विश्वादिभ्यो भिन्नत्वावगमात् तेषामविकारित्वं नित्यत्वं च न सिध्यति तदसिद्धौ अवस्थात्रितयज्ञानं च न सिध्यति
अतस्तेभ्यो भिन्नो विकारी नित्य एक एव चेतनश्च क्षेत्रस्य सर्वस्यापि ज्ञाता क्षेत्रज्ञ आत्मैवेति सिद्धं ननु आत्मनः क्षे-
त्रज्ञत्वमस्तु तथाप्ययमिति स्वयं क्षेत्रज्ञाता नोपलभ्यते तत्कथमिति चेदुच्यते ज्ञात्रंतराभावात् तदुपलंभाभावः

ज्ञात्रंतराभ्युपगमे त्वनवस्थाप्रसंगात् क्षेत्रज्ञस्यायमिति ज्ञातत्वे क्षेत्रभावापत्त्या क्षेत्रज्ञत्वं हीयेत अनित्यत्वाचेत-
नत्वादिदोषश्च स्यात् एको देव इति एक एव साक्षी स्वप्रकाश इति अजो नित्यः शाश्वत इत्यादिश्रुति विरोधप्रसंगे-

12

श्च अत आत्मा घटादिवन्न ज्ञानविषयः ननु तरति शोकमात्मविदित्यात्मवेदनवतः शोकतरणं श्रूयते कथ-
मयमस्मीत्यात्मन्यविज्ञाते शोकतरणं विदुषः सिध्येत् अतोऽयमित्यात्मा कथं ज्ञायत इति चेदुच्यते नैव ज्ञानेनात्मा ज्ञा-
तव्यस्तत्कथमिति चेदुच्यते नांतःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहा-
र्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा
स विज्ञेय इति श्रुत्या नांतःप्रज्ञमित्यादिना तैजसविश्वादिभ्यो भिन्नत्वं तेषामनात्मत्वं च प्रतिपाद्यादृष्टमित्यह-
मादि सर्वदृष्टभिन्नत्वमव्यवहार्यमिति कर्मेंद्रियाविषयत्वमग्राह्यमिति ज्ञानेंद्रियाविषयत्वमलक्षणमि-
त्यनुमानागम्यत्वमचिंत्यमिति मनसोऽप्यगोचरत्वमव्यपदेश्यमिति वागविषयत्वमेकात्मप्रत्ययसारमिति
चिदेकरसत्वं स्वगतभेदराहित्यं च प्रपंचोपशममिति विजातीयभेदराहित्यमद्वैतमिति सजातीयभेदराहि-
त्यं च शिवमिति आनंदघनत्वं चतुर्थमिति स्वाभासविश्वादित्रितयमध्ये तुरीयत्वं सर्वदृष्टत्वेन लक्षणं प

तित्वदुक्तं प्रत्यक्षादिप्रमाणानामविवेकिविषयमतो न कश्चिदत्र विरोधः ननु क्षेत्रात् व्यतिरिक्तः क्षेत्रज्ञो नाम
क्षेत्रज्ञातान्यमितिन कश्चिदुपलभ्यते उपलंभाभावात्तदभावश्चेति चेत् भवानत्र प्रष्टव्यः किं क्षेत्रा
भाव उच्यते उत क्षेत्रज्ञाभाव इति नाद्यः प्रत्यक्षेणोपलभ्यमानस्य क्षेत्रस्याभावकथनायोगात् न द्विती
यः क्षेत्रोपलब्धुः क्षेत्रज्ञस्याऽभावत्वे इदं शरीरमयं घटः पटोऽयमित्यादिदृश्यप्रत्ययाऽभावप्रसंगात् स्था
यीभाववत् क्षेत्रज्ञाभावे जगदांध्यं प्रसज्येत क्षेत्रज्ञेन चक्षुः सूर्यवत् स्वमहसा महदादिस्थूलांतं दृश्यजा
तं बहिरंतश्चापेदं सर्वं भास्यते इदमिति सर्वं ज्ञायते च अन्यथाऽभ्यंतरमहदादीनां बहिर्घटादिपदार्थानां सु
खादिप्रत्ययानां जाग्रदाद्यवस्थानां च स्वरूपविवेकविज्ञानाभावप्रसंगात् प्रत्यक्षादिसर्वप्रमाणानां अह
मादिप्रमेयानां च सर्वेषां प्रामाण्यं यतः सिध्यति तदभावः केन संपादयितुं शक्यते तदभावे स्वाऽभावप्रसंगात्
ननु चिदाभासोऽस्त्येव प्रमाता सर्वप्रमाणानां प्रामाण्यनिर्वोढेति चेन्न तस्यापि विकार्यंतःपातित्वेन सर्वज्ञत्वानु
पपत्तेः अंतःकरणविकारैः सार्द्धं क्षणे क्षणे विकृतिं गच्छतश्चिदाभासस्यापि विकारित्वात्तद्भावानुसारि
त्वाच्च जाग्रदाद्यवस्थासु अस्य सर्वस्य व्यवहारस्य विज्ञानायोगात् ननु विश्वादयः संत्येव त्र्यवस्थाविज्ञा
तार इति चेन्न क्षेत्रज्ञाऽनेकत्वप्रसंगात् एतद्यो वेत्ति इत्येकवचनेन क्षेत्रज्ञैकत्वश्रवणात् अभिमानस्य
विकारत्वाज्जाग्रदाद्यवस्थाभिमानवतां विश्वादीनां विकारित्वेन नित्यत्वाऽसंभवादेकस्यावस्थात्रित
यज्ञानानुपपत्तेः यो जागरमन्वभूवं यः स्वप्नमद्राक्षं यः सुखमस्वाप्सं सोऽहमिति प्रमीतिरवस्थाज्ञातु

४

अन्यथा द्वैतहेतोर्देहादिप्रपंचस्य पयार्थविद्यमानत्वे ब्रह्मणोऽद्वितीयत्वं न सिध्यति तदभावे अद्वैतश्रुतिविरोधः स्या
त्ततः क्षेत्रज्ञं च क्षेत्रमपि मां विद्धीति द्वयोरपि ब्रह्मत्वप्रतिपादनमुक्तं तेन चस्यापेक्षं च प्रयोजनं तयोर्ब्रह्माभिन्नत्वा
ज्ञानदृढीकरणमेव ततः क्षेत्रं क्षेत्रज्ञश्च सर्वं ब्रह्मैवेति सिद्धं तथा च श्रुतिः स्मृतिश्च भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव चेति ननु क्षेत्रक्षेत्रज्ञयोरुभयोरपि यदीष्टं
ब्रह्ममात्रत्वं तर्हि सर्वं ब्रह्मैवेत्युक्त्या सर्वस्य ब्रह्ममात्रत्वं सिध्यति किमिदं शरीरं कौंतेयेत्यादिग्रंथगौरवेणेति न
शंकनीयं इदं शरीरं क्षेत्रमिति प्रकृतिं प्राकृतं च सर्वं दृश्यं क्षेत्रमेवेत्यनात्मस्वरूपं निरूप्य एतद्यो वेत्ति सं क्षेत्रज्ञ

13

इति क्षेत्रज्ञस्यात्मनः क्षेत्रतद्धर्मतत्कर्मतदवस्थासंबंधत्वेनशराहित्ये प्रतिपादिते क्षेत्राद्विभिन्नमकर्तारमभो
क्तारमविकारमविक्रियं कूटस्थासंगचिद्रूपं क्षेत्रज्ञमेव स्वं साक्षादित्यवतः सत्तामसत्तां च देहेंद्रियादिव्या
पाराणां सर्वदा तटस्थमेवात्मानं प्रत्यग्वृत्त्या पश्यतो विदुषः क्षेत्रधर्मैः कर्तृत्वभोक्तृत्वादिभिर्जरारोगादिभिश्च
तत्कर्मभिः पुण्यपापैः तज्जोचरैर्मानावमानैश्चविक्षेपो न संभवत्येवं जीवन्मुक्तिसुखं चागामिसंचितादिसर्व
कर्मक्षयश्च सिध्यति क्षेत्रज्ञं चापि मां विद्धीति न्यायेन क्षेत्रं क्षेत्रज्ञं स्वं सर्वं च ब्रह्मैव पश्यतस्तु द्वैतप्रत्ययाभावा
त् सर्ववासनाक्षयो मनोनाशश्च ततः प्रारब्धक्षयांते विदेहकैवल्यं तत्सुखं च सिध्यतीति इममर्थं सूचयि
तुं क्षेत्रक्षेत्रज्ञयोर्विभजनं तयोर्ब्रह्ममात्रत्वं च प्रतिपाद्याऽधुना क्षेत्रक्षेत्रज्ञयोर्ब्रह्माभिन्नत्वदर्शनलक्षण
मेव ज्ञानं मुक्तेः परमकारणमिति निश्चिनोति क्षेत्रक्षेत्रज्ञयोरिति यद्यपि पुरुषः प्रकृतेर्भिन्नः तद्गुणकर्म
संबंधत्वेनशून्यः सदाऽसंगचिद्रूप एवेत्येवं लक्षणां प्रकृतिपुरुषयोः परस्परभिन्नत्वविज्ञानं मुक्तेः परम

४

६।

चसम्यगात्मनः प्रतिपाद्य यएवं सर्वदृश्यविलक्षणाश्चिदानंदैकरसः स एवात्मा स्वलक्षणालक्षितः सोयमहमस्मी

३२ तिविद्वद्भिः स्वात्मना ज्ञेयो ज्ञातव्य इति बोध्यते अनेन प्रोक्तेन ज्ञानेनाविद्यातत्कार्यसंबंधरहितमात्मानं स्वं ज्ञात्वा विद्वान्

संसारान्मुक्तो भवत्यतः सर्वदृश्यविलक्षणत्वं क्षेत्रज्ञत्वं चात्मनो लक्षणमिति सिद्धं ॥१॥ एवमिदं शरीरं क्षेत्रमेतद्यो वे

त्ति स क्षेत्रज्ञ इत्यनात्मनोप्यात्मनश्च स्वरूपं गृहप्रदीपवत् विभज्य प्रदर्शयित्वा क्षेत्रज्ञस्यात्मनः श्रुत्यादिप्रमाणसिद्धं

ब्रह्माभिन्नत्वं प्रतिपादयति ब्रह्मणः परोक्षत्वसद्वितीयत्वनिवृत्तये आत्मनोप्यल्पत्वेति कसंसारनिवृत्तये चानंदरू

पत्वसिद्धये च ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥ भा० या० म

खंडवृत्त्यैव सदा रमत इति हे भारत सर्वक्षेत्रेषु सर्वेषु ब्रह्मादिस्तंबपर्यंतेषु क्षेत्रेषु स्थूललक्षणेषु शरीरेषु यः क्षेत्र

ज्ञः तत्तत्क्षेत्रगतधर्मतत्कर्मतदवस्थानां च ज्ञाता एकः परिपूर्णोपि स्वयं घटादिभिराकाशवदविद्यया स्वात्मनि

स्ते० कल्पितैस्तैरूपाधिभिः सुखदुःखादिप्रत्ययैश्च विभक्त इव प्रतिशरीरमहमहमित्यहंप्रत्ययार्थत्वेन स्थितः स

र्वप्रत्ययसाक्षी प्रत्यग्लक्षणास्तु मुक्तलक्षणेन सर्वेभ्यः क्षेत्रेभ्यः सम्यग्विभक्तं तत्तदुपाधितद्धर्मतत्कर्माद्य

स्पृष्टं तत्तच्छब्दप्रत्ययागोचरमाकाशवन्निराकारं निर्विकारं निरंजनं कूटस्थासंगचिद्रूपमात्मानं मां सर्वश्रु

तिप्रसिद्धं सत्यज्ञानादिलक्षणं निर्विशेषं परं ब्रह्म विद्धि अयमात्मा ब्रह्मेति श्रवणादात्मानं परं ब्रह्मेत्यवग

च्छेत्यर्थः सर्वशरीरेष्वात्मैकत्वं पूर्वमेव प्रतिपादितं सर्वक्षेत्रेष्वहमर्थत्वेन स्थित आत्मा ब्रह्मैवेति अवे

हीत्यर्थः एवं क्षेत्राद्विभक्तं क्षेत्रज्ञं च मामेव यथा वेत्सि तथा क्षेत्रस्याविद्याकार्यत्वेन स्वतः सत्ताभावान्मयि

ब्रह्मण्यधिष्ठाने कल्पितं क्षेत्रमपि मामेव विद्धि अवेहि अत्रापि हि क्षेत्रस्य क्षेत्रज्ञवत् ब्रह्माभिन्नत्वं बोधयति

त्यपपृपन्नतानित्रेतायांबहुधा संततानितान्याचरथनियतं सत्यकामाइत्यादिकर्मशास्त्रस्यतरतिशोकमात्मवित्
आत्मावारेद्रष्टव्यःश्रोतव्योमंतव्यइत्यादिज्ञानशास्त्रस्यचानर्थकंस्यात् जीवईश्वराद्भिन्नःजननादिमत्वात्
५ किंचिज्ज्ञत्वात् निकृष्टोपाधिमत्वात् नित्यदुःखित्वात् नियम्यत्वाच्चेत्यनुमानविरोधात्तयोरेकत्वं न सिध्य
तीति चेन्न बहुश्रुतिस्मृतिविरोधापत्तेः तथाहि अयमात्माब्रह्म प्रज्ञानंब्रह्म अहंब्रह्मास्मि तदेतत्
ब्रह्माद्वयं सदानंदचिन्मात्रं आत्मैवतदेतत्सत्यमात्माब्रह्मैव ब्रह्मात्मैवात्रह्येवन विचिकित्स्यं स एकात्स
14 एमतरं नित्यं तत्त्वमेवत्वमेवतत् तत्त्वमसि स एक इत्यादिबहुश्रुतिभिः सोहं स च त्वं स च सर्वमेतत् आत्मनोब्रह्म
णोभेदमसंतं कः करिष्यति एकस्त्वमात्मा पुरुषः पुराणः सकलमिदमहं च वासुदेवः जीवोब्रह्मैवनापरः सर्वे
वयमतः परं भोक्तारं यज्ञतपसां क्षेत्रज्ञं चापि मां विद्धि उपद्रष्टानुमंता चेत्यादिस्मृतिभिश्च ब्रह्मात्मनोरेक
त्वमेव नियमेन प्रतिपाद्यते आत्मा ब्रह्मैव भवति सद्रूपत्वात् चिद्रूपत्वात् आनंदरूपत्वात् अविक्रियत्वात् असंग
त्वात् परिपूर्णत्वाच्च यन्नैवं तन्नैवं यथा बुद्ध्यादिः जीवेश्वरयोर्भेदोऽसत्यः उपाधिकल्पितत्वात् घटाकाशम
हाकाशवत् जीवोपाधिर्मिथ्या मायाकार्यत्वात् स्वप्नार्थवदित्यादिभिर्युक्तिभिश्च सम्यग्विचार्यमाणे तयो
रभेद एवावगम्यते नैवेषदपि च भेदः संतितु तयोर्भेदे भेददर्शननिषेधायोगात् नात्र काचन भिदास्ति ने
वात्र काचन भिदास्ति अत्र भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोतीति श्रुत्यैव
योनःपुन्येन भेददर्शनं निषिध्यते भेदद्रष्टुर्महाननर्थः प्रोच्यते ततस्तयोरभेद एव सम्यग्विज्ञातव्यो मुमु
क्षुभिः नन्वहं सुखी दुःखीति प्रत्यक्षेण जीवस्य संसार उपलभ्यते कथं संसारिणोप्यसंसारिणैक्यं ५

कारणमितिसांख्यामन्यंतेतथापिप्रकृतिसान्निध्यात्‌वाधितानुवृत्त्यापुरुषस्यपुनःपुनःसंसारःप्रतीयतेनतुनिः
शेषेणनिवृत्तौनिःशेषसंसारनिवृत्तिःखलुमोक्षोब्रह्मात्मनावस्थानलक्षणःनिरंजनःपरमंसाम्यमुपैतीत्यादि
ष्वतिप्रसिद्धःसएषपरावरैकत्वज्ञानैकलभ्यःतस्मिन्दृष्टेपरावरइतिश्रवणात्ततःपरावरैकत्वविषयकमे
वज्ञानंनिःशेषसंसारध्वांतविध्वंसकंविदेहमुक्तेः परमकारणमितिमत्वोच्यतेक्षेत्रक्षेत्रज्ञयोरिति क्षेत्रक्षेत्र
ज्ञयोःप्रकृतिपुरुषयोःज्ञानंयत्तयोर्याथात्म्यवेदनंसर्वमिदमहंचब्रह्मैवेतिप्रत्यगहस्याक्षेत्रस्यक्षेत्रज्ञस्यचब्रह्ममात्रत्व
दर्शनलक्षणंतदेवसम्यक्ज्ञानमात्यंतिकसंसारनिवृत्तिकारणमितिसर्वज्ञस्यममेश्वरस्यमतमभिमतंनिश्चय
इत्यर्थः यद्वायेनज्ञानेनक्षेत्रक्षेत्रज्ञयोस्तत्त्वंज्ञाताज्ञेयंचसर्वंब्रह्मैवेत्यवगम्यतेतदेवममब्रह्मणोज्ञानमितिम
तंक्षेत्रक्षेत्रज्ञयोरप्रतिबद्धवृत्त्याब्रह्ममात्रत्वावगमनमेवब्रह्मज्ञानंकैवल्यकारणमितिऋषीणामभिमतंनि-
श्चितमित्यर्थः ननुसर्वक्षेत्रेषुक्षेत्रज्ञस्यात्माब्रह्मैवेतिजीवेश्वरयोरेकत्वमनुपपन्नंप्रत्यक्षादिसर्वप्रमाण-
विरोधात्प्रत्यक्षेणहिजीवस्यजन्ममृत्युसुखदुःखादिलक्षणःसंसारःकर्मैकनिवंधनउपलभ्यतेतद्वता
जीवेनेश्वरस्यैकत्वेत्वीश्वरव्यतिरेकेणाभोक्तृत्वाभावादीश्वरस्यैवसंसारप्रसंगात्तथात्वेत्वनश्नन्नन्योऽ
भिचाकशीतीत्यादिश्रुतिविरोधः प्रत्यक्षविरोधश्चस्यात् जीवस्यवापीश्वराभिन्नत्वेजीवव्यतिरिक्तेश्वराभावा
त्जीवस्यैवसर्वनियंतृत्वंस्यात्स्वतंत्रस्यतस्यसंसारानुपयोगात्संसारस्यात्यंताभावःप्रसज्येतसंसारसंसारिणो
रुभयोरप्यभावेप्रत्यक्षविरोधश्च कर्मानुगान्यनुक्रमेणदेहीस्थानेषुरूपाण्यभिसंप्रपद्यते तयोरन्यःपिप्पलं
स्वाद्वत्तीत्यादिश्रुतिविरोधश्च द्वासुपर्णासयुजाइत्यादिभेदश्रुत्याविरोधोपिचस्यात् मंत्रेषुकर्माणिकवयोया

बहुधा वदंति एकः सन् बहुधा विचार एकं संतं बहुधा कल्पयंति एकोदधार भुवनानि विश्वा एको देवो ब
हुधा सन्निविष्टः त्वमेको सि बहूननुप्रविष्टः तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यं ईशावास्यमिदं सर्वं सर्वं खल्विदं
सर्वं चिद्धीदं सर्वं पुरुष एवेदं सर्वं ब्रह्मैवेदं विश्वमिदं वरिष्ठं मायामात्रमिदं द्वैतं नेह नानास्ति किंचन न ह्यस्ति द्वैतसिद्धि
रित्यादिश्रुतिभिस्तस्मात् न विज्ञानमृतेस्ति किंचित् ज्ञानं विशुद्धं विमलं विशोकं एकः समस्तं यदिहास्ति किंचित् वि
शुद्धं ज्ञानमेवैकं मत्तः परतरं नान्यत् वासुदेवः सर्वमिति सर्वभूतस्थितं यो मां वेदाद्वैतः परमाद्वैतमित्यादि स्मृतिश्च ब्र
ह्माद्वितीयमनंतत्वात् सर्वात्मकत्वात् यन्नैवं तन्नैवं यथा नभः ब्रह्माद्वितीयं वस्त्वंतरशून्यत्वात् सुषुप्तवदित्यादियुक्ति
भिश्च ब्रह्मणोद्वितीयत्वं प्रतिपाद्यते तस्मात् सर्वश्रुतिस्मृतिप्रसिद्धमेव क्षेत्रज्ञस्यात्मनो ब्रह्मत्वं तत एव क्षेत्रज्ञं चापि
मां विद्धीति भगवतोच्यते सर्वज्ञेन ननु नात्र जीवेश्वरयोरेकत्वं प्रतिपाद्यते भगवता किंतु ईश्वरः सर्वभूतानां हृ
द्देशेर्जुन तिष्ठतीति न्यायेन सर्वक्षेत्रेषु अंतर्यामित्वेन तिष्ठतः स्वस्वरूपस्यैवैकत्वं प्रतिपाद्यते सर्वभूतेष्वंतर्यामीश्वर ए
कः एवेति महानामीश्वरैकं विज्ञानार्येति चेत् भ[illegible]वानत्र प्रष्टव्यः किमीश्वरः स्वयं सावयवो भूत्वा भूतानि यमय
ति किं निरवयवः सन्नेव वानंतो भयात्मको वेति नाद्यः सावयवत्वे त्वीश्वरस्य विकारित्वानित्यत्वादिदोषप्रसंगा॥
च्छ्रुतिविरोधश्च स्यात् अशरीरमित्यादिश्रुतिस्थितशरीराभावश्रवणात् सावयवत्वे परिच्छिन्नत्वात् तया पृथक्त्वव्याघातश्च
एकत्वानुपपत्तिश्च स्यात् न द्वितीयः यः प्राणेन प्राणिति स त आत्मा सर्वांतरः एष त आत्मा सर्वांतर इति श्रवणादी
श्वरस्य प्राणित्व प्राणनक्रियावत्त्वप्रसक्त्या अशरीरत्वानुपपत्तेः तथात्वे तु शरीरं शरीरेष्विति अप्राणो ह्यमनाः
शुभ्र इत्यादिश्रुतिविरोधोपि स्यात् न तृतीयः निरवयवत्वतदन्यत्वयोः सामानाधिकरण्यासिद्धेः ईश्वरस्यैव-

६ 15 त्वे द्वि ६

सिध्यतीति चेन्न आत्मनः संसारो मिथ्या अविद्याध्यारोपितत्वात् जरादिवदित्यात्मनि प्रतीतसंसारस्याऽवि
द्याकार्यत्वेन मिथ्यात्वोपपत्तेः अमूढो मूढ इव व्यवहरन्नास्ते माययैवेति स्मरणादात्मा स्वयमसंसार्ये
व सन्नविद्यया संसारीव प्रतीयते करणदोषाच्छंखः पीत इव यथा तद्वत् वस्तुतस्त्वयमात्मा सन्मात्रो नि
त्यशुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वयानंदः परः प्रत्यगेकरस इति स्मरणान्नित्यशुद्धबुद्धमुक्त
स्वभाव एव भवति संसारस्त्वनात्मधर्मः सन्नेवाविद्ययात्मन्यध्यारोपितः शंखस्य धर्मः पीतिमा शंखवत् संसारो
ऽनात्मधर्मः ज्ञेयत्वात् रूपवदिति संसारस्याऽनात्मधर्मत्वमेवाऽवगम्यते न त्वात्मधर्मत्वं तस्यात्मधर्मत्वे त्वात्मनः
कदापि मोक्षो न स्यात् श्रूयते च हि मोक्षः तरति शोकमात्मवित् विमुक्तश्च विमुच्यत इति ब्रह्मैव सन् ब्रह्माप्ये
तीति च यत एवं तत आत्मनोऽविद्यारोपितसंसारित्वप्रतीतिदशायां स्वप्न इव प्रत्यक्षादिप्रमाणसिद्धद्वैतव्यवहा
रस्य सर्वस्यापि संभवान्न कोऽपि विरोधो न कर्मज्ञानशास्त्रानर्थक्यं च संभवति विद्याविर्भूतिदशायां प्रबोधे स्व
प्नसंसाराभाववदाविद्यकसंसाराभावान्नित्यशुद्धबुद्धस्वभावस्यात्मनः परिपूर्णस्य ब्रह्माभिन्नत्वेन विरुध्य
ते तत एव प्रमाणशिरोमण्या सर्वज्ञया श्रुत्यापि एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति स
र्वस्याप्याकाशादिस्थूलांतस्यात्मनः संसारनिमित्तस्य द्वैतप्रपंचस्याविद्याकार्यस्याधिष्ठानसत्तैकात्म्येन न स्व
तः सत्ता पृथङ्न स्यात् तदात्म्यमिति सन्मात्रत्वं बोधयित्वा भेदहेतोर्विशेषस्याभावाच्चिदेकरसस्यात्मनः तत्त्वम
सीति ब्रह्मत्वं प्रतिपाद्यते ब्रह्मणोऽद्वितीयत्वसिद्धौ सति द्वैते त्वद्वैतश्रुतिस्मृतीनां व्याकोपः स्यात् सत्यं ज्ञानमनं
तं ब्रह्म एकमेवाद्वितीयं ब्रह्म एको रुद्रो न द्वितीयाय तस्थुः एको देवो नारायणः एक एव हि भूतात्मा एकं सद्विप्रा

गुह्यत्वात्तदर्थं सम्यगवधारयतन्निष्ठो भवतदेव श्रवणस्य फलं न तु पेक्षणं विस्मरणं वा ३ ऋतिभिः सूत्रैर्महाऋ
षिभिश्चायमर्थः सुनिश्चितः इति विवक्षितार्थस्य सर्वशास्त्रतदर्थज्ञप्रसिद्धत्वमाह श्रोतुः श्रद्धयास्य याथार्थ्यप्रति-
पत्तिसिद्धये ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ४॥
क्षेत्रक्षेत्रज्ञयोः स्वरूपं वासिष्ठविष्णुपुराणादिषु ऋषिभिर्वसिष्ठपराशरादिभिर्बहुधा बहुप्रकारं गीतं प्रतिपा
दितं विविधैः शाखाभेदेन बहुप्रकारैः छन्दोभिः ऋगादिवेदैः स ईक्षत कथं न्विदं मद्दृते स्यादिति स वा एष पुरु
षोऽन्नरसमयः अन्योऽन्तर आत्मा प्राणमयः एतस्मिन्नदृश्येऽनात्म्ये इत्यादिना तयोः स्वरूपं पृथग्विभज्य गीतं कथित
मित्यर्थः हेतुमद्भिः हेतवोऽर्थसाधका युक्तयस्तद्वद्भिर्विनिश्चितैः सन्निश्चायकैर्निश्चितार्थैः ब्रह्मसूत्रपदैः ब्र
ह्मणः सूचकानि ब्रह्मसूत्राणि तान्येव पदानि पद्यते वस्तुतत्त्वं ज्ञायते एभिरिति पदानि तैः ब्रह्मसूत्रपदैः वेदा
न्तसूत्रैः जन्माद्यस्य यत इत्यादिभिस्तयोर्याथात्म्यं गीतं विविच्य सम्यक् प्रकाशितमित्यर्थः ४ एवं क्षेत्रक्षेत्र
ज्ञयोः स्वरूपविवेचनस्य सर्ववेदशास्त्रतदर्थज्ञप्रसिद्धत्वं प्रतिपाद्य तत्र प्रथमोद्दिष्टं क्षेत्रं प्रतिपादयति सा
र्धं महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ५ इच्छा द्वेषः
सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं ६ महाभूतानि भवन्तीति भूतान्याका
शादीनि सूक्ष्माणि अपञ्चीकृतानि स्थूलानि तु पञ्च चेन्द्रियगोचरा इति वक्ष्यति ततोऽत्र तन्मात्रात्वेन गृह्यन्ते भूतश
ब्देन महान्ति च तानि भूतानि च महाभूतानि सर्वकार्यव्यापकत्वात् भूतानां महत्त्वं अहंकारो महाभूतकारणं अहंकारा
त्मा च तन्मात्राणीति श्रुतेः बुद्धिर्महत्तत्त्वमहंकारस्य कारणं महतोऽहंकार इति श्रुतेः महतः कारणमव्यक्तं मूलप्रकृति
र्महदादिवन्न व्यज्यत इत्यव्यक्तमव्याकृतं जगद्बीजं त्रिगुणात्मकं परमेश्वरशक्तिः परा भिन्ना प्रकृतिरष्टधा अपरे

क्षेत्रज्ञत्वेपुरुषःसुखदुःखानामित्युक्तन्यायेनजीवत्वंसुखदुःखादिभोक्तृत्वंचस्यात् कारणंगुणसंगोस्येत्युक्तःसद
सद्योनिजन्मसुसंगात् ननुक्षेत्रज्ञस्यात्मेतिपक्षेप्ययंदोषःस्यादेवेतिचेन्न अविद्ययात्वात्मनोजन्माद्यनर्थांगीकारा
द्विद्ययातन्निवृत्त्युपपत्तेश्चतेनब्रह्मत्वंनविहन्यते बंधोमोक्षइतिव्याख्यागुणतोमेनवस्तुतःगुणस्यमायामूलत्वा
त्वान्नमेमोक्षोनबंधनमितीश्वरेणोक्तत्वात्ततआत्मनस्त्वविद्ययाजीवत्वेत्वयोक्तविकल्पानवकाशःविद्ययाब्र
ह्मत्वंचसिध्यतीतिततोनात्रकाचिदनुपपत्तिरितिसिद्धं २ एवमेतद्योवेत्तितंप्राहुःक्षेत्रज्ञइत्यनेनक्षेत्रज्ञस्यात्मनोक्षे
त्रत्वमेवधर्मः नत्वहंकारममकारकर्तृत्वभोक्तृत्वादिलक्षणःसंसारःसतुज्ञेयत्वेनक्षेत्रस्यैवधर्मइतिसूचयित्वा
क्षेत्रज्ञंचापिमांविद्धीत्यनेनसर्वक्षेत्रेष्वविभक्तस्यात्मनएकदेकरसस्यापरिच्छिन्नभावेनपूर्णत्वादयमात्माब्रह्मे
तिन्यायेनब्रह्मत्वंप्रतिपाद्याधुनापिक्षेत्रक्षेत्रज्ञयोर्विवेकेसम्यक्कृतएवपुंसःसंसारित्वभ्रमोनिःशे
षेणनिवर्त्ततेनान्यथेतिबोधयितुंपुनरपिक्षेत्रक्षेत्रज्ञयोःस्वरूपंविशेषतःसम्यग्विभज्यप्रदर्शयितुमाह ॥
तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेनमेशृणु ३ इदंशरीरमितियदुक्तंतत् क्षेत्रंस्व
यंस्वरूपेणयच्चयत्स्वरूपकंस्वाभाविकेनरूपेणयादृग्भवतियद्विकारिचयैर्विकारैर्महदादिलक्षणैःस्वपरिणा
मात्मकैर्विकार्यवयविभवतिस्वधर्मैर्यादृक्चयादृशधर्मकंयैर्धर्मैःस्वयंधर्मिभवतियतश्चयतोयस्मात्क्षेत्रप्रकृता
त्कारणाद्यच्चकार्यंपुंसःसंभवतिक्षेत्रज्ञस्योपाधिर्भूत्वास्वयंयत्कार्यंजनयतीत्यर्थः तत्क्षेत्रज्ञस्यसंसारकारणंमुमुक्षु
णासम्यक्ज्ञातव्यंयस्मिन्ज्ञातेस्वयंसंसारीनभवति किंच एतद्योवेत्तीत्युक्तःक्षेत्रज्ञःसचायंस्वरूपेणयश्चयादृशो
भवतिस्वयायाथात्म्येनयत्स्वरूपकोभवतीत्यर्थः यत्प्रभावश्चोपाधियोगाद्यादृशस्वभाववान्भवतिततःसविज्ञातव्यः
यस्मिन्विज्ञातेस्वयंमुक्तोभवतितत्तयोःक्षेत्रक्षेत्रज्ञयोःस्वरूपंसमासेनसंक्षेपेणैवनतुविस्तरतःवक्ष्यमाणंमेमत्तःश्र

नापि क्रियावान् निष्कलं निष्क्रियमिति श्रुतेः निष्कलत्वान्नाप्यवयवी असंगत्वादात्मनो नयेन केनापि संयोगः सम
वायश्च संभवति तेषां यदि आत्मधर्मत्वं तर्हि नित्यत्वं चैतन्यवत्सदोपलभ्यमानत्वं च स्यात् ततो रागद्वेषसुखदुः
२ खादिधर्मकं जन्मजरादिधर्मकं च क्षेत्रमेवेति सिद्धं तत एव भगवतापि इच्छा द्वेषः सुखं दुःखमितीच्छादीनां क्षे
त्रांतःपातित्वमेव प्रतिपादितं किंच संघातः करचरणादिसंहतिरूपो देहोपि क्षेत्रमेव बुद्धौ तप्तायःपिंडे अ
ग्निरिव यन्नात्मचैतन्याभासो बुद्धिवृत्तिविशिष्टः शब्दादिविषयावभासकः स एव चेतना सा च बुद्ध्यासह
त्वा॰ साक्षिणो विषयत्वेन ज्ञेयत्वात्तन्नाशभावित्वाच्च क्षेत्रमेव धृतिर्धैर्यं लक्षणो बुद्धिवृत्तिविशेषः सापि ज्ञेयत्वात् क्षे
त्रमेव धृतिरिति कामसंकल्पविचिकित्सादीनामहंकारममकारादिसर्वप्रत्ययानामुपलक्षणं तेन य
द्यदात्मनो ज्ञेयं तत्तत्सर्वं क्षेत्रमेवेति सिद्धं सविकारं विकारैर्महदादिभिः शब्दादिभिश्च सह वर्तते इति स
विकारं स धर्मं चैतत् क्षेत्रं [illegible] समासेन ते समुदाहृतं संक्षिप्य निरूपितमित्यर्थः ५।६। एवं महाभूतान्य
17 हंकार इत्यादिना क्षेत्रस्य स्वरूपं निरूप्याथ क्षेत्रज्ञे निरूपितव्ये सति तज्ज्ञानं तत्साधनाऽभावेन सिध्यति जिज्ञासोस्त
न्नियतसाधनसंपत्तिमतस्तज्ज्ञानं सुलभमित्याशयेनात्मज्ञानोत्पत्तिसाधनान्याह पंचभिः अमानित्वमदं
भित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ७ स्वस्मिन्नुत्कृष्टत्वबुद्धिर्मानः प्रतिष्ठा
र्थमात्मन्युत्कर्षारोपणहेतुः सोऽस्यास्तीति मानी तस्य भावो मानित्वं तदभावस्त्वमानित्वं ज्ञानोत्पत्तिहेतोश्चित्त
शुद्धेः प्रतिबंधो मानस्तथैव दंभित्वादयश्च तदभावेन मुमुक्षोर्भवितव्यमित्यर्थः वेषभाषाक्रियाचातुर्यादि
भिः स्वमहत्त्वप्रकटनं दंभः तद्वत्त्वं दंभित्वं तद्रहितत्वमदंभित्वं मनोवाक्कायकर्मभिः प्राणिपीडाऽनाचरणं

त२
२

पमिति चैदैवी ह्येषा गुणमयी मम माया दुरत्ययेत्युक्तलक्षणाष्टधा भिन्ना त्वपरैव प्रकृतिरिति प्रकृतिस्वरूपावधार
णार्थ एवकार चकारः समुच्चयार्थः अव्यक्तमेव क्षेत्रस्य स्वाभाविकं रूपं महदादिभिः सप्तभिरिंद्रियाणि दशैकं
च पंच चेंद्रियगोचरा इति वक्ष्यमाणैश्च षोडशभिर्विकारैर्यद्विकारीत्युक्तविशेषणावतः क्षेत्रस्य वैका
रिकं रूपं चक्षुरादीनि वागादीनि च दश इंद्रियाणि एकमंतरिंद्रियं मन एवमेकादश तथेंद्रियगोचराः शब्दादयः
पंच च मिलित्वा षोडश विकाराः पंच महाभूतानि महदहंकाराव्यक्तं च चतुर्विंशति पदार्थाः मूलप्रकृ
तिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकार इति सांख्यानां चतुर्विंशतितत्त्वानि भवं
ति यादृक्चेत्युक्तविशेषणं स्फुटयति भोग्यानीक्षत्यनयेति इच्छा रागः विषयेषु प्रीतिः द्वेषोऽप्रीतिः इच्छा द्वेष इति
सत्त्वगुणानां शमदमदयाक्षांत्यादीनां तमोगुणानां निद्रालस्यमोहादीनामुपलक्षणं इच्छाद्वेषादयो राजस
सात्विकतामसाः सर्वे क्षेत्रांतःपातिनोंतःकरणस्य धर्मत्वात् क्षेत्रं स्वयमेतैर्जन्मादिभिश्च धर्मि भवति इच्छा
द्वेषादिभिः पुण्यापुण्यकर्महेतुत्वात् स्वयमेव कर्मि भवति इच्छादीनां पुण्यापुण्यादिकर्मणां च क्षेत्रधर्म
त्वेन ज्ञेयत्वेन च क्षेत्रत्वमेव इष्टानिष्टवस्तुसान्निध्यात् प्रतीयमानं सुखं दुःखं चांतःकरणपरिणामविशे
षत्वात्तद्धर्मा एव नत्वात्मधर्मौ अयं रागोऽयं द्वेष इति इदं सुखमिदं दुःखमिति ज्ञायमानत्वात्सुखदुःखेच्छाद्वेषप्रयत्नधर्मा
धर्मादीनामात्मधर्मत्वे ज्ञेयत्वानुपपत्तेः ज्ञायंते हि घटवत्सुखदुःखेच्छादयो धर्मास्ततस्तेषां रूपवदनात्मधर्मत्वमेव यथा
द्यापितार्किकैः सुखदुःखादय आत्मधर्मा इत्युररीकृतं तदाप्यात्मनोऽतःकरणस्यैव धर्माः न तु प्रतीचः निरवयवसा
वयवयोः संयोगसमवायान्यतरासंभवात्तयोरयुतसिद्धत्वाभावाच्च न ह्यात्मा गुणी भवति केवलो निर्गुणश्चेति श्रुतेः

५६

महत् दुःखं मलमूत्रमध्येवस्थानं तद्रसपानं च दोषः जन्मनि प्रसववायुना कर्षणं योनियंत्रनिःपीडनं मह
त् दुःखं बहिराऽऽगमनं दोषः मरणे सर्वनाड्याकर्षणं मर्मकृंतनं प्राणाऽऽकुंचनं मूर्छा श्वासो मरणं तापश्च
महत् दुःखं याम्याकर्षणेन यमपथ्यया च मलजलपातादि दोषः मस्तु पदेन तत्सन्निकृष्टो नरकवासोपि गृह्यते
कुंभीपाकरौरवाऽसिपत्रवनवैतरण्यादिषु यातनापातनं महद् दुःखं श्लेष्मरक्तपूर्णे मलमूत्रहृदे पुवासः म
हद् दुःखं श्लेष्मादिपानं दोषश्च जरायां सर्वगात्रशैथिल्यं मांद्यं बाधिर्यं गद्गदकंपादिकं बुद्ध्यानादौ पतनं स्व
जनपरिभवश्च महद् दुःखं मलजलत्वाऽन्नापातश्च दोषः व्याधिषु दौर्बल्यं शीतज्वरादिवेगपरितापादिकं कषा
यपानादिकं महद् दुःखं देहदौर्गंध्यं स्वेदादिर्दोषः एवं जन्मादिषु पुनः पुनः दुःखदोषानुदर्शनेन विवेकिनः पुरुष
शीलस्य सर्वेन्द्रियवैराग्यं मोक्षेच्छा च तत्सिद्ध्यै प्रवृत्तिश्च सिध्यत्यत एतद्दर्शनं मुमुक्षोः सम्यक्कर्त्तव्यमि
त्यर्थः ८ जन्मादिषु दुःखदोषदर्शनस्य फलमाह ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादि
षु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥ असक्तिः सक्तिर्भोगेषु तत्करणस्य संगस्तदभावोऽसक्तिः
अप्राप्तस्व प्राप्ते वस्तुनि सर्वत्र विषयमात्रे प्रीतिराहित्यमसक्तिशब्दार्थः अनभिष्वंगः नाभिष्वंगोऽनभिष्वंगः स
मीचीनत्वबुध्या ममतया चाजस्रमिष्टविषयमालिंग्य चित्तस्यावस्थानमभिष्वंगः तदभावोऽनभिष्वंगः
मुमुक्षोर्गुणस्तु संपाद्यः कुत्रेत्याकांक्षायामाह पुत्रदारगृहादिषु आदिशब्देन धनक्षेत्रादि गृह्यते तेषु चित्ता
स्यासंगतानकर्त्तव्येत्यर्थः ननु अनभिष्वंगः पुत्रदारगृहादिषु इत्यनेन गृहस्थानामेव श्रवणाद्यधिकारो न तु
यतीनामितरेषां च तेषामधिकारित्वे पुत्रादिषु अभिष्वंगो न कर्त्तव्य इति व्यतिरेकेणानिषेधायोगात् सत्त्वे वपु

महिंसा भूतदयैकलभ्या ब्रह्मचर्यादीनामपि मुपलक्षणं चिंताविलापराहित्येनाध्यात्मिकादुप-
द्रवसहनं क्षांतिः स्वधर्मे मनोवाक्कायप्रवृत्तेः सदैकरूपत्वमार्जवं आचार्योपासनं ज्ञानोपदेष्टुरा-
चार्यस्य श्रद्धाभक्तिभ्यां शुश्रूषादिक्रियया ऽऽराधनमुपासनं शौचं द्विविधं बाह्यमाभ्यंतरं च बाह्यं मृज्ज-
लाभ्यां अस्पृश्यास्पर्शस्य ऽग्राह्यत्यागेन च आभ्यंतरं रागद्वेषलोभमोहगर्वकार्पण्यादिमलानां त-
त्प्रतिकूलसद्गुणावष्टंभेन क्षालनमंतःशौचं आत्मनोऽन्तःकरणस्य विषयभोगवासनायस्तस्य विषय-
ध्यानप्रवणादर्शनाद्दो सुतरां प्रवृत्तिनिरोधः आत्मविनिग्रहः निगृहीतस्य मनसो नैश्चल्येन मोक्षेच्छया
प्रवणादावेव स्थापनं स्थैर्यम् ७ स्थैर्यसिद्धेः साधनमाह ॥ इंद्रियार्थेषु वैराग्यमनहंका-
र एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं २ इंद्रियार्थेषु शब्दादिषु भोग्यपदार्थेषु तेषु श्रुते-
षु दृष्टेषु च सर्वत्र वैराग्यं नाम निःशेषरागत्याग एव मनोनिग्रहहेतुत्वे नैश्चल्ये च कारणं यतेरिदमेव सम्य-
क्संपादनीयं तथैवानहंकारश्च जातिवर्णाश्रमाचारविद्याकुलशीलादिभिः श्रेष्ठत्वाभिमानोऽहं-
कारः जात्यादिष्वहंकारहेतुषु सत्स्वपि वंधत्वमनुध्यातद्रहितत्वमनहंकारः अयमेव ज्ञानसिद्धेर्मुख्यकारण-
मिति निश्चयार्थ एवकारः चकारः समुच्चयार्थः सर्वत्र वैराग्यसंजनने तत्कार्यनिष्पत्तौ च परमकारणं जन्म-
मृत्युजराव्याधिदुःखदोषानुदर्शनमेवं जन्मनि मृत्यौ जरायां व्याधिषु दुःखस्य दोषस्य चानुदर्शनं शास्त्रे
स्वानुभवं चानुसृत्यालोचनं जन्मपदेन तत्संनिहितो गर्भवासोऽपि गृह्यते गर्भे नवमासं पिंडीभूत्वावस्था-
नं मलक्रिमिदंशनं मातुर्जठराग्निदहनं तदीयविषमशयनगमनादिना घट्टनं सुदृढं जरायुवेष्टनादि

यान्पुंसः संगस्तेषूपजायत इति विद्ध्येनमिह वैरिणमिति ज्ञानिनो नित्यवैरिणेति च कामसंकल्पादिविकारवतोऽ
१० नादिदुर्वासनावासितान्तःकरणस्य दुर्धर्षत्वं दुर्निग्रहत्वं बंधकत्वं विषयस्मृतिमात्रेणानर्थकारित्वं ज्ञानिषुव
द्वैरित्वं च श्रूयते स्मर्यते च ततः संन्यासिनामपि त्यक्तेषु तेषु तेषु दुर्वासनया क्वचिदभिष्वंगास्तद्वार्त्ताश्रवणा
दिभिः प्रसज्यते यथा विद्यमानेषु तुच्छेष्वपि कौपीनकंथादिष्विदं समीचीनमिदमसमीचीनमिति सक्तिः तथा
19 ततस्तत्र स्वयं प्रमादेनापि न कर्त्तव्यमिति व्यतिरेकमुखेनोपदिश्यते असक्तिरनभिष्वंगः पुत्रदारगृहादिष्वि
ति गृहस्थानामधिकारित्वेऽपि इदं विशेषणमनुपपन्नं नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु इति इष्टानि
ष्टोपपत्तिषु इष्टं सुखं तत्साधनं च अनिष्टं दुःखं तत्साधनं च तेषामुपपत्तिषु संप्राप्तिषु नित्यं सर्वदा समचि
त्तत्वं समं हर्षविषादमुखविकासवैवर्ण्यादिबाह्याभ्यंतरविकारनिर्मुक्तं चित्तं यस्य विदुषस्तस्य भावः समचि
त्तत्वमविक्रियात्मनाऽवस्थानं न संसारिणामुपपद्यते न हि पुत्रोत्पत्तौ हर्षं वारयितुं शक्यते नापि तन्मरणे वि
षादादिश्च ततो नैवैषामत्राधिकार इति सिद्धं ॥ ९ ॥ किंच ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥ अनन्ययोगेन न विद्यते परमेश्वरादन्यः शरणं ममेत्येवं निश्चयल
क्षणस्त्वनन्यः योगो भक्तियोगः अनन्यश्चासौ योगश्चेति तेनानन्ययोगेन मयि सर्वेश्वरे सर्वलोकशरणे सर्वा
त्मन्यऽव्यभिचारिणी नियता भक्तिर्भजनं च ज्ञानसाधनं मत्प्रसादैकलभ्यत्वात् ज्ञानस्यातो मदेकशरणेन
मुमुक्षुणा मद्भजनं सर्वदा कर्त्तव्यमित्यर्थः यद्वा विविक्तदेशसेवित्वमितिवचनसामर्थ्यादयमर्थः अन १०

त्रादिष्वभिष्वंगः प्रसज्यते प्रसक्तस्यैव निषेधो युक्तो न त्वऽप्रसक्तस्य नहि नाऽनलं पिबेदिति निषेध उपयुज्यते ततः ।
प्रसक्तप्रतिषेधबलात् गृहस्थानामेव श्रवणाद्यधिकारो नाश्रमांतरनिष्ठानामिति चेत् भवानत्र प्रष्टव्यः गृही ।
णां वेदांतश्रवणं मोक्षाय वा उत स्वर्गलाभाय वा विज्ञासार्थं वेति नाद्यः साधनानुपपत्तौ साध्याऽसिद्धेः श्रवण
स्य व्यंगत्वेन तत्साध्यज्ञानसिद्ध्यऽसंभवात् मोक्षाभावः संन्यस्य श्रवणं कुर्यादिति संन्यासस्य श्रवणांगत्वं स्मर्यते
अथाऽतो ब्रह्मजिज्ञासेत्यत्राप्यथशब्दस्य संन्यासादिसाधनसिद्ध्यनंतरमेव जिज्ञासा कर्त्तव्येत्यानंतर्यार्थकत्वं क
थ्यते ततः संन्यासाद्यंतरंगसाधनशून्यानां गृहिणामेव श्रवणानधिकारो ननु मोक्षेच्छया संन्यस्तसर्वकर्मणां तत्सा
धनानां यतीनां ब्रह्मात्मैकत्वविज्ञानं वेदांतश्रवणादिना जायते परमहंसस्यैव तत्र मुख्याधिकारिणः नाश्रमांतरनिष्ठ
स्येत्यंगशून्यानां कृतेपि श्रवणे ज्ञानानुत्पत्तिस्मरणात् ततो यतीनामेव परमहंसानां श्रवणाधिकारो ज्ञानतत्फलप्रा
प्त्यधिकारश्च वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोकेषु परांतकाले परामृ
तात्परिमुच्यंति सर्वे इति श्रुतेः न द्वितीयः निरंतरविक्षेपवतां संसारिणां यथावत्स्वर्गलाभासिद्धेः नापि तृतीयः श्रव्यका
व्यनाटकादिवदत्र चमत्काराभावात् यत एवं ततो यतीनामेव श्रवणादियोग्यत्वमिति सिद्धं ननु मोक्षेच्छया संन्य
स्तसर्वकर्मणां यतीनामेव श्रवणाधिकारित्वे पुत्रदारादिष्वभिष्वंगो न कर्त्तव्य इति निषेधवचनस्याऽऽनर्थक्य
मिति चेन्न तेषामपि पूर्ववासनया त्यक्तेष्वपि पुत्रदारादिष्वभिष्वंगप्रसंगात्तन्निषेधपरत्वोपपत्तेः मनसो वशे सर्व
मिदं बभूव भीष्मो हि देवः सहसः सहीयानिति वं ध्यायविषयासक्तमिति प्रमाथि बलवद्दृढमिति ध्यायतो विष

अत एव तस्मादमानित्वादिलक्षणात् ज्ञानसाधनादन्यद्यावदन्यद्विपरीतं मानित्वदंभित्वहिंसाऽक्षान्त्यनार्जवादिकं रजस्तमोगु
णजातं सर्वमज्ञानमज्ञानवृद्धिसाधनं संसारकारणं ज्ञानप्रतिबंधकं च ततो मानित्वादिकं [illegible] सम्यक् ज्ञातव्यं ज्ञात्वा मुमु
११ क्षुभिः सम्यक् परिहरणीयमित्यर्थः ११ एवं ज्ञानोत्पत्तिसहकारिकारणसामग्रीममानित्वादिलक्षणां निरूप्य निरुक्तसाधनसं
पत्त्याहितेन श्रवणादिना समुत्पन्नज्ञानस्य यज्ज्ञातव्यं वस्तु [illegible] निरूपयति॥ ज्ञेयं यत्तत्प्र
वक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते १२ मुमुक्षोः कृतश्रवणस्य तदुत्पन्नज्ञानवतो यत्तेयंतज्ज्ञे
यं श्रीगुरोर्मुखात् यत् ज्ञातव्यं वस्तु तत्प्रवक्ष्यामि प्रवक्ष्यामि ननु तज्ज्ञानेन किमस्माकमित्यत आह यदिति तत्त्वमस्या
२० दिवाक्यार्थविचारजन्यज्ञानेन यद्वस्तु ज्ञात्वाऽमृतं वक्ष्यमाणलक्षणं परं ब्रह्माश्नुते एतदमृतमभयमेतद्ब्रह्मेति श्रव
णात् अमृतं ब्रह्म विद्वान् प्राप्नोति ब्रह्मविदाप्नोति परमिति श्रुतेः एवं फलवादेन श्रोतारमभिमुखीकृत्य यत्प्रतिज्ञातं
क्षु प्रवक्ष्यामीति तत्प्रतिपादयति अनादीति मुमुक्षूणां ज्ञातव्यं तद्ब्रह्म अनादिमत् आदिः कारणं जन्म वा यस्यास्तीति तदादिम
त्कार्यं महदादिस्थूलान्तं स्वयं ततो विलक्षणत्वात् ब्रह्म अनादिमत् सर्वस्मादधिकारणत्वात् तदन्यादित्यर्थः अनादिमत्त्वम
क्षरत्वान्मूलप्रकृतेरविकृतेरव्याकृतस्याप्यस्तीति ततो व्यावर्तयितुं विशेषणं परमिति निरवयवत्वेन नित्यकूटस्था
संगचिद्रूपत्वेन नत्वेनान्तरत्वेन परममहत्त्वेन च ब्रह्म स्वयमव्यक्तात्परमन्यदेव अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः
पर इति श्रुतेरनादिमत्त्वात्परत्वाच्च ब्रह्म व्यक्ताऽव्यक्ताभ्यां कार्यकारणाभ्यामन्यदेवेति सिद्धं अन्यदेव तद्विदितादथो
अविदितादधीति श्रुतेः ननु तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् स च यो यत्प्रभावश्च तत्समासेन मे शृणु इति क्षे
त्रक्षेत्रज्ञयोर्याथात्म्यं प्रतिपादनमुपक्रम्य महाभूतानीत्यादिना क्षेत्रस्वरूपं प्रतिपादितं ततः क्षेत्रज्ञस्य स्वरूपे प्रति ११

न्ययोगेनअन्योविजातीयप्रत्ययोनविद्यतेयत्रसोऽनन्यःयोगःसमाधिरनन्यश्चासौयोगश्चतेनानन्ययोगेनसजातीयप्रत्ययावृत्ति
लक्षणेनमयिमांनिर्विशेषंपरंब्रह्मविषयीकृत्यब्रह्मैवाहमहमेवब्रह्मेतिभक्तिर्भजनंअनुसंधानंसर्वदाकरणीयंज्ञान
स्याप्रतिबंधकत्वसिद्धिकारणत्वात्ज्ञानमित्युच्यते किंच विविक्तदेशसेवित्वं विविक्तान्जनसंमर्दरहितान् नदीपु
ह
लिनगिरिकुहरारामारण्याद्येकांतप्रदेशान्निदिध्यासासमाध्यर्थंसेवितुंशीलमस्यास्तीतिविविक्तदेशसेवीशून्यागारेदेवता
गृहेतृणकूटेवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदरकोटरनिर्झरस्थंडिलेषुनिकेतवासी
तिस्मृतेःतस्यभावोविविक्तदेशसेवित्वं जनसंसदिजनानांबहिर्मुखानांसंसदिसंघातेवसितुमरतिररुचिश्च ॥१०॥

अध्यात्मज्ञाननित्यत्वंतत्वज्ञानार्थदर्शनं एतद्ज्ञानमितिप्रोक्तमज्ञानंयदतोऽन्यथा ११ आत्मावाइदमेकएवाग्र
आसीत्आत्मैवेदमग्रआसीत्पुरुषविधःआत्मावाअरेद्रष्टव्यइत्यादिनाआत्मानमधिकृत्यप्रवृत्तमध्यात्मं ज्ञाप्यतेआ
त्मतत्वमनेनेतिज्ञानमध्यात्मंचतत्ज्ञानंचाध्यात्मज्ञानंवेदांतशास्त्रंतत्रनित्यत्वंनिरतत्वंतदेकपरायणत्वमेवज्ञानोत्पत्तेर्मुख्य
साधनंततएवज्ञानमित्युक्तं तत्वज्ञानार्थदर्शनंतत्वज्ञानस्यार्थःफलरूपोमोक्षस्तस्य दर्शनंतत्सिद्धिप्रक्रियालोचनंच
मोक्षःखलुब्रह्मात्मनावस्थानंसश्रवणेनमननेनवामननेनवानिदिध्यासनयावासमाधिनावासर्वकामपरमोकेनवान्य
प्यावातत्सिध्यतीतियुक्त्यास्वानुभूत्याचज्ञानयोग्यस्यसिद्धिसाधनसंपत्तिमालोच्यस्वाधिकारानुरूपंतत्साधनंक्रमेणास
मनुतिष्ठेदितिबोधयतितत्वज्ञानार्थदर्शनमितिभगवान् ततोमोक्षैककामस्ययतेरमानित्वादिज्ञानसाधनंप्रयत्नेन
संपादनीयंयत्सिध्याज्ञानंसिध्यतिज्ञानसिध्यैवमोक्षोयतःनिरुक्तमंतरंगसाधनंज्ञानस्योपसंहरति एतदिति अमानित्व

मारभ्यतत्वज्ञानार्थदर्शनांतंयदुक्तंतदेतद्विंशतिसंख्याकंज्ञानसाधनंज्ञानोत्पत्तिकारणत्वात् ज्ञानमितिमहर्षिभिःप्रोक्तं

गी॰ तां॰ प॰

द्विकमस्ति अग्राह्यमगोत्रमवर्णमस्पर्शमरूपमिति च श्रुतेः नापि चक्षुर्दृश्यत्वं अदृश्यमव्यवहार्यमिति श्रुतेः यतस्ततो
ब्रह्म महदादिसर्वविकारजाताद्भिन्नमेवेत्यर्थः एवं न सत्तदिति कार्यस्य ब्रह्मत्वं निषिध्य कारणस्यापि तद्भावं निषेधय
ति नासदुच्यत इति सद्भिन्नसगुणं यदव्याकृतं तद्ब्रह्म न भवति सावयवत्वात् जडत्वाच्च बीजवत् कार्यस्य सावयवत्वा
दिधर्मवैशिष्ट्यदर्शनात् कारणस्यापि तद्धर्मवैशिष्ट्यं युक्तं मृदादिषु तद्दर्शनात् कारणगुणाद्धि कार्यगुणाना
रंभ इति न्यायाच्च यत्सावयवं तद्विकारि तदनित्यमित्यनित्यत्वाच्च ज्ञेयत्वाज्जडत्वमहमज्ञ इत्यव्यक्तस्य ज्ञेयत्वस्य
दृष्टं तद्भिन्नं सगुणमेव परं ब्रह्म न हि ब्रह्मणः सावयवत्वमस्ति निष्कलं निष्क्रियमिति श्रुतेः नापि जडत्वं यादृश्चे
तेति श्रुतेः नापि च ज्ञेयत्वं स वेत्ति वेद्यं न च तस्यास्ति वेत्तेति श्रुतेः ननु सदसच्छब्दवाच्ययोर्व्यक्ताव्यक्तयोः कार्यका
रणयोरुभयोरपि ब्रह्मत्वेन निषिध्यमाने तदभावं विना तन्निषेधावधितयास्थितं वस्तु यत्किंचिन्न पश्यामः तत
ज्ञेयं शास्त्रार्थोऽप्रामाणिक एवेति चेद्भवानत्र प्रष्टव्यः तयोर्निषेधावधिभूतोऽभावः सन्वा किमसन्वा उताभय
विधो वा स स्वयं तत एव भाति वा उत परतो वेति नाद्यः तस्य सद्भावेन सदन्तःपातित्वात् न सदिति निषेधे सति पुनः
स्वनिषेधावधित्वानुपपत्तेः न द्वितीयः स्वतःसत्तारहितस्य तस्याऽसतः शशविषाणवत् शून्यत्वान्निषेधावधि
त्वासंभवात् न तृतीयः सत्त्वासत्त्वयोः परस्परविरुद्धयोः एकाधिकरणत्वानुपपत्तावेकस्य तदुभयासिद्धेरभावोऽस्ति
इत्यभावस्यास्तिमत्वे सत्तावत्त्वेन भावत्वादभावोऽस्तीति निर्देशोऽनुपपन्न एव अयमस्तीति प्रत्यक्षेण निर्देशोऽभा
वस्यैव न त्वऽभावस्य युज्यते विषयविषयिणोरन्योन्याऽवयवसंयोगाऽभावात् सत्येवान्योन्यावयवसंयोगे घटा
देर्विषयत्वं दृष्टं नासतो योऽस्ति मानं च वस्तु विषयस्य भाव एव न त्वभावः अस्तिमत्वाऽभावत्वयोरेकाधिकरणा

पादितत्वेऽतत्त्स्वत्काऽनुपक्रांतमनादिमत्परंब्रह्मेतिकथमनुपक्रांतंब्रह्मस्वरूपंप्रतिपादितेनोपक्रमविरोधः
स्यादितिचेन्नतयोरभेदावधारणाद्विरोधानुपपत्तेः नायंहंतिनहन्यतइतिदेहेत्तस्यात्मनोऽविक्रियत्वंबोध
यितुमुपक्रम्य तदेवनजायतइत्यादिनाविस्पष्टीकृत्य नित्यःसर्वगतइतिनिरस्तरूपस्यासंगचिद्रूपत्वंव्याप
कत्वंचप्रतिबोध्य येनभूतान्यशेषेणेतिब्रह्माभिन्नत्वंसूचयित्वाभोक्तारंयज्ञतपसामितिसर्वभूतस्थमात्मानंयो
मांपश्यतिसर्वत्रेतिचतयोरेकत्वमेवानुभाव्यज्ञानीत्वात्मैवमेमतमितिकंवरवेणैवमेवोत्क्राम्यतिस्मृतिकोटि
प्रसिद्धमुक्तमेवब्रह्मात्मैक्यंक्षेत्रज्ञंचापिमांविद्धीति सुविस्पष्टतरंप्रतिपाद्यभगवताक्षेत्रज्ञएवब्रह्मब्रह्मैवक्षे
त्रज्ञइतितयोरभेदएवमूढैरप्यारूढेप्यसर्वैस्तीतव्यइति सचयोयत्प्रभावश्चतत्समासेनमेशृणुवितिज्ञेयत्वेनो
पक्रांतमेवक्षेत्रज्ञंविधेयप्राधान्येननपुंसकलिंगेनज्ञेयंयत्तत्प्रवक्ष्यामीतिपरामृश्यतद्याथात्म्यंबोधयितुमन
नादिमत्परंब्रह्मेत्युक्तं तेनक्षेत्रज्ञब्रह्मशब्दयोरर्थएकएवेत्युपक्रांतोपपादितवाक्यार्थविवेकज्ञाननिपु
णैर्विद्वद्भिर्ज्ञातव्यइतिसिद्धं एवमनादिमत्परंब्रह्मेतिब्रह्मणःसर्वद्वैतप्रपंचेलक्षणंसूचयित्वा सचयोयत्प्रभा
वश्चेत्यत्रयच्छब्दविवक्षितंतद्याथात्म्यंनेतिनेतीत्यात्मागम्यत्वोनद्विगम्यतइति श्रुत्यातत्त्वादेशोनेतिनेतीत्यादि
श्रुत्यात्मत्वमनुसृत्यातन्निषेधद्वाराबोधयितुमाह नसत्तन्नासदुच्यतइति यदिदमिदमितिनामरूपक्रिया
जातिगुणाविशेषैर्निर्दिष्टुमर्हतितदभिव्यक्तनामरूपादिविशेषंमहदादिकार्यजातंसर्वंसदित्युच्यतेतद्भिन्नदे
शात्वात्तत्कारणमव्यक्तमसदित्युच्यते निरूक्तलक्षणंसत्ब्रह्मनभवति जनिमत्त्वात्नामरूपादिमत्त्वात
दृश्यत्वाच्चघटवत् तद्भिन्नदेशात्वात्ब्रह्मणः नाद्वब्रह्मणोजनिरस्तिश्रुत्जोनित्यइतिश्रुतेः नापिनामरूपा

गी० टी० लक्षणं सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत्सर्वतोऽक्षिशिरोमुखं श्रक्षिपदमनुक्तानेंद्रियाणांमनोबुद्ध्या
दीनांचोपलक्षणं सर्वतःशिरोग्रहणंदेहानेकत्वसूचनार्थं घटमठादिविशेषणैराकाशोयथातथाब्रह्मादिपि

पीलिकांतदेहविशेषणैर्नामरूपाभ्यांस्वयंविशेष्यतइत्यर्थः सर्वतःश्रुतयःश्रोत्राणियस्यतत्सर्वतःश्रुतिमत्लो
केलोक्यतइतिलोकःप्राणिवर्गःतस्मिन् लोकइतिद्वितीयार्थेसप्तमी लोकंप्राणिसमुदायंप्रकृतिंप्राकृतंचसर्वं
वहिरंतःसर्वतःस्वरूपेणचैतन्येनावृत्यघटमठादिकमाकाशवत्व्याप्यतिष्ठति स्वव्याप्तदेहेंद्रियादिकमयो
यस्कांतश्वचेष्टयतिस्वयंनचलतीत्यर्थः निर्विशेषस्यब्रह्मणइदंपाणिपादादिविशेषणविशिष्टंरूपमौपाधि
४२
कंचनतुस्वाभाविकं स्वाभाविकत्वेनिषेधायोगात् निषिध्यतेहिवैषयिकंरूपंनसत्तन्नासदुच्यतइति तर्हीदम शे
प्रामाणिकमितिचेन्न सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति सर्वें
द्रियगुणाभासंसर्वेंद्रियविवर्जितं सर्वस्यप्रभुमीशानंसर्वस्यशरणंसुहृदित्यादिश्रुतिप्रमाणकत्वादेवंप्रव
रंरूपंव्यवहारेतत्सत्यमेवयदेतदाराध्यतत्प्रसादेनमुमुक्षुर्मुक्तिंगच्छति तदुक्तंच मत्कर्मकृन्मत्परमइति॥
निर्विशेषस्यक्षेत्रज्ञस्यात्मनःसविशेषस्वरूपोपन्यासस्तत्सद्भावद्योतनार्थः सर्वतःपाणिपादादिलक्षणंप्रति
पादितंक्षेत्रंजानातीतिवाक्षेत्रधर्मैःस्वयंज्ञायतइतिवाक्षेत्रज्ञः तथाहि पाणिपादबुद्धींद्रियादयश्चेतनशक्ति
निमित्तस्वव्यापाराःस्वतोजडत्वात्चर्मदारुमयप्रतिमादिवत् देहेंद्रियादयःस्वतोजडाश्चेतनाधिष्ठातृत्वेतबु
द्धिपूर्वकप्रवृत्तिमत्त्वात्रथादिवत् एवंसर्वप्राणिदेहेंद्रियाद्युपाधिभिःज्ञेयस्यब्रह्मणोऽस्तित्वमवगम्यते।
एतदर्थमेवक्षेत्रज्ञस्यात्मनोऽसंगस्यापिपाणिपादादिमत्त्वमौपाधिकंमिथ्याभूतमप्युररीकृत्योच्यतेभगव

त्वायोगात् तदंगीकारेपिनापिचतुर्थः अभावस्यज्ञेयत्वेनजडत्वात्घटस्येववस्तुतोभानाऽसंभवात् तर्ह्यन्यतरएवेतिचे
दभावस्यभासकंवस्तुविद्यतेवानवा नद्वितीयः तदभावेसूर्याभावेघटादिवदभावस्यभानाऽभावप्रसंगात् अस्त्येवे
तिचेत् यदभावस्यभासकंवस्तुतदेवब्रह्मेति ब्रूमः तत्सद्भावेत्वमेवास्माकंप्रमाणंश्रुतिश्च अन्यदेवतद्विदिता
त् अन्यत्रधर्मादन्यत्राधर्मादित्यादिः नप्रकृतिर्नविकृतिःपुरुषइति सुषुप्तवच्छून्यवदप्रतर्क्यंतन्नलभूतंपदमा
मनंतीत्यादिस्मृतयश्च यस्माद्दृश्येऽनात्म्यइति अस्थूलमनण्वित्यादिश्रुतिभिरध्यस्ताशेषविशेषनिषेधेनैव
ब्रह्माधिगमितत्वात्तदिदंज्ञेयंसर्वश्रुतिप्रसिद्धंप्रामाणिकमेवतस्मात्सदसतोभिन्नंतन्निषेधावधिभूतंत
दभावभासकंनिर्विशेषंनित्यशुद्धबुद्धमुक्तसत्यपरमानंदाद्वितीयमेवपरंब्रह्म इदमेवाहमस्मीतिमुमु
क्षुभिःस्वात्मनाज्ञातव्यंवस्तुनतुसन्नाप्यसच्चेतिसिद्धं १२ एवंसचयोयत्प्रभावश्चेत्यत्रपञ्चभिर्विवक्षि
तंक्षेत्रज्ञस्यात्मनोनैजंतत्त्वंप्रकृतिप्राकृतविलक्षणंयतिर्विदेहमुक्त्यैस्वात्मनाज्ञातव्यमितिनिरूप्या
धुनासर्वश्रुतिप्रसिद्धस्यापिब्रह्मणोविदिताविदितान्यत्वेनपरोक्षत्वात्तत्सद्भावस्यसंदिग्धत्वेयत्सन्नि
धिमात्रेणदेहेन्द्रियादयश्चेष्टंतेतच्चेष्टाकारणंब्रह्मेतियुक्त्यातत्सत्त्वमनुमीयज्ञातुंशक्यतइतिबोधयि
तुंक्षेत्रज्ञस्ययत्प्रभावश्चेतिविशेषणविवक्षितंसर्वप्राणिकरणोपाधिमत्त्वलक्षणंविशेषितंरूपं।
श्रुतिप्रसिद्धंप्रतिपादयति ॥ सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लो
केसर्वमावृत्यतिष्ठति १३ यत्ज्ञेयत्वेनोपक्रांतमनादिमत्त्वादिलक्षणंतद्ब्रह्मसर्वतःपाणिपादं सर्वतः
पाणयःपादाश्चसर्वप्राणिसंबंधिनो यस्यतत्सर्वतःपाणिपादं पाणिपादवदमनुक्तकर्मेंद्रियाणामुप

नः स्वतः श्रवणादिरहितत्वेप्युपाधिद्वारा श्रवणादिक्रियावत्त्वं श्रूयते तत्कथं श्रवणादिव्यापाराभाव उच्यत इति चेन्न ॥
श्रुतेस्तत्रतात्पर्याभावात् वशी सर्वस्य लोकस्य स्थावरस्य चरस्य चेति ईश्वरस्य वशित्वं सर्वलोकनिग्रहानुग्रहका
१४ रित्वं तेन देहेंद्रियादिवैशिष्ट्येनाप्येतत्सहितं प्रतिपादयति श्रुतिः नतु परमात्मनः क्रियावत्त्वं तथात्वे निष्कलं निष्क्रि
यं वृक्ष इव स्तब्धो दिवि तिष्ठति स्थाणुरचलोयं सनातनः सर्वमावृत्य तिष्ठतीत्यादिश्रुतिस्मृतिविरोधप्रसंगात्
ततश्चात्मा देहे चलिते आकाशवदुपाधौ चलति सति चलतीव भाति न तु स्वयं चलति निरवयवत्वात् पूर्ण
त्वान्निराकारत्वान्निरिंद्रियत्वाच्च तत एवात्मनः सद्भावाधिगमायांगीकृतोपाधिसंबंधराहित्यमेव बोधयितु
23 माह सर्वेंद्रियविवर्जितमिति सर्वैरुक्तैरिंद्रियैस्तदाश्रयेणाचतत्कृतैः पुण्यपापादिकर्मभिरपि वर्जितं रहित
मित्यर्थः आत्मनो देहेंद्रियादिसंबंधासिद्धेर्हेतुमाह असक्तमिति निरवयवत्वात् येन केनापि संयोगादिसंबंधवर्जि गा
तमसंगमित्यर्थः असंगो ह्ययं पुरुष इति श्रुतेः सर्वेंद्रियविवर्जितमित्युक्त्या त्वात्मनो देहेंद्रियादयः संति किंत्वसं
संगत्वात्तैर्वर्जित इति प्राप्ते तत्सद्भावमप्यपनुदति निर्गुणमिति गुणा गुणकार्यभूता देहेंद्रियादयस्तै रहितत्वा
न्निर्गुणं यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्ममिति अश
रीरं शरीरेषु अशरीरो निरिंद्रियोऽप्राणोऽमनाः सच्चिदानंदमात्र इत्यादिश्रुतेः एतेन सर्वतः पाणिपादमिति ब्रह्मणः
सत्त्वाधिगमायैव पाणिपादाद्युपाध्युपन्यासो न तु स्वरूपाधिगमायेति सूचितं तथात्वे निर्गुणमिति निषेधानुपप
त्तेः यद्वा निर्गुणं गुणरहितं सतः केवलस्य गुणाऽनभ्युपगमात् न हि ब्रह्मणः सत्त्वादयो रूपादयो वा सुखादयो
वा यद्योगात् स्वयं गुणी स्यात् सत्त्वादिभिर्गुणित्वे गुणनाशात् गुणिनोपि नाश इति नाशः प्रसज्येत गुणिनो नित्य १४

तामुमुक्षूणां स्वतत्त्वाभिगमाय शाखाग्रे चंद्र इतिवत् ततस्तदेव पारमार्थिकं रूपं यन्न सत्तन्नासदुच्यत इत्युक्तं एतेन
सर्वक्षेत्रेषु परस्परभिन्नेषु क्षेत्रज्ञस्यात्मन एकत्वं स्वसन्निधिमात्रेण तत्तद्देहेंद्रियादिप्रवृत्तिनिमित्तत्वं प्रवर्त्तकत्वेन प्र
वर्त्येभ्यस्तेभ्यो भिन्नत्वं निरवयवत्वं नित्यत्वं चेतनत्वमसंसारित्वं पूर्णत्वं च बोधितं भवति १३ ननु तर्हि क्षेत्रज्ञस्येश्व
रत्वं प्राप्तमिति चेत्तदर्थमेव खलु गीताशास्त्रारंभः यस्मात् क्षेत्रज्ञं चापि मां विद्धीति बोधयति क्षेत्रज्ञमेवं लक्षणासं
पत्तिमेव प्रतिपादयति चतुर्भिः श्लोकैः ❁ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं असक्तं सर्वभृच्चैव
निर्गुणं गुणभोक्तृ च १४ स्वस्वविषयान् शब्दादीन् इंधयंति बोधयंतीतींद्रियाणि सर्वाणि श्रोत्रादीनि वागादीनि बाह्या
न्यंतरिंद्रियं मनश्च आत्मोपाधित्वाविशेषात् बुद्धिश्चाध्यवसायलक्षणा एतेषामिंद्रियाणां गुणाः स्पष्टत्वास्पष्टत्व
दुष्टत्वादुष्टत्वादयः श्रवणस्पर्शनवचनादानसंकल्पाध्यवसायादयोऽवभासंते येन तत्सर्वेंद्रियगुणाभासं बु
द्ध्यादयः स्वाऽन्यप्राप्तप्रकाशाः स्वतो जडत्वात् तप्तायःपिंडवत् बुद्ध्यादयो जडाः ज्ञेयत्वात् घटादिवदिति बुद्ध्यादी
नां तद्गुणानां यस्तु प्रकाशकं ज्ञातृ तत् क्षेत्रज्ञत्वमवगंतुं शक्यते यद्वा सर्वेंद्रियगुणैः श्रवणादिभिरवभासत इति सर्वें
द्रियगुणाभासं सर्वेंद्रियाणामधिष्ठातृ प्रयोज्यानि प्रयोज्यकरणत्वाद्वास्यादिवदिति करणक्रियया क्षेत्रज्ञसद्भावोऽधि
गम्यत इत्युक्तं सर्वेंद्रियगुणाभासमिति नन्वसंगस्याक्रियस्यात्मनः कथं करणप्रयोक्तृत्वमिति चेन्न तदात्मन्या
रोपितत्वेऽविरोधानुपपत्तेः यथा पद्मविकासः पद्मधर्मः सूर्ये आरोप्यते पद्मं विकासयति सूर्य इति तथैवैते बा
धिधर्माः श्रवणादिरात्मन्यध्यस्यते आत्मसद्भावाधिगमाय ऽऽत्मा करणानि प्रवर्त्तयतीति तेन तद्व्यापारे व्यापारीव
भाति यथा वृक्षचलनेन नभश्चलतीव ध्यायतीव लेलायतीवेति श्रुतेः पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यात्म

न्हिरयःपिंडमिव सर्वतो व्याप्य स्थितं भवति न तु केनापि परिछिन्नं निरवयवत्वादतिसूक्ष्मत्वाच्चाकाशादिवन्न केना
पि परिछेत्तुं शक्यते नहि निरवयवमतिसूक्ष्मं चाकाशं घटादिभिः परिछेत्तुं शक्यं परमसूक्ष्मत्वेन तेषामविषयत्वा
त् किंतु सर्वं बहिरंतः सर्वतो व्याप्य तिष्ठतीति तद्वत् ब्रह्मापीत्यर्थः तथा च श्रुतिः तदंतरस्य सर्वस्य तदु सर्वस्यास्य
बाह्यतः इति मया ततमिदं सर्वमित्युक्तं च ननु अयःपिंडमग्निवद्भूतानामंतर्बहिश्च व्याप्यावस्थितत्वे नापरिछिन्न
त्वेपि ब्रह्मणस्त्वग्नेरयःपिंडवत् व्याप्यांशो द्वैतभावो विद्यत एव सत्येतस्मिन् कथमद्वैतसिद्धिरित्याशंक्यायान
न् प्राणो ह्येष सर्वभूतैर्विभातीति श्रवणात् ब्रह्मविवर्त्तत्वाज्जगतः पृथक्सत्ताऽभावात् प्रत्यग्द्रष्टा समीक्षमाणो
सर्वं ब्रह्मैवेत्याह अचरमिति यत्तत्क्रियावत्त्वचरं तद्विलक्षणमचरं च स्थावरं जंगमं च सर्वभूताभासं
ब्रह्मैव रजताभासं यथा शुक्तिस्तद्वदित्यर्थः सर्वं ह्येतद्ब्रह्मेति श्रुतेः ननु सर्वात्मकं परिपूर्णमद्वितीयं च ब्रह्म त
र्हि सर्वैरिदमिति गृह्येत तत्कथं न गृह्यत इत्याकांक्षायामाह सूक्ष्मत्वादिति यद्यपि सर्वात्मकं परिपूर्णमद्वि
तीयं च परं ब्रह्म तथापि स्वयमाकाशादप्यतिसूक्ष्मं सूक्ष्मात्सूक्ष्मतरं नित्यमिति श्रुतेः महदव्यक्तादेरपि सू
क्ष्मत्वात्तत् ब्रह्माऽविज्ञेयं स्वात्मभूतमपि श्रुत्याचार्येश्वरात्मप्रसादशून्यैर्नामविशुद्धबुद्धीनां विज्ञातुमशक्य
मेव यथान्धानां स्वरूपं तद्वदिममेवार्थं विस्पष्टयति दूरस्थमिति विवेकवैराग्यशमदमादिनियतसाधनशू
न्यानां कृतश्रवणानामपि मलिनांतरात्मनां स्वरूपमपि तद्ब्रह्म दूरस्थं चक्रवालादतिदूरगतमेव भवति ज
न्मशतकोट्यापि प्राप्तुमशक्यमित्यर्थः यद्विशुद्धबुद्धीनां दूरतरं तदेव ब्रह्मविदनुगृहीतानां प्रशांतात्मनामं
तिके च कारो वधारणार्थः समीप एव हृदये स्वात्मना वगंतुं शक्यमित्यर्थः दूरात्सुदूरे तदिहांतिके च पश्यत्स्विहैव

त्वेन तद्गुणानामपि नित्यत्वमिति चेन्न तन्नित्यत्वे मानाभावात् सत्यकामः सत्यसंकल्प इति श्रुतिरेव मानमिति चे
न्न अत्र सत्यसत्यशब्दस्यामोघार्थकत्वेन नित्यत्वबोधकाभावात् नित्यत्वे सृष्टिकामस्य सर्वदा सृष्टिप्रसंगात् वि
कल्पेन हि वस्त्विति गुणानां गुणकार्याणामप्यवस्तुत्वश्रवणात् नापि च रूपादयः एतद्ब्रह्मस्पर्शमिति ब्रह्म अ
णो रूपाद्यभावश्रवणात् रूपादिमत्त्वे सावयवत्वेनानित्यत्वं प्रसज्येत सुखादयस्तु ज्ञेयत्वेन क्षेत्रधर्मत्वात्
तज्ज्ञातुरात्मनो न संभवंति साक्षी चेता केवलो निर्गुणश्चेति श्रुत्यैव निर्गुणत्वावधारणात् सगुणरहितमेव
परं ब्रह्मेत्यर्थः यद्यपि ब्रह्म स्वयं सत्वादिगुणतत्कार्यशून्यमेव तथापि गुणभोक्तृ च गुणानां सत्वादिगुण
कार्याणां देहेंद्रियादीनां शब्दादीनां सुखादीनां च भोक्तृ उपलब्धृ बुद्ध्यादिसान्निध्यात् ज्ञेयजातं सर्वं जानाती
त्यर्थः उपलब्धृ ब्रह्मेत्युक्त्या ब्रह्मणः प्राप्तं परिच्छिन्नत्वं साद्वितीयत्वं चापनुदति सर्वभृच्चेति स्वस्मिन्नारो
पितं सर्वमव्यक्तादिस्थूलांतं स्वसत्तास्फूर्तिभ्यां सत्तावत् स्फूर्तिमच्च कृत्वा स्वमात्रत्वेन बिभर्तीति सर्वभृत्
प्रपंचे सर्वत्र सदन्वयाच्चिदन्वयाच्च सद्धीदं सर्वं चिद्धीदं सर्वमिति श्रवणाच्च सर्वं ब्रह्मैवेत्यर्थः सत्यं चा
नृतं च सत्यमभवदिति श्रुतेः ततो ब्रह्मव्यतिरिक्तवस्त्वभावात् न ब्रह्मणः परिच्छिन्नत्वं नापि सद्वितीयत्वमि
ति सिद्धं १४ ननु नामरूपात्मकस्य द्वैतप्रपंचस्य सतः पृथक्त्वया प्रत्यक्षेणोपलभ्यमानत्वात्कथं सर्वं ब्रह्मैवेत्या
कांक्षायां न। बहिरंतश्चाग्निना व्याप्तायसः पृथक्सत्ताभावाद्वह्निमात्रमेव यथा तथा बहिरंतश्च ब्रह्मणा व्या
प्तस्य जगतोपि स्वतः सत्ताभावाद्ब्रह्ममात्रत्वमेवेत्याह ॥ बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वा
त्तदविज्ञेयं दूरस्थं चांतिके च तत् १५ यन्मुमुक्षोर्ज्ञेयत्वेनोपक्रांतं तद्ब्रह्म भूतानामव्यक्तादिस्थूलांतानामंतश्च बहिश्च

ब्रह्मण एकत्वं सर्वगतत्वं नित्यत्वमद्वितीयत्वं च नियमेन प्रतिपादयंत्यतोऽविभक्तमेव सर्वप्रकाशकत्वेनाप्य
विभक्तमेव भवति सोरालोकेनाऽविभक्तेनैव खलु विभक्तं घटपटादि भास्यं सर्वं व्याप्य ब्रह्मांडं प्रकाश्यते नतु
विभक्तेन तथात्वे सर्वत्र सर्वेषां सर्वपदार्थस्फुरणासंभवात् तद्वत्तब्रह्मणाप्यविभक्तेनैव बहिरंतश्च स
र्वतो व्याप्तेन स्थूलं सूक्ष्मं चाव्यक्तमहदादिदृश्यं सर्वं प्रकाश्यते परिछिन्नत्वे बाह्यपदार्थभानाभावप्रसंगा
त् भाति हि सर्वत्र सर्वं सर्वस्य तस्य भासा सर्वमिदं विभातीति श्रुतेः ततएवविभक्तमिव च स्थितमित्युक्तं भग
वतापि तेन ब्रह्माऽपरिछिन्नमेवेति सिद्धं ततएव ब्रह्मणोऽपरिछिन्नत्वाद्वितीयत्वसिद्धये जगतो ब्रह्मविव
र्तत्वं सूचयति प्रभविष्णु इति अज्ञानदशायां तदेव ज्ञेयं ब्रह्माध्यात्मादिरूपेण प्रभवितुं रज्जुरिवारोपिताका
रेण प्रत्येतुं शीलमस्यास्तीति प्रभविष्णु भ्रांतानां प्रपंचाकारेण ब्रह्मैव भातीत्यर्थः सत्यं चानृतं च सत्यमभवदिति श्रु
तेः भूतभर्तृ च तदेव ब्रह्म स्वस्मिन्नारोपितानां व्योमादिभूतानां सत्तास्फूर्त्तिप्रदानेन भरणं करोतीति भूतभर्तृ च
भवति स्वस्मिन्नारोपितं सर्वं मूढव्यवहारार्थं बिभर्तीत्यर्थः व्यक्ताव्यक्तं भरते विश्वमीश इति श्रुतेः तदेव ब्र
ह्म ग्रसिष्णु च प्रबोधदशायामधिष्ठानयाथात्म्यसंदर्शनकाले त्वाऽऽरोपितं सर्वं स्वात्मना ग्रसितुं स्वस्मिन्नेवति
रोभावयितुं शीलमस्यास्तीति ग्रसिष्णु च भवति परेऽव्यये सर्व एकीभवंति सर्वे वेदा यत्रैकं भवंतीति श्रवणा
त् रज्जुरिवारोपितं सर्वं स्वात्मनोपसंहृत्य विपरीतभावमुत्सृज्य बोधमयीमविकारितां केवलामद्वैतीं स्वसत्तां भ
जतीत्यर्थः १६ प्रभविष्णुत्वादेर्ब्रह्मलक्षणस्य प्रकृतेरप्यव्याकृतस्य संभवात्तस्या अपि ब्रह्मत्वप्राप्तेः प

स

वनिहितं गुहायामिति श्रुतेः यदुक्तमचरं चरमेव चेति ब्रह्मणः सर्वात्मकत्वं तन्न सर्वत्र तल्लक्षणादर्शनात् जंगमेष्वेव प्रा
णिशरीरेष्वहंममेदमित्यादिवेदनलक्षणं चेतनत्वमवगम्यते न तु स्थावरदेहेषु अतः परिच्छिन्नमेव ब्रह्मेत्याशंकां वारयन् ब्रह्म
णः परिपूर्णस्यैव प्राणिनामंतःकरणोपाधिनिर्मलत्वेषु स्फूर्त्तिर्न तु तदतिरिक्तेषु यथा सर्वगतस्याप्याकाशस्य निर्मलेषु
जलादिष्वेव प्रतिबिंबता यथैवाऽऽतपाग्नेः सर्वगतस्यापि सूर्यकांतेष्वेव स्फुरणं यथा सर्वगतस्यापि रूपस्य चक्षुः
रूपलंभो न त्वन्यत्र नैतावताऽमुष्य परिच्छित्तिः संभवति तथैव ब्रह्मणोऽपि परिच्छिन्नत्वज्ञानं न तत्प्रामाणिकं परिच्छेदे
मानाभावात् अस्त्येव प्रत्यक्षमिति चेन्न प्रादेशमात्रमिदं नीलं नभः इत्यादौ तद्व्यभिचारात् यदल्पं तन्मर्त्यमिति
न्यायेन परिच्छिन्नत्वे त्वऽनित्यत्वप्रसंगात् ततः सत्यं ज्ञानमनंतं ब्रह्मेति श्रवणात् ब्रह्मपूर्णमेवेत्याह ॥ ५
अविभक्तं च भूतेषु विभक्तमिव च स्थितं भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च १६॥ विभक्तेषु नामरूपकरण
क्रियाजातिस्वभावविशेषैः परस्परंभिन्नेषु ब्रह्मादिस्तंबांतेषु प्राणिष्वहमहमित्यहंपदार्थत्वेन प्रतीयमानत्वात्तैः
।विभक्तैः प्राणिशरीरैर्विभक्तमिव स्थितं च भवति तेनैव सांख्या आत्मनोऽसंगचिद्रूपत्वं परस्परभिन्नत्वमने
कत्वं च मन्यंते तेतदसत् श्रुतिन्यायविरोधात् भ्रांतानां घटादिभिराकाशवत् परिच्छिन्नमिव प्रतीयमानमपि
यं स्व तत् ब्रह्म स्वेन रूपेणाविभक्तमेव न तु भूतेर्विभक्तुं शक्यते निरवयवत्वात् अतिसूक्ष्मत्वात् अविषयत्वाच्च तेर्वि
भक्तत्वे सावयवत्वाऽनित्यत्वादिदोषप्रसंगात् सर्वप्रपंचस्फूर्त्यभावप्रसंगाच्च श्रुतिविरोधश्च प्रसज्यते यतः।
एको देवः सर्वभूतेषु गूढः आकाशवत्सर्वगतश्च नित्यः पूर्णा पुरुषेण सर्वं तदेतद्ब्रह्माऽपूर्वमित्यादिश्रुतयो

दादिरहितं नित्यं निरतिशयं स्वप्रकाशमप्राकृतज्योतिस्वरूपं ब्रह्मेत्युपदिष्टं भवति एवं मुमुक्षूणां ज्ञातव्यं ब्रह्म
स्वरूपं न सत्तन्नासदुच्यत इति श्रुतन्निषेधमुखेन बोधयित्वा तदेव साकल्येन ज्योतिषामपि तज्ज्योतिरिति श्रु
प्राकृतज्योतिःस्वरूपं ब्रह्मेत्युपदिष्टम् एवं नैतावन्मात्रोपदेशेन ब्रह्मसाक्षात्कारः सिध्यति विना विशेषोपदेशेने
ति मत्वाऽस्मत्तत्सायार्थतया विद्वद्भिरनुभूयमानं बुद्धिगुहायामव्याकृताकाशे दीप्यमानं बुद्ध्यादिसाक्षि
लक्षणं सर्वांतरं सर्वप्रकाशकं कालत्रयाबाध्यमसंगमविक्रियं प्रत्यग्रूपं यदखंडचैतन्यं तदेव ब्रह्मेति सा
क्षाद्विधिमुखेन बोधयितुमाह ज्ञानमिति बहिरंतःसर्वत्र परिपूर्णं स्वप्रकाशं सर्वप्रकाशकमनाधार
मनाधेयमखंडितमवाङ्मनसगोचरमनाद्यंतं नित्यं कूटस्थं निर्विशेषं नित्यशुद्धं निराभासं यत्केवलं ज्ञा
नं तदेव ब्रह्म मुमुक्षोर्ज्ञेयं तैः स्वात्मनावगंतव्यमित्यर्थः सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्मेति श्रु
तेः ज्ञानं विशुद्धं विमलं विशोकमिति स्मृतेश्च एवं यत्सर्वेंद्रियगुणाभासं यत्सर्वभृत् यद्गुणाभोक्तृ यत्स्थवि
ष्णु यद्भूतभर्तृ यत्प्रभविष्णु यत्तमसः परं यच्च ज्योतिषां ज्योतिस्तद्ब्रह्मेति तटस्थलक्षणेन परोक्षतयोपदिष्टं व
स्तु न एवाऽपरोक्षत्वसिद्धये ज्ञानं ब्रह्मेति स्वरूपलक्षणेन ज्ञातव्यं ब्रह्मोपदिश्य अधुना तदधिगमाय नियतं
साधनं सूचयितुमाह ज्ञानगम्यमिति सदसद्विवेकवैराग्यशमदमसंन्यासामानित्वाद्यंतरंगसाधनसंपत्त्या
ब्रह्मविद्गुरुसन्निधौ नित्यनिरंतरमनुष्ठितश्रवणमनननिदिध्यासाद्यनुष्ठानेन समुत्पन्नमनाद्यविद्या
वासनाजालं संक्षिप्य सर्वविकल्पनिर्मुक्तं यत् ज्ञानं तेनैवैकेन श्रुत्याचार्येश्वरात्मप्रसादसंजातेन गम्यमव
गम्यं ज्ञानेनाधिगम्यं न तु सांख्येन न योगेन न कर्मणा नाप्युपास्त्या चाधिगम्यं भवति किंतु सर्वागिरां स्वारोप

सर्वे शरीरनि

रत्वादिविशेषणैःपरिहरन्ब्रह्मणोऽवगत्यर्थं। स्वरूपंतत्प्राप्तिनियतसाधनंतदुपलब्धिस्थानंचबोधयति ॥
ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितं १७ तत्ज्ञेयंब्रह्मतमसःप्रकृते
रज्ञानाद्वाबीजात्परंभिन्नमेव यतोहमित्यज्ञानंस्वस्मिन्नध्यस्तंप्रत्यग्लक्षणेनब्रह्मणाऽनुभूयते ततोज्ञातृज्ञे
याद्भिन्नमेवभवति ततएवअक्षरात्परतःपरइति आदित्यवर्णंतमसःपरस्तादिति अव्यक्तात्तुपरःपुरुषइ
ग त्यादिश्रुतिभिर्ब्रह्मजैर्बीजात् अज्ञानादव्याकृताद्भिन्नमित्येवोच्यते तमसोभिन्नत्वेब्रह्मणोविशेषणान्त
रमाह ज्योतिरिति हेतुगर्भितमिदंविशेषणं ब्रह्मतमसःप्रकृतेर्भिन्नंज्योतिष्ट्वात् यन्नैवंतन्नैवं यथाघटइ
तिसुषुप्त्यापिब्रह्मणोऽव्याकृतात्भिन्नत्वमेवसिध्यति ज्योतिष्ट्वंप्रकाशस्वरूपत्वंप्रकाशकत्वंवा योजागर
मन्वभूवं यःस्वप्नमद्राक्षं यःसुखमस्वाप्संसोहमस्मीति व्यक्ताव्यक्तप्रकाशकत्वेनात्मनस्तदुभयभिन्नत्वेप्र
त्यक्षं आत्माव्यक्ताव्यक्ताभ्यांकार्यकारणाभ्यांभिन्नः तदुभयसाक्षित्वात् यन्नैवंतन्नैवमित्यनुमानंच अन्यदे
वतद्विदितादित्यादिश्रुतिप्रमाणं ननुसूर्यादेर्बहिरंतर्बुद्ध्यादेश्चाप्यस्तिज्योतिष्ट्वमितरप्रकाशकत्वंकथं।
ब्रह्मणएवेत्याशंकायां नतेषामपिप्रकाशकत्वात् ब्रह्मणोनातिव्याप्तिरित्याह ज्योतिषामिति परप्रकाशका
नामप्यादित्यादीनांबुद्ध्यादीनांचज्योतिषांतद्ब्रह्मज्योतिःप्रकाशकंभवति आत्मज्योतिषैवखलुचैतन्यात्म
केनप्रकाशवंतःसूर्यादयोबुद्ध्यादयश्चतप्तायःपिंडवत्स्वातिरिक्तंप्रकाशयंतिनतुस्वतः येनाऽऽदित्यस्तपति
तेजसाभ्राजसाचेत्यश्रोत्रस्यश्रोत्रंमनसोमनइति तस्यभासासर्वमिदंविभातीतिचश्रुतेः एतेनबहिरंतरयोप्र
काशकानामादित्यादीनांमनोबुद्ध्यादीनांचभौतिकज्योतिषांप्रकाशकमाविर्भावतिरोभावद्वद्वयपरिच्छे

संन्यासश्रमदमाद्यमानित्वादिसाधनसंपन्नोभूत्वाब्रह्मविदनुग्रहात् क्षेत्रक्षेत्रज्ञयोःस्वरूपंसम्यग्विविच्य
क्षेत्रतद्धर्मादीन्परित्यज्यविशुद्धंकेवलंचिन्मात्रंक्षेत्रज्ञलक्षणमेतन्निर्विशेषंपरंब्रह्मइदमेवाहमि
तिस्वात्मनाविज्ञायतत्त्वात्तस्यापत्त्यातत्त्वैवाहंबुद्धिंप्रतिष्ठाप्यब्रह्मविद्यतिमिज्ञावायममद्भक्तएतोभावोमत्
द्भावः केवलंनिर्विशेषब्रह्मात्मनावस्थानलक्षणंतस्मैतदुपपद्यतेपतितेऽस्मिन्नुपाधौपूर्णात्मनातिष्ठतीत्य
र्थः १८ सर्वेषांवेदांतानांगीतायाश्चास्याअर्थोत्रपर्यवसितस्तथापिसप्तमेएतद्योनीनिभूतानीतियत्पराव
रप्रकृत्योःसंसारकारणत्वंतन्मादितत्कारणत्वंचसूचितंतदिदानींकार्यकारणकर्तृत्वेइतियावत्संजा
यतेकिंचित्सत्वंस्थावरजंगममितितिविस्पष्टयितुंक्षेत्रक्षेत्रज्ञयोर्विवेकेकृतेसत्यप्यविदितंप्रकृतिपुरुष
योरनादित्वंविकाराणांगुणानांचप्रकृतिकार्यत्वंक्षेत्रस्यक्षेत्रज्ञेप्रतीयमानसंसारस्यगुणाध्यासमूलकत्वं
संसृतेःप्रकृतिधर्मत्वमात्मनोनिर्विकारत्वमसंगत्वमकर्तृत्वमभोक्तृत्वमसंसारित्वंचविस्पष्टीकर्तुमु
त्तरग्रंथआरभ्यते ॥ प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि विकारांश्चगुणांश्चैवविद्धिप्रकृतिसं
भवान् १९ भिन्नाप्रकृतिरष्टधा अपरेयमितियाप्रतिपादितासर्वविकारकारणमीश्वरस्यशक्तिस्त्रिगुणा
त्मिकामायातांप्रकृतिंपुरुषंचपुरुषस्त्वंऽविद्योपाधिकः क्षेत्रज्ञः प्रकृतिंविद्धिमेपरामित्युक्तलक्षणाः राज्यसंबं
धान्मनुष्यस्यराजत्वंप्रभुत्वंचयथातथाप्रकृतिसंबंधात्क्षेत्रज्ञस्यापिप्रकृतित्वंजीवत्वंचप्रत्यक्त्वेनचेतन
त्वेनप्रकाशकत्वेनचमूलप्रकृतेरुत्कृष्टत्वात्पराप्रकृतिरिसंज्ञांप्राप्तोयःपुरुषस्तंचतावेतौप्रकृतिपुरुषावना
दीनविद्यतेआदिःकारणंवाप्याद्यिमत्वंवाप्राक्कालपरिच्छेदोययोस्तावनादीसर्वस्यादिभूतौस्वयमादिरा

१२

सुखं यथा तथा स्वज्ञानेनैव स्वात्मना ब्रह्म ज्ञातव्यमित्यर्थः मनसैवेदमाप्तव्यमिति च श्रुतेः एवं वस्तुस्वरूपं
तत्प्राप्तिसाधनं चोक्त्वा तदुपलब्धिस्थानमाह हृदीति सर्वस्य ब्रह्मादिस्तंबांतस्य प्राणिजातस्य हृदि हृदये बु
द्धिगुहायामव्याकृताकाशेऽधिष्ठितं सर्वप्राणिनां बुद्धितद्व्यापारतदवस्थासाक्षितयाहमहमित्यहंप
दप्रत्ययार्थत्वेन विशिष्य स्थितं धिष्ठितं तत्र विशिष्योपलभ्यमानं प्रत्यग्रूपं ब्रह्म ज्ञातव्यमित्यर्थः यद्यपि
ब्रह्माकाशवत्सर्वगतं परिपूर्णं तथापि निरवयवत्वान्निराकारत्वादतिसूक्ष्मत्वाच्च सर्वत्र नोपलभ्यते किं
तु सर्वगतोऽप्यातपाग्निः शुद्धस्फटिक इव निर्मलायां बुद्धावेवोपलभ्यते गुहाहितं मणिभिर्गुह्यमानं मावि
स्सन्निहितं गुहाचरमिति च श्रवणात्तत्रस्थं ब्रह्म ज्ञातव्यमित्युच्यते हृदि सर्वस्याधिष्ठितमिति हृच्छब्दवा
च्या बुद्धिरेव ब्रह्मोपलब्धिस्थानमित्यर्थः १७ उपक्रांतमुपसंहरति ॥ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चो
क्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १८ इत्येवं समासतः संक्षेपेणैव क्षेत्रं ज्ञस्यात्मनः क्षेत्रत
द्विकारतद्धर्मतत्कर्मतदवस्थासंबंधापवादेन विशुद्धत्वसिध्यैकप्रयोजनं महाभूतादि धृत्यंतं हेयवस्तुस्व
रूपं तथा ज्ञानं श्रवणमननादिद्वारात्मज्ञानसिध्यैकसाधनममानित्वादिलक्षणं ज्ञेयं चानादिमत्परं ब्रह्मे
त्यादिना ज्ञानमित्यंतेन ग्रंथेन तटस्थस्वरूपलक्षणाभ्यां प्रत्यगभिन्नस्य ब्रह्मणः स्वरूपमप्युक्तं जिज्ञासोर्मुमु
क्षावतः स्वस्वरूपाधिगमाय सम्यक्प्रतिपादितमित्युक्त्वा एवं विशेषणविशिष्ट एवात्राधिकारीत्यधिकारिलक्षणं
वदन्नुक्तलक्षणं ब्रह्म स्वात्मना विदितवतो विदुषस्तद्वेदनस्य फलमाह मद्भक्त इत्यादिना मत्कर्मकृन्मत्परम इ
ति ये तु सर्वाणि कर्माणि इत्याद्युक्तलक्षणलक्षितो यः स मद्भक्तः मद्भजनेनैव पूतांतःकरणः सन् सदसद्विवेक

१९

त्वंयोर्नित्यत्वेनकाचिदनुपपत्तिरस्ति नन्वीश्वरव[illegible]त्प्रकृत्योरपिनित्यत्वेतद्वत आत्मनः कदापिमोक्षोनस्यात्
ब्रह्मणोऽद्वितीयत्वंचनसिध्यति ब्रह्मणस्त्वद्वितीयत्वंतद्विज्ञानवतोमोक्षंचप्रतिपादयतःशास्त्रस्याप्य-
प्रामाण्यंचस्यादितिचेन्न सर्वस्याप्येतस्यमायाकार्यत्वेनसम्यक्ज्ञानदशायांस्वप्नवन्मिथ्यात्वोपप
त्तेः नहिप्रबोधदशायांनिद्रायाः तत्कार्यस्यचसत्यत्वंदृष्टं तद्वन्नसत्तन्नासदुच्यतइत्युक्तरीत्या ॥ तया
ऽप्यात्मविज्ञानदशायांमायातत्कार्ययोरसत्यत्वमेवं जीवेशावाभासेनकरोति मायाचाविद्याचस्वयमेव

२८

भवति मायामात्रमिदंद्वैतं विकल्पोनहिवस्त्विति मायायास्तत्कार्यस्याप्यसत्त्वप्रवणात् ततोब्रह्मणोऽद्वि
तीयत्वंतद्विज्ञानवतोमोक्षस्तत्प्रति[illegible]पादकशास्त्रस्यप्रामाण्यंचसिध्यति यत्रहिद्वैतमिवभवतितदितर
इतरंपश्यतीतिन्यायेनाज्ञानदशायांसर्वमर्थवदेवभवति विवेकदशायांविचार्यमाणेसर्वंमिथ्यैवेतिबोध
यितुंभगवताप्रकृतिपुरुषविवेकआरभ्योच्यते प्रकृतिंपुरुषंचैवविद्ध्यनादीइति प्रकृतिपुरुषावुभाव
प्यनादीनित्याविति विद्धि विजानीहि किंच विकाराःदेहेंद्रियप्राणमनोबुद्ध्यहंकारादयःपञ्चशब्दादयःपञ्च
तन्मात्राण्यपिचैतेसर्वेविकारास्तानेतान् गुणांश्चगुणाःसुखदुःखेच्छाद्वेषलोभमोहकामसंकल्पादयो
येचशमदमादयोयेचपुण्यपापादिलक्षणाइंद्रियव्यापारास्तानेतान्सर्वानपिप्रकृतिसंभवान् प्रकृ
तिस्त्रिगुणात्मिका ॥ व्यक्तशब्दवाच्यां बीजादंकुरस्कंधशाखापत्रपुष्पफलादिवत्तस्याःसकाशादेवसमु
त्पन्नान् विद्धि नत्वात्मसंभवान् निरवयवत्वादसंगत्वादविक्रियत्वाच्चात्मनः ततःकस्याप्युत्पत्त्यनुपप
त्तेः किंतुभोक्तृ ॥ दृष्टवशान्प्रकृतिः स्वयमेवगुणवैषम्यंप्राप्यमहदादिविकारात्मनागुणात्मनाचपरिणा १९

स्येश्वरत्वं

द्धितावेवेत्येवकारात्तयोरपीश्वरवन्नित्यत्वावधारणार्थः नित्यं हीश्वरत्वं तच्चेशितव्यापेक्षमीशेशितव्ययो
नित्यत्वे सत्येवेश्वरस्येश्वरत्वं नित्यं स्यान्नान्यथा ननु न क्षेत्रान्तरयोगेनार्कस्येव क्षेत्रित्ववत्स्वकृतेरनित्यत्वे
सर्गे ३ पीश्वरस्य सर्गे जायमानप्रकृत्यन्तरयोगे सतीश्वरस्य नित्यत्वसंभवात् किमर्थं तयोर्नित्यत्वाभ्युपगम इति
चेन्न अजामेकामिति मन्त्रे प्रकृतेरजत्वैकत्वश्रवणात्प्रकृत्यन्तरायोगात् प्रधानक्षेत्रज्ञपतिर्गुणेश इ
ति परमात्मनः प्रकृतिद्वये ईश्वरत्वश्रवणाच्च ततः ईश्वरत्वनिमित्तयोस्तयोरपीश्वरवन्नित्यत्वमेव तयोर
नित्यत्वे त्वीश्वरस्य क्वचिदीशितव्याभावे ईश्वरत्वं भज्येत सृष्ट्यादौ पुण्यपापाद्यनपेक्ष्य निमित्तं
जीवानां नानायोनिप्राप्तिप्रसंगात् तथा सुखदुःखादिकल्पना च स्यात् तथात्वे जगत्स्रष्टुरीश्वरस्य
वैषम्यनैर्घृण्ये च प्रसज्येयातां प्रकृत्या बद्धो बद्धस्तन्मुक्तो मुक्त इतीयत्तयोर्बंधमोक्षयोरव्यवस्था च स्यात्तथा स नि
ति बद्धानामपि मुक्तिर्मुक्तानामपि जन्मादिबंधः प्रसज्येत बंधमोक्षप्रतिपादकशास्त्रानर्थक्यं च स्यात् तयोरनि
त्यत्वे एवमाद्यनर्थपरंपरा संभवति ननु पुरुषशब्दवाच्यस्य जीवस्याधुनिकत्वान्नैवोक्तानर्थागम इति चेन्न ।
प्रत्यक्षादिप्रमाणविरोधापत्तेः प्रत्यक्षेण खलु जीवानां सुखदुःखादिवैचित्र्यमुपलभ्यते तद्वैचित्र्यं कर्मनिबंध
नमेव न तु पुरुषस्वातंत्र्यनिबंधनं तथात्वे सर्वेषां तदेकरूपापत्तेः तदन्यथानुपपत्त्या च धर्माधर्मनिमित्तः संसा
रो ह्यनुमीयते ततो नुमानेन यत्कर्म कुरुते तदभिसंपद्यत इत्यादिश्रुतेरपि सुखादेः कर्मैकनिबंधनत्वमभ्युप
गन्तव्यं तद्धेतुरपि कर्म जन्मान्तरीयमेव न त्वाधुनिकं तरुणकादौ कर्मादर्शनात् कर्मणामनाधुनिकत्वे तत्क
र्तुर्जीवस्यानित्यत्वमेवेति सिद्धं न जीवो म्रियत इति श्रुतेः अजामेकामिति न जीवो म्रियत इत्यादिश्रुतिभि

अविकारिणोप्यात्मनः संसारकारणत्वमाह पुरुषइति पुरिशयनात्पुरासदैकरूपेणास्तइतिवा स्वाज्ञाना
त्पुरमुषतीतिवापुरुषः बुद्धिकोशेसर्वसाक्षित्वेनवर्त्तमानः प्रत्यगात्मासुखदुःखानांसुखदुःखादिप्रत्ययानांभो
ग्यानांभोक्तृत्वेनोपलब्धृत्वेहेतुः स्वाभासानुप्रविष्टांतःकरणद्वारासुखदुःखादिप्रत्ययानुभूतौकारणमित्यु
च्यते देहेंद्रियाद्याकारेणविषयाकारेणसुखदुःखादिप्रत्ययाकारेणचप्रकृतेःपरिणामेसति स्वाविद्या
कृताऽनात्माध्यासेनात्मनोपिस्वाभासद्वारात्तदुपलब्धृत्वेसत्यहंममेतिसंसारःसंभवति तथाप्रकृतेःपरिणा
माभावे क्षेत्रज्ञस्योपलब्धृत्वाभावेचोक्तलक्षणःसंसारोनसंभवति तदिदंजाग्रदाद्यौसुषुप्तौचप्रत्यक्षंतत
तोयावद्देहेंद्रियविषयसुखादिप्रत्ययसंबंधःस्यादात्मनस्तावन्नसंसारोपरमःसिध्यतीत्यर्थः २० ननुप्र
कृतिपुरुषयोर्नित्यत्वात्तत्संबंधोप्यात्मनोनित्यएवभवतितेनसंसारोपिनित्यएवस्यात् कदाकथंवात्म
नःसंसारमोक्षःसिध्यतीत्याशंकायामात्मनोबुध्यादिसंबंधोनित्योनभवतिनिरवयवसावयवयोःसंयो
गसमवायादिसंबंधासंभवात् किंत्वाध्यासिकःसोयंस्वाज्ञानैकनिबंधनःसति विवेकविज्ञानेनिव
र्त्ततएवेतिबोधयितुमात्मनःप्रकृतिसंबंधात्संसारंतत्कारणंचविशदयति ॥ ॥
पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान् कारणंगुणसंगोस्यसदसद्योनिजन्मसु २१ पुरुषउक्तल
क्षणआत्मास्वयंकूटस्थोसंगश्चिद्रूपोपि प्रकृतिस्थः प्रकृतिः कार्यकरणसंघातः स्वाऽविवेकेनायमे
वाहमितितदात्मनातिष्ठतीतिप्रकृतिस्थोनतुस्वस्थःशरीरतादात्म्यमापन्नइत्यर्थः ततएवतद्धर्म

मतइति विजानीहीत्यर्थः विकाराणां गुणानां च प्रकृतिकार्यत्वे सिद्धे पुरुषस्यात्मनस्त्वकर्तृत्वमविकारित्वं निर्गु
णत्वं च सिद्धमिति सूचितं भवति १९ विकाराणां गुणानां च प्रकृतिकार्यत्वमेव विशदयन् हेतुफलोत्पादकत्वे
न प्रकृतेश्च तत्फलभोक्तृत्वेन पुरुषस्य चोभयोरपि संसारकारणत्वं सूचयितुमाह ॥ कार्यकर
णकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते २० कार्यकरणकर्तृत्वे कार्यं शरी
रं कार्यस्य करणानुमापकत्वादत्र कार्यपदेन महदादयः सप्त विकृतयः शब्दादयश्च तत्करणानि गृह्यंते कर
णानि दशेंद्रियाणि मनश्च बुध्यहंकारचित्तानि चतुर्दश करणपदेन वचनादयो दर्शनादयः कामसंकल्पा
हंकरणसुखदुःखमोहात्मिका बुद्धिवृत्तयश्च प्रकृतिसंभवाः सर्वेपि गृह्यंते कार्यं च करणानि च तेषां
कार्यकरणपदगृहीतानां च कर्तृत्वे कर्तृत्वं जनकत्वं तस्मिन् कार्यकरणकर्तृत्वे हेतुरुपादानकारणं प्र
कृतिरेवेति तत्वज्ञैरुच्यते अग्निसान्निध्यादयइवात्मसान्निध्यात्प्रारब्धानुरूपेण प्रकृतिरेव कार्यक
रणात्मना विषयरूपेण सुखादिप्रत्ययरूपेण च हेतुफलात्मना परिणमत इति मुनयो वदंतीत्यर्थः कार्यका
रणकर्तृत्व इति पाठे तु दशेंद्रियाणि मनश्च शब्दादयः पंच चैते षोडश विकाराः कार्यपदेन गृह्यंते सप्त विकृत
यः कारणपदेन गृह्यंते तेषां कार्यकारणानां कर्तृत्वे आरंभकत्वे मूलप्रकृतिरेव हेतुरुच्यते यद्वा कार्यकरणा
नां देहेंद्रियमनोबुध्यादीनां प्रकृतिकर्तृत्वे कर्तानियोक्ता तत्राचे विषयभोगवासनारूपा कर्मरूपा च प्रकृ
तिरेव कारणं निरवयवत्वान्नात्मेत्यर्थः स्वभावस्तु प्रवर्त्तत इत्युक्तत्वात् एवं प्रकृतेः संसारकारणत्वमुक्त्वा

२१

30

दुःखाऽनुभूतिकारणमिति सिद्धं यथा गुणसंगः सज्यते बध्यतेऽनेनेति संगः गुणेषु देहेंद्रियादिषु स्वत्वमि
त्यहंत्वाभिनिवेशलक्षणः शब्दादिषु इदं भोग्यमिति संभोगरूपाभिनिवेशरूपो वा अध्याससंबंधः संगः एतमे
वाविद्यामाहुः पंडिताः अविद्यावत एव हि पुरुषस्य कामः कर्मापि सदसद्योनिषु जन्मादिदुःखकारणं
तन्निवृत्तिकारणमात्मयाथात्म्यविज्ञानमेव तच्च न सत्तन्नासदुच्यत इत्यात्मनः प्रकृतितद्विकारतद्धर्मतत्कर्म
संबंधत्वेनाऽनन्यत्वसिद्धये अतन्निषेधद्वारा सद्भावसिद्धये ज्ञानमिति स्वरूपनिरूपणद्वारा ज्ञानं ज्ञेयं
च सम्यक्प्रतिपादितं २१ पुनरपि तदेव परं तत्त्वं मुमुक्षूनां सम्यगधिगमयितुमात्मनः प्रकृतितत्कार्य
संबंधराहित्यं तद्रहितत्वेन शुद्धस्य चिदेकरसस्य ब्रह्माभिन्नत्वं च बोधयति ॥ उपद्रष्टाऽनु
मंता च भर्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः २२ अस्मिन्देहे कार्यकरणसं
घातलक्षणे योस्मत्सदप्रत्ययार्थः पुरुषः आत्मा स देहेंद्रियादिभ्यः परो भिन्न एव भवति तत्कुतो यस्मा
दुपद्रष्टा द्रष्टा सर्वस्य चिदाभासत्वं च तद्व्यापारं च साक्षित्वेनोपरि पश्यतीत्युपद्रष्टा यथा उपसमीपे बु
द्धेरपि अंतरतया प्रत्यक्त्वेन स्थितः सन् बुद्धिं तद्व्यापारं च दृश्यजातं च सर्वं साक्षादविक्रियात्मना पश्य
तीत्युपद्रष्टा हेतुगर्भितमिदं विशेषणं आत्मा बुद्ध्यादेर्भिन्नः उपद्रष्टृत्वात् यज्ञोपद्रष्टृवदिति नहि
यज्ञोपद्रष्टा यजमानादिष्वन्यतमो भवति तदन्यतमत्वे उपद्रष्टृत्वानुपपत्तेः उपद्रष्टृत्वे नामव्यापार्यैन्य
त्वे सत्यव्यापृततया तटस्थेन व्यापारितद्व्यापारदर्शनमात्रैकपरत्वं तत उपद्रष्टा द्रष्टृभ्यः सर्वेभ्यो २१

तत्कर्मवान्सन्प्रकृतिजान् प्रकृतेर्बुद्ध्यादिस्थूलांतरूपायाः सकाशाज्जातान् प्रकृतिजान् प्राकृतान्गुणान्
देहेगुणा बाल्यस्थैर्यौल्यादयः इंद्रियगुणाः काणत्वखंजत्वादयः प्राणस्यगुणाः क्षुधितत्वादयः मनोगुणाः
समीचीनत्वादयः बुद्धिगुणाः कर्तृत्वभोक्तृत्वादयस्तानेतान् स्थूलसूक्ष्मकारणदेहधर्मान् सुखदुःखा
दिप्रत्ययांश्चस्वीयत्वेनानुभुंक्ते मनुष्योहंब्राह्मणोगृहस्थोयतिर्मूढः पंडितः शिष्टोभ्रष्टः कर्ताभोक्तासुखी
दुःखीतिममेदमिति चस्वयं प्रकृत्यात्मकोभूत्वातद्धर्मान्जन्मजराजातिवर्णाश्रमादीन् पुण्यपापादींश्च
स्वधर्मत्वेनानुभवतीत्यर्थः आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिण इत्यादिप्रकृतिप्रसिद्धिद्योतनार्थोहिश
ब्दः अयमेव हेतुरस्यात्मनः संसारः यः स्वयमन्यात्मकोभूत्वा अन्यधर्मान् सतोप्यसतश्चात्मीयत्वेनमन्य
ते नन्वक्रियस्याऽसंगस्यात्मनः प्रकृतितादात्म्यापत्तौतदीयधर्मकर्मस्वात्मीयत्वानुभूतौचकोहेतुरित्याकां
क्षायामाह कारणमिति अस्यसाक्षाद्विबुद्धिरात्मत्वेनानुभूयमानस्यकूटस्थासंगचिद्रूपस्यात्मनः सदसद्योनिजन्मसु
सद्योनयोदेवऋषिब्राह्मणादिपुण्ययोनयः असद्योनयोरक्षःपिशाचश्वपाकपश्वादिपापयोनयः तासुजन्मानितेषु
सदसद्योनिजन्मसु अहंममेत्यादिसंसारस्यकारणंगुणसंगः गुणेषु इष्टानिष्टेषु भोग्येषु सज्यते पुमान् सक्तो
भवत्यनेनेति संगः कामः कामः [illegible] खलुपुरुषस्यबंधः सत्यामविद्यायांपुमान् कामेनैवोच्चावचानिकर्मा
णिकरोतितत्फलंचसुखदुःखात्मकंनानाजन्मभिः प्राप्नोति तथाचश्रुतिः सयथाकामोभवतीति कामा
न्यः कामयतेमन्यमानइतिच एतदेवतत्साविद्यैकमूलः कामएवपुरुषस्यनानायोनिषुजन्मजरामरणादि

तीश्वरत्वमप्यात्मनः इतरभिन्नत्वे हेतुस्तेन प्रकृतितद्विकारतद्धर्मतत्कर्मतदवस्थालेशराहित्यमात्मनः सिद्धं मतं श्वासावीश्व
रश्चमहेश्वरः परिपूर्णः कूटस्थोऽसंगश्चिदेकरस आत्मेति विशेषणषट्केन व्यवस्थापितं ननु प्रत्यगात्मा परमात्मेति
द्वैविध्ये कथमद्वैतसिद्धिरित्याशंकायां न ब्रह्मणश्च परिपूर्णस्यारोपिताविद्याकार्यैः परिच्छित्तिभानात् परिच्छिन्नत्वं
१२ देहेनत्वं च कल्पितं यथैकस्यैवाकाशस्य कल्पितघटोपाधिनापरिच्छिन्नत्वं घटाकाशत्वं च कल्पितं तद्वद्ब्रह्म
णि प्रकृतं प्राकृतं च सर्वं ब्रह्मण्यविद्यया कल्पितं मिथ्यैव भवति "सत्यं त्रयमप्येतत्तु शुक्तं स्वप्नं मायामात्रं चिदेकरसो ननु
ह्ययमात्मेति विकल्पो न हि वस्त्विति अस्तत्वादन्यस्यात्यादिश्रुतिभिरिदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकव
3| दित्यादियुक्तिभिश्च विचार्यमाणे देहादिद्वैतप्रपंचस्य सर्वस्य मायाकार्यत्वेन मिथ्यात्वात् द्वैतकारणत्वानुपपत्तेः
ब्रह्मात्मनोर्भेदस्य महाकाशघटाकाशयोरिवोपाधिपरिकल्पितत्वात् उपाधेरप्यविद्याकार्यत्वेन मिथ्यात्वाच्च त
दसत्वं तयोरभेद एव ततस्तत्त्वद्वितीयत्वं ब्रह्मणो निरंकुशमिति बोधयितुं ब्रह्मात्मनोरेकत्वमाह परमात्मेति चा
प्युक्त इति अस्मिन् देहे पुरुषोऽस्मत्प्रत्यया यो बुद्धिवृत्तिसाक्षिलक्षणो यस्मिन्प्रकृतिसान्निध्यात् कर्तृत्वभो
क्तृत्वादिसंसारः कल्पितश्चपद्गृहीत्वादिलक्षणो विचार्यमाणो यः प्रकृतितद्विकारतद्धर्मतत्कर्मसंबंधलेशशून्यो
ऽसंसारी नित्यकूटस्थाऽसंगश्चिद्रूपः स आत्मा परमात्मा ब्रह्मैवेति सर्वश्रुतिभिरुक्तः तदेतदात्मनमो मित्यपश्यंतः प
श्यन्तु देतत्सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यमिति स आत्मा तत्त्वमसि श्वेतकेतोऽइति अयमात्मा
ब्रह्मेति चेत्यादिभिर्ब्रह्मात्मनोरभेद एव सम्यक्प्रतिपादित इत्यर्थः ततः देहेनस्य ब्रह्मभावः स्वाभाविक एव न तु
कल्पितः यतः सर्वज्ञया सत्यवादिन्या प्रमाणशिरोमण्या श्रुत्या तदेतत्सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवेति तयोरेक २२

यजमानादिभ्यो भिन्न एव भवति यथा तथाऽयमात्माप्युपद्रष्टृत्वात् बुध्यादिभ्यो भिन्न एव भवति एतेनात्मनोऽवि
कारित्वं नित्यत्वमकर्तृत्वमभोक्तृत्वं च सूचितं भवति किंच अनुमंता स्वस्वविषयेषु प्रवृत्तान्निवृत्तान्वा बुध्या
दीननुपश्चादेवमनुते बुध्यत इति अनुमंता बुध्यादीनां प्रवृत्तिं निवृत्तिं तत्फलं चान्य एव जानातीत्यर्थः उपद्र
ष्टानुमंतैष आत्मेति श्रुतेः आत्मा देहादिभ्यः पर एव अनुमंतृत्वात् तटस्थवदित्यात्मनः प्रकृतिप्राकृतेभ्यो
भिन्नत्वसाधकमनुमानं सूचितं चकारः समुच्चयार्थः किंच भर्ता स्वाविद्यया स्वस्मिन्नध्यस्तान्महदा
दिसर्वविकारान् सत्तास्फूर्तिप्रदानेन बिभर्तीति भर्ता जलतरंगफेनबुद्बुदानां मरुरिव स्वस्मिन्नारोपिता
नां देहादिशब्दादिप्रत्ययानां स्वयमेवाधीभूत्वा सत्तांस्फूर्तिं च तनोत्यात्मेत्यर्थः भर्ता भरणीयेभ्यः पर एवेति
भर्तृत्वमप्यात्मनो देहेंद्रियादिभ्यो भिन्नत्वे पूर्ववद्व्यावर्तकं विशेषणं किंच भोक्ता स्वस्मिन्नध्यस्तमव्यक्ता
दिस्थूलांतं सर्वं स्वमहसा चैतन्यात्मकेन तिमिरं रविरिव भुंक्ते स्वस्मिन्नेव तिरोभावयतीति भोक्ता भ्रांतिदृ
ष्टायां नानात्मना स्वयमेव प्रतीतोपि सम्यग्बोधदृष्टायां स्वमात्रावशेषो भवतीत्यर्थः भोक्ता भोज्यात्पर एवेति
भोक्तृत्वमप्यात्मनो देहादिभिन्नत्वे पूर्ववद्व्यावर्तकं विशेषणं किंच महेश्वरः अव्यक्तादिपि स्थूलांतमत्या
त्महान् महतो महीयानिति श्रुतेः महत्त्वमप्यात्मनो देहादिभिन्नत्वे हेतुः आत्मा देहादिभ्यो भिन्नः महत्त्वात् आ
काशवत् महत्त्वमपरिच्छिन्नत्वं न हि परिच्छिन्नस्य वस्तुनः परिच्छिन्नत्वं देहाद्यन्यतमत्वं च संभवति सर्वप्रमाणवि
रोधात् किंच ईश्वरः चुंबकस्य सन्निधौ अयइव यस्य सन्निधिमात्रेण बुध्यादि सर्वं जडं चेष्टते स आत्मा ईश्वरः ई
शनशीलः सर्वप्रवृत्तिहेतुः ईशानो भूतभव्यस्येति श्रुतेः आत्मा प्रकृतितत्कार्येभ्यो भिन्नः ईश्वरत्वात् राजवदि

गीता०त्र० त्वान्नित्यमुक्तत्वान्निर्लेपत्वान्निर्मलिताशेषकर्मत्वाच्च प्रारब्धदेथात्पत्तितोस्मिन्देहे भूयः पुनर्नाभिजायते नो
त्पद्यते पुनरुत्पत्तेः कारणभूतानामविद्याकामादीनां सम्यक्ज्ञानाग्निनिर्दग्धत्वेन कारणाभावात्केवलभा
वं प्राप्नोतीत्यर्थः किमुवक्तव्यं सद्वृत्तो नाभिजायत इत्यपेरर्थः प्रकृतिपुरुषयोः स्वरूपं क्षीरनीरवत्सम्य
२३ क्विविच्य विज्ञाय प्रकृतिं च गुणैः सह विद्यया प्रविलाप्य ब्रह्मैवाहमिति अविक्रियब्रह्मात्मनातिष्ठतो
यतेः सर्वथा वर्त्तमानं यथेष्टाचरणं न संभवति अनात्मन्यहंममाभिमानाभावात् सत्येवानात्मनि देहेंद्रि
यादावहंममाभिनिवेश इदं कर्त्तव्यमिदं भोक्तव्यमितीच्छावेगश्च पुंसः कर्मणि दुष्टेऽदुष्टे च प्रवृत्तिहेतुरूपो
नास्ति ततस्तद्विहीनस्य सर्वं ब्रह्मैव पश्यतो ब्रह्मविदः सत्यः सत्ति च प्रवृत्तिर्नोपयुज्यते एवं सर्वत्र ब्रह्मदर्श
नप्रपंचदर्शनयोः परस्परविरुद्धत्वात् तर्हि सर्वथा वर्त्तमानोपीति वचनस्य व्याहतिः स्यादिति चेदुच्यते ब्रह्मवि
32 दोपि ब्रह्मात्मनातिष्ठतो देहप्रारब्धवशात् कश्चिदाहारादौ नियमोल्लंघनं प्रसज्येत तेनैतस्य ज्ञानं तत्फलं च प्रति
हन्यत इति मूढानां प्रतिपत्तिस्तां वारयतीदं वचनं भागवतं सर्वथा वर्त्तमानोपि न स भूयोभिजायत इति अतो नैतस्य
व्याघात इति ॥२३॥ एवं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना निरूपितस्य ब्रह्मणः स्वरूपं विज्ञाय प्रकृतिं च विलाप्य सर्वमि
दमहं च ब्रह्मैवेति सर्वं ब्रह्मैव पश्यतो यतेस्तद्विज्ञानस्य फलं विदेहकैवल्यं प्रतिपाद्याधुना मुमुक्षूणामेवोत्तम
मध्यमाधमाधिकारिणां निर्विशेषब्रह्मप्राप्तये तत्तदधिकारानुरूपाणि साधनान्याह द्वाभ्यां ॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥२४॥ केचिदुत्तमाधिकारि
णो यतयः विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीर इत्यादिना एकांते सुखमास्यतां परतरे चे

त्वमुच्यते तथैवेश्वरेणापि क्षेत्रज्ञं चापि मां विद्धीति देहेऽस्मिन्पुरुषः परमात्मेति च ततो ब्रह्मात्मनोरेकत्वे द्वैतहेतो
रन्यस्याभावात् ब्रह्मणो भेदितीयत्वं च निर्विचिकित्सं सिद्धं ॥ २२ ॥ एवं प्रकृतिपुरुषयोर्विभागं पुरुषस्य प्रकृतिसंबं
धराहित्यं ब्रह्माभिन्नत्वं च प्रतिपाद्य एवं लक्षणमात्मानं यो जानाति स विदेहकैवल्यं प्राप्नोतीत्याह ॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥ जन्मानेकसहस्रसमा
राधितपरमेश्वरप्रसादसंपन्नः शुद्धात्मा यो मुमुक्षुरधिकारी ब्राह्मणः स्वयं सदसद्विवेकतीव्रवैराग्यशमदमसं
न्यासाद्यंतरंगसाधनसंपत्तिविशिष्टो भूत्वा ब्रह्मविद्गुरुसन्निधौ समनुष्ठितश्रवणादिजन्यज्ञानेनैवमुक्तप्रका

धि

रेण प्रकृतिमैशनाऽज्ञानं तत्कार्यं करणकर्तृकर्मफलरूपेण विजृंभितामनाद्यनिर्वाच्यां सर्वानर्थमूलभूताम
विद्यां गुणैर्महदादिस्थूलांतैर्गुणकार्यैर्भोक्तृभोग्यात्मनास्थितैः सह मरौ दर्शनेन जलप्रवाहमिवाधिष्ठानसंद
र्शनेन मिथ्याभूतां वेत्ति तथा पुरुषं क्षेत्रज्ञं च चिदाभासकर्तृककर्तृत्वभोक्तृत्वादिधर्माध्यारोपाधिष्ठानभूतं वि

२

द्यया सम्यक् निरस्ताशेषविशेषं सर्वोपाधिविनिर्मुक्तमुपद्रष्टृत्वादिलक्षणलक्षितमाद्यंतरहितमाकाशवदसं
[illegible] विशुद्धमानंदघनं चिदेकरसमात्मानं परं ब्रह्म वेत्ति अयमेवाहमस्मि न तु कर्त्ता भोक्ता संसारीत्यतन्निरसनपू
र्वकं प्रत्यगभिन्नं परं ब्रह्म प्रत्यग्रूपस्य स्वात्मनो यो विजानाति स ब्रह्मविद्यतिः स सर्वथा सर्वप्रकारेण वर्त्तमानो
ऽपि यद्यपि सर्वात्मदर्शिनो विदुषः शुद्धात्मनः स्वव्यतिरेकेणान्यस्य ग्राह्याद्यभावात् प्रवृत्तिरेव न संभवति।
भेददर्शिनो रागादिवतः खलु प्रवृत्तिर्न तु विशुद्धरूपस्य सर्वं ब्रह्मैवेति यतः संभवति तथापि दृष्टादृष्टप्रारब्ध
वशात् देहेंद्रियतद्गुणरूपेण प्रवृत्ते सति परदृष्ट्या विविधं प्रवृत्तवज्ज्ञाति तथापि स्वदृष्ट्या स्वयमप्रवृत्त एव सन्निष्क्रिय

देवः सर्वमिति बुद्ध्या सर्वं विष्णुं भावयंति यद्वा परमेश्वरार्पणबुद्ध्या श्रद्धाभक्तिभ्यां समनुष्ठितेन कर्मयोगेन चित्तशु-
द्धिं प्राप्य तत्संपादितश्रवणादिजन्यज्ञानेनात्मनि बुद्धावात्मानमात्मना पश्यंति क्रमेणेत्यर्थः २४ इत्थं ध्यान-
सांख्ययोगयोः कर्मयोगे चाप्यधिकारिणां यतीनां गृहस्थानां च ब्राह्मणादीनां यथाधिकारं मोक्षसाधन-
मुपदिश्य परमदयालुतया श्रीभगवान् कर्मस्वप्यऽनधिकारिणां मुक्तिसाधनमाह ॥

अन्ये त्वेवमजानंतः श्रुत्वाऽन्येभ्य उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः २५ कर्माधिकारिभ्यस्त्रैव-
र्णिकेभ्यो ब्राह्मणादिभ्योऽन्ये तु कर्मस्वऽनधिकारिणः केवलपामराः स्त्रीशूद्रादयः किंचिदप्येवमुक्तेषु सा-
धनेष्वेकमपि साधनमजानंतः शास्त्राध्ययनतदर्थज्ञानयोग्यताभावादुक्तसाधनाऽन्यतरं यथावत् ज्ञातुं क-
र्तुं चाऽसमर्थाः संतः स्वयमन्येभ्यो ब्राह्मणादिभ्यो गुरुभ्यस्त्वमिदमेवं कुरु इदमेवमनुसंधेहीति श्रुत्वा श्रद्ध-
याभक्त्या च श्रुतिपरायणाः श्रूयत इति श्रुतिः श्रुतोऽर्थस्तत्परायणाः तदेकप्रवणाः संत उपासते श्रुतमर्थं
सम्यगनुतिष्ठंति तेपि परोपदेशानुवर्तिनः ईश्वरप्रसादचित्तशुद्धितत्फलसिध्यादिक्रमेण मृत्युं मृत्युदुःख-
प्रधानं संसारमतितरंत्यतिक्रामंति क्रमेण मुक्तिं गच्छंतीत्यर्थः २५ एतद्योनीनि भूतानीति यदुक्तं भूतानां संसार-
स्य क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयसंबंधकारणत्वं तदिदानीं विशदयति मोक्षैककामैः पंडितैः प्रकृतिद्वयसंबं-
धः प्रयत्नेन परिहर्तव्य इति सूचयितुं ॥ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयो-
गात्तद्विद्धि भरतर्षभ २६ स्थावरं जंगमं स्थावररूपं जंगमरूपं यावत् यावत्परिमाणकं यत्किंचित् सत्त्वं प्रा-
णी संजायते त्रिलोक्यां समुत्पद्यते तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगात् क्षेत्रक्षेत्रज्ञयोः संयोगात्संबंधादेव संजायते यत्किं-

तः समाधीयतामित्युक्तरीत्या तीव्राभ्यां द्वेष्ठावैराग्याभ्यां सर्वेभ्यो विषयेभ्य इंद्रियाण्युपसंहृत्य मनसः प्रत्यगात्मन्येका
ग्रतामापाद्य ध्यानेन श्रवणादिसंस्कारजन्येन तानसाध्येन ध्यानेन विजातीयप्रत्ययानंतरितसजातीयप्रवाहीकर
णलक्षणेनात्मनि बुद्धावेव सर्वदृश्यप्रकाशकतया स्थितं निर्विशेषं निराकारमाकाशवत् परिपूर्णं चिदेकर
समात्मानं परमात्मानं स्वात्मना स्वस्वरूपत्वेन पश्यंति भेदवासनानिवृत्तये श्रवणादिनाज्ञातं ब्रह्म ब्रह्मैवाहम
हमेव ब्रह्मेत्यात्मानं सर्वदा ब्रह्मैव भावयंतीत्यर्थः यथा सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इतिमा
याकार्यस्य सर्वस्य सदास्पदत्वश्रवणात् भ्रांत्या कल्पितं सर्वमव्यक्तादिस्थूलांतमात्मनि परमात्मनि सर्वा
धिष्ठाने प्रातिलोम्येन प्रविलाप्य तेन प्रत्यस्तमिताशेषविशेषं सद्घनं चिद्घनमानंदघनमात्मानं परं ब्रह्म ध्या
नेन ब्रह्माकाराकारितांतःकरणवृत्त्या तैलधारावदविच्छिन्नया वृत्त्यंतरनिर्मुक्तया ब्रह्मैवाहमित्यात्मना स्वस्व
रूपत्वेन पश्यंति स्वयमेव ब्रह्म सर्वदा भावयंतीत्यर्थः अन्ये मध्यमाधिकारिणो निरुक्तध्यानयोगाऽक्षमाः यत यः सांख्येन सां
ख्यं नाम बुद्धेः सर्वास्ववस्थास्वहं नित्यकूटस्थासंगचिद्रूप एवास्मि न कदापि चलेन कुर्वे न भुंज इति स्वस्य चैतन्या
कारमात्रस्य प्रत्यग्वृत्त्या सर्वदा प्रकृतितद्गुणतद्विकारतद्धर्मतत्कर्मतदवस्थासंबंधराहित्यदर्शनमेव संसारमोक्ष
स्योपायत्वेन सांख्यमेव योगस्तेन सांख्येन योगेनात्मनि बुद्धावात्मानं पश्यंति स्वमकर्त्तारमभोक्तारं निष्क्रियमेव स
र्वदा भावयंतीत्यर्थः अपरे च ध्यानसांख्ययोगयोः सदसद्विवेकवैराग्यसंन्यासैकसाधनयोरनधिकारिणो गृहि
णोपि कर्मयोगेन मत्कर्मकृन्मत्परम इत्युक्तरीत्या परमेश्वरार्थैसकलकर्मानुष्ठानं कर्मयोगः मोक्षोपायत्वात्
कर्मैव योगस्तेन चित्तशुद्धिसंपादनकारणेनाराधयंतः संतश्चात्मानं परमात्मानं विश्वरूपमात्मनि बुद्धौ पश्यंति वासु

ज्ञानमूलत्वको मिथ्याज्ञानलक्षणः सोयमेव पुंसः संसारकारणं तन्निवृत्तिकारणं तयोः स्वरूपविवेचनमेव तदुच्य
ते घटतद्द्रष्ट्रोरिव विषयविषयिणोः प्रकृतिपुरुषयोरन्योन्यविलक्षणयोः स्वरूपं ज्ञेयत्वज्ञातृत्वाभ्यां प्रकाश्य
२५ प्रकाशकत्वाभ्यां विकारित्वाविकारित्वाभ्यामनित्यत्वनित्यत्वाभ्यां सावयवत्वनिरवयवत्वाभ्यामनेकत्वैकत्वा
२ भ्यां च परस्परविलक्षणमिदं शरीरं क्षेत्रमेतद्यो वेत्ति तं क्षेत्रज्ञ इति सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितमिति
ज्योतिषामपि तज्ज्योतिस्तमसः परमिति ज्ञानमिति हृदि सर्वस्य धिष्ठितमित्युक्तरीत्या क्षेत्रज्ञः क्षेत्राद्भिन्नः ज्ञातृ
त्वात् घटज्ञातृवदित्यादियुक्तिभिर्विविच्यते तत्त्वं तु लवणाद्भिन्नं जलं क्षेत्राद्भिन्नं क्षेत्रज्ञं चिदेकरसं स्वरूपमहमि
34 ति स्वात्मना विज्ञाय ततः प्रकृतिं न सत्त्वान्नासदुच्यत इत्युक्तरीत्या ऽऽत्मनि प्रविलाप्य पुनराभासरूपायाः प्रकृते
स्तेन मत्कर्मणां चाहङ्कारादौ संश्लेषाय ध्यानस्यात्तया सदात्मनिष्ठायामेव तिष्ठतो ब्रह्मविदः पुनरविद्यास्मि
तादयो दुःखहेतवस्तत्कार्याणि च कर्माण्यपि जन्मबीजानि न संभवंति विदेहमुक्तिप्रकरस्याभवस्ततः क्षे
त्रक्षेत्रज्ञयोः संयोगोयथ्यानस्यात्तया ब्रह्मविद्भिः ब्रह्मनिष्ठयेव स्यात्तव्यमिति सूचयितुं क्षेत्रक्षेत्रज्ञयोः संयो
ग एव विदामप्यविदां च सर्वेषां जन्मादिदुःखकारणमित्युच्यते जगद्गुरुणा यावत्संजायते किंचिदित्यादिना तस्मा
सता त्सर्वदात्मनास्थातव्यमिति सिद्धं २६ कृतमपि क्षेत्रक्षेत्रज्ञयोर्विवेचनं पुनरपि तद्विवेकदार्ढ्यार्थं तत्तल्लियत वि
शेषणैः कुर्वन्नेवं विविक्तमात्मानं यः साक्षाद्विजानाति स यतिरेव जीवन्मुक्त इति सूचयितुमाह ॥
समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति २७ भवंति जनिलक्षणां विकारं भ
जंतीति भूतानि ब्रह्मादिस्थावरांतानि भूतानि तेषु तत्तद्भूतानामेव भवनं न त्वात्मन इत्यात्मनो भवनाभावस्तन्नि

चिदित्यविशेषग्रहणं देवमनुष्यादिषु सर्वत्रापि जनेरसाधारणत्वसूचनार्थं क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरु
षयोः संबंधे सत्येव प्राणिजातं सर्वं समुत्पद्यते जननादिदुःखमपरिच्छिन्नमनुभुंक्ते नान्यथेति विद्धि विजा
नीहि त्वं भरतर्षभ प्रकृतिपुरुषयोः संबंधे सत्येवाविद्याऽस्मितादयो विजृंभंते जन्मादिदुःखहेतवः ततः
कर्माणि च जन्मबीजानि नासति अतस्तयोः संबंधः प्रयत्नेन तत्त्वज्ञैर्मोक्षसुखेच्छुभिर्यतिभिः परिहर्त्तव्य इ
त्यर्थः ननु प्रकृतिपुरुषयोः संबंधः कः यस्मिन्सति पुंसः संसारो यदभावे तदभाव इति चेदुच्यते न तयोः
परस्परावयवसंश्लेषैकनिबंधनः संयोगः संभवति सावयवनिरवयवयोः संयोगायोगात् निष्कलं नि
ष्क्रियमिति पुरुषस्यात्मनो निरवयवत्वश्रवणात् ननु निरवयवस्याप्याकाशस्य विभुत्वसिद्धये सर्वमूर्त्त
द्रव्यसंयोगित्वं विभुत्वमिति सर्वमूर्त्तद्रव्यैः संयोगोऽङ्गीकृत एवेति चेत्तथा त्वेतत् आकाशस्य सावयवत्वं वर्ष
वाद्यऽग्न्यादिसंयोगात् क्लेदशोषप्लोषाद्यऽनर्थप्रसंगादनित्यत्वं च सूक्ष्मत्वात् स्थूलेन न संयुज्यत इति चे
न्न जलादीनां सूक्ष्मावयवैः सूक्ष्मस्यापि संयोगश्चोक्तानर्थप्रसंगात्ततो मूर्त्तद्रव्यसंयोगित्वकल्पनं भ्रमए
व किंतु निरवयवस्याकाशस्य सर्वमूर्त्तद्रव्यव्यापकत्वस्यैव तत्संयोगित्वव्यपदेशो न तु साक्षादवयवसंश्ले
षस्य निरवयवत्वेनाकाशस्य तदसंभवात् तद्वत् क्षेत्रज्ञस्यापि क्षेत्रेण संयोगो न संभवति नापि समवाय अतयो
रयुतसिद्धत्वाभावात् उभयोरप्यसंभवे संबंधांतराभावात् तर्हि कः संबंधस्तदुच्यते युष्मदस्मत्प्रत्ययार्थ
योर्विषयविषयिणोरन्योन्यविरुद्धस्वभावयोः प्रकृतिपुरुषयोर्विपरीतगृहीतयोरन्योन्यस्मिन्नन्योन्यधर्माध्या
सलक्षणस्तद्विवेकज्ञानाभावैकनिबंधनः संबंधः शुक्तिरजतयोरिव संभवत्यऽनादिसंस्कारजः न्यस्तत्स्वरूपा

स्वधर्मैर्विषमत्वविक्षिप्तत्वविनाशित्वजडत्वादिधर्मैर्वत्तः दैत्राद्विलक्षणत्वेनोपलभ्यमानं निर्विशेषम
त्मा स्मत्पदप्रत्ययार्थमों..नं क्षेत्रज्ञं क्षेत्रतद्धर्मकर्मास्पृष्टं यः पश्यति नित्यं निरंतरश्रवणमनननिदिध्यासासमा
धिभिः क्रमेण समनुष्ठितैः संभावितसम्यक्ज्ञानेन नित्यकूटस्थासंगचिद्रूपः प्रत्यगेवास्मि न तु बुद्धिचित्तसं
२६ सारीति संसारिविलक्षणमात्मानं यः साक्षात्पश्यति स ब्रह्मविद्यातिर्यथाभूतस्वरूपं कर्तृत्वभोक्तृत्वादि
सर्वसंसारधर्मवर्जितं सर्वोपाधिविनिर्मुक्तमाकाशवदसंगं निर्मलं परिपूर्णमात्मानं स्वं मुक्तमेव स वीव स्यासु
सर्वदा पश्यति न त्वन्यः श्रवणमात्रेण स्वकृतार्थं मन्यमान आत्मानं मुक्तं पश्यतीत्यर्थः एतेन घटमठादिष्वा
35 काशस्येव ब्रह्मादिस्तंबांतशरीरेष्वात्मनो व्यापकत्वं समत्वमसंगत्वं नित्यत्वं निष्क्रियत्वं पूर्णत्वं चेष्टाप्रारब्धा
नुरूपेण देहेंद्रियादिषु प्रवृत्तेषु सत्सु निवृत्तेषु वा स्वस्य तदुभयराहित्यमेव यः सर्वदा पश्यति स्वयमविका
रात्मना पूर्णो ह्यात्मा तिष्ठतीति स एव जीवन्मुक्त इति सूचितं भवति २७ ब्रह्मविद्यातिः सर्वत्र परिपूर्णमात्मानमेवै
करूपेण सदा पश्यति तेनैव नैरंतर्यदर्शनेन मुक्तो भवतीत्याह ॥ समं पश्यन्हि सर्वत्र समवस्थि
तमीश्वरं न हिनस्त्यात्मनात्मानं ततो याति परां गतिं २८ श्रवणमननादिभिः समुत्पन्नविज्ञानेनेदमेवाह
मस्मीत्यपरोक्षीकृतात्मतत्त्वोयतिः सर्वत्र ब्रह्मादिस्तंबांतेषु भूतेषु बहिरंतश्च सर्वतः समवस्थितं सम्यगु
त्कर्षापकर्षराहित्येनैकरूपत्या घटमठादिष्वाकाशवन्नैरंतर्येण व्याप्यास्थितमत एव सममेकरसं निर्विशे
षमीश्वरं रविवत्सर्वप्राणिप्रवृत्तिकारणमात्मानं परिपूर्णं पश्यन् हि यस्मात्कारणादात्मानं स्वमात्मना स्वेनै
व न हिनस्ति न निहंति स्वयमेव स्वस्य न हननं करोतीत्यर्थः आत्मना ॥ त्मनो हननं नाम निष्क्रियस्यानिःसंग

सित्तकाःस्तित्वाभावश्चसूचितः तेषु भूतेषु नामरूपजातिक्रियागुणादिविशेषैः परस्परं विभक्तेषु विषमेषु सर्वे
ष्वपि प्राणिशरीरेष्वविभक्तं सममेकरूपमुत्कर्षापकर्षवर्जितं समरसं निर्विशेषमित्यर्थः आत्मन्यारोपि
तभूतेष्वेव नामरूपजातिगुणादिकृतो विशेषः न त्वधिष्ठाने आत्मनि निरवयवत्वात् निर्गुणत्वादात्मनः
केवलस्योत्कर्षापकर्षानुपपत्तेः सममित्युक्त्या वृद्ध्यपक्षयलक्षणौ भावविकारावात्मनो न स्तः इति सू
चितं भवति किंच तिष्ठंतं स्वरूपे सर्वाणि भूतानीति न्यायेन स्वस्वभावेषु भूतेषु प्रतिक्षणं विपरिणममा
णेषु सत्सु स्वयं तद्वद्गतितया सदैकरूपेण वर्त्तमानं निरवयवत्वाद्दूरमाशेषणादापातं तद्देहेंद्रिया
दिषु विपरीतेषु सत्स्वहमस्मीत्यात्मसत्तायाः सदैकरूपत्वावगमात् सर्वदैकरूपेणास्थितमित्यर्थः अ
शरीरं शरीरेष्वनवस्थेष्ववस्थितमिति श्रुतेः भूतानामेवायं विपरिणामो न त्वात्मन इत्यात्मनो विपरिणा
माभावः सूचितः किंच अविनश्यंतं जनिमत्त्वान्नश्वरेषु नश्यत्सु सत्सु स्वयमविनश्यंतं चरममविकारं वर्जि
तं नित्यमित्यर्थः सुषुप्तौ सर्वभूतप्रलये सुखमस्वाप्समित्यात्मसद्भावावगमादात्मनित्यत्वे प्रत्यक्षे आ
त्मा नित्यः अजत्वादित्यनुमानं अविनाशी वा अरेयमात्मेति श्रुतिश्च प्रमाणं तत एव परमेश्वरं देहेंद्रिय
प्राणमनोबुद्ध्यव्यक्तेभ्यः परं नित्यत्वेनातिसूक्ष्मत्वेनांतरत्वेन व्यापकत्वेन चेतनत्वेन प्रकाशकत्वेन
अधिष्ठानत्वेनानंदत्वेन चोत्कृष्टतममित्यर्थः इंद्रियेभ्यः परा ह्यर्था अर्थेभ्य इति श्रुतेः ईश्वरं ईशानशी
लं अयसोग्निवत्स्वसन्निधिमात्रेण प्रकृतेः प्रवृत्तिहेतुत्वमीश्वरत्वमात्मनो न तु राजादिवन्नियंतृत्वेने
व कर्त्तृत्वेनाकारयन्निति स्व[illegible]त्वनित्यचेतनत्वादिभिः

प्रत्ययभेदेप्यप्रति शरीरमात्मसु भिन्नेषु सत्सु कथं सर्वेषु भूतेष्वात्मानं समं पश्यति यतिरिति शिष्याशंकायां न विज्ञानं य
ज्ञं तनुते कर्माणि तनुतेपि चेति एषो द्रष्टा स्प्रष्टा श्रोता कर्त्ता विज्ञानात्मा पुरुष इति च श्रवणाद्विज्ञानात्मन एव क
र्मकरत्वं तत्फलानुभवः विवेकादिगुणाश्च प्रति शरीरमहमादि मित्यभिमानकृतो भेदश्च न त्वात्मनस्तस्यामन
स्कत्वान्निरिंद्रियत्वान्निरवयवत्वाच्च गुणानुपपत्तेः कर्मानुपपत्तेर्भेदानुपपत्तेश्च ततः सर्वे कर्म प्रकृतिरे
व करोति न त्वात्मा तेनास्य सर्वभूत समत्वं सिध्यतीति बोधयितुमाह ॥ प्रकृत्यैव च कर्माणि क्रिय
माणानि सर्वशः यः पश्यति तथात्मानमकर्त्तारं स पश्यति २९ प्रकृतिस्त्रिगुणात्मिका माया देहेंद्रियप्राणमनो
बुध्यादिरूपेण परिणता कार्यकरणकर्तृत्वे हेतुरित्युक्तलक्षणा या तया प्रकृत्यैव एवकारोऽन्ययोगव्यवच्छे
दार्थः कर्माणि श्रवणदर्शनस्पर्शनवचनादानविसर्गादीनि सर्वशः सर्वप्रकारैः सिद्धानि विहितानि प्रति
षिद्धानि च सर्वाणि कर्माणि क्रियमाणानि चकारात्तत्फलानुभूतिं च तथैव क्रियमाणानि यः पश्यति श्रुतियुक्त्य
नुभूतिभिरात्मानात्मनोः प्रकृतिपुरुषयोः स्वरूपमनुसरीत्वा सम्यग्विविच्यानात्मनः सकाशादात्मस्वरू
पं मुंजादिषीकामिव पश्यन् विभक्तं स्वात्मत्वेन साक्षाद्विजायते यदात्मनानात्मा स्थितत्वतो ब्रह्मविद्याते रेव स्व
तो विभक्तया प्रकृत्यैव सर्वाणि कर्माणि क्रियमाणान्युपलभ्यंते तथैव क्रियमाणात्तत्फलानुभूतिरप्युपल
भ्यते नान्यस्यैव मात्मानात्मविवेकविज्ञानशक्त्या प्रकृतिकर्त्तृकामेव सर्वचेष्टां फलानुभूतिं च तथा श
श्वार्थस्तथात्मानमकर्त्तारं चाभोक्तारं निष्क्रियं नित्यं कूटस्थं साक्षाद्वोद्धारं यतिः पश्यति स एव स्वानुभूत्या ब्रह्मक
ृष्ट्या ब्रह्मादिस्तंबांतेषु सर्वेष्वात्मानमकर्त्तारमभोक्तारं सर्वोपाधिनिर्मुक्तं सममेकरसमेव पश्यतीति तेन परां गतिं

२७ ३६ ति २७

भूतेषु

स्य निराकारस्य निर्लेपस्य चात्मनः स्वस्य पुनर्देहेंद्रियादितादात्म्याध्यासेन कर्त्ताहं भोक्ता सुखी दुःखी शिष्टो भ्रष्टः
सुकृती दुष्कृतीत्याद्युत्तरूपं तत्कर्मारोपणं कृत्वा यत्प्रतीत्यापादनं तद्देवहननं येनात्महननदोषेण स्वयं कृत्स्न
स्यासंगचिद्रूपोपि सदानंदोपि देहाश्रयः कर्त्तृत्वभोक्तृत्वादिधर्मवान् सन् जन्ममृत्युदुःखसागरे मज्जतीति तद्दे
तदात्महननं विदेहकैवल्यार्थी सम्यग्विदितात्मतत्त्वो यतिर्न करोति किंतु बाह्यवासनाकृतामसत्प्रवृत्ति
मुत्सृज्य सदात्मनिष्ठयैव तिष्ठतीति ततः सदात्मज्ञाननिष्ठयैव निरस्ताज्ञानमिथ्याज्ञानतत्कार्यः सन् परां नित्यनि
रतिशयानंदलक्षणां भातिं विदेहमुक्तिं याति प्राप्नोति ब्रह्मसंस्थोमृतत्वमेतीति ब्रह्मनिष्ठस्यैव स्वस्वरूपादप्रमाद्य
तो यतेरमृतत्वसिद्धेः श्रवणात् सर्वदा स्वरूपनिष्ठायामेव तिष्ठतो यतेर्मुक्तिरिति सिद्धं यदा सर्वेषु भूतेषु तिष्ठंत
मिति न्यायेन सर्वभूतेषु समवस्थितं सम्यगुत्कर्षापकर्षरहितत्वेन बहिरंतः सर्वतो व्याप्यास्थितमीश्वरमुत्कल
क्षणमात्मानं स्वस्मिन् सर्वत्र सममेकरसं परिपूर्णमेव पश्यन् हि यस्माद्ब्रह्मविद्यतिरात्मानं परिपूर्णं न हि
नस्ति ब्राह्मणोयं शूद्रः शिष्टोयं भ्रष्ट इति इदं शुद्धमिदमशुद्धमिति भेददर्शनेन पूर्णस्यात्मनस्तिरोभावनमेव
हिंसनं सम्यक्दर्शी विद्वान्मोक्षेच्छया सदा सर्वत्र समदर्शनमनुचानः सन् तदेतन्न करोति किंतु सर्वमिद
महमेवेति सदा पूर्णमेवात्मानं पश्यति ततस्तेनैव सर्वत्र ब्रह्मदर्शनेन निर्दग्धभेदगंधो भूत्वा परां गतिं याति यस्मा
त्सर्वत्र परिपूर्णमेवात्मानं सर्वदा पश्यन्नेव विद्वान्मुक्तो भवति तस्मात्क्वचित्प्रमादेनाप्यनात्मनि तद्धर्मक
र्मस्वप्यहं ममेत्यध्यासो जन्मादिदुःखहेतुर्विज्ञातात्मतत्त्वैर्यतिभिः विदेहकैवल्यसुखार्थिभिर्न कर्त्तव्य इति
सूचितं भवति २२ ननु सुखदुःखविवेकाविवेकशूरत्वभीरुत्वादिगुणाः स्वकृतकर्मविशेषैरहं ममेति

पश्यत्यहमेवेदं सर्वमिति सर्वं स्वयमेव पश्यति यदा तदैव स्वरूपागमनं मोक्षगमयोरिव ब्रह्मवेदनतत्फलयोरंत
२८ रालाभावात् यस्मिन् क्षणे सर्वमात्मानं पश्यति तत्क्षण एव ब्रह्मवित्तमो यतिः ब्रह्म संपद्यते ब्रह्मभावं गच्छ
ति स्वस्योपाधिकृतपरिच्छेदराहित्येन पूर्णात्मनावस्थितिरेव ब्रह्मभावस्तं प्राप्नोतीत्यर्थः ३० ननु समं सर्वे
षु भूतेषु तिष्ठंतमिति भूतेष्वात्मनो व्याप्य स्थितत्वे सत्याश्रयनाशादाश्रितस्यापि नाश इति न्यायेन स्वाश्रयभूतेषु
37 तेषु नश्यत्सु सत्स्वाश्रयिणोप्यात्मनो नाशप्रसंगात् दारुणि नष्टे दहनस्यापि नाशो दृष्टस्तद्वदुपाधिनाशादुपहितस्यापि
नाशः स्यात् अभ्यागत्यात तदधिष्ठितसारथिनोपि गमनदर्शनात् प्रकृत्या कर्मसु क्रियमाणेषु सत्सु तत्स्थस्याप्यात्म
नः कर्मकरणात्तत्फलानुभूतिश्च स्यात्कथमात्मनोऽकर्तृत्वं नित्यत्वं चेति सिंहावलोकनन्यायेन अतीतश्लोकद्व
यार्थमाशंक्यात्मनोऽजत्वान्निर्गुणत्वाच्च भूतानां नाशे सत्यपि न विनाशोऽस्ति कूटस्थत्वादात्मनो विक्रियाऽसंभवा
त्कर्तृत्वादिरपि न संभवतीत्याह ॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोपि कौंतेय न क
रोति न लिप्यते ३१ न विद्यते आदिरुत्पत्तिकारणं निमित्तमुपादानं वा यस्य सोऽनादिरयमात्मा न तस्य कश्चिज्जनिता न
चाधिप इति जनयितृभावश्रवणान्निष्कारणकः यद्वा न विद्यते आदिरादिमान्विकारो जनिलक्षणो भावध
र्मो यस्य सोऽनादिः निरवयवत्वादजः अजो नित्य इति श्रुतेः अनादेर्भावोऽनादित्वं तस्मात् यत्सावयवं तदादिम
त् यत् आदिमत् तद्विकारि यद्विकारि तच्चेति भूतजातं तस्मिन् स्वोपाधौ भूतजाते नष्टे सत्ययमात्मा निरवयव
त्वेनानादित्वान्न व्येतीत्यव्ययः सति कारणे कारणनाशात्कार्यस्यापि नाश इति न्यायेन भूतानामिवात्मनोऽपि नाश
प्रसज्येत तदभावादाश्रयनाशे सत्याकाशवन्न व्येतीत्यव्ययः नाशरहित इत्यर्थः अविनाशी वा अरेऽयमात्मा २८

च यातिनान्य इत्यर्थः श्लोकत्रयेणापि सर्वभूतस्थमात्मानमिति श्रुतन्यायेन साक्षात्सर्वभूतेष्वात्मानं सममेव पश्य
तो यतेर्मुक्तिरिति सूचितं भवति २९ ननु समं सर्वेषु भूतेष्विति समं पश्यन् हि सर्वत्रेति भूतानामात्मन आधाराधे
यत्वप्रतिपत्तौ सत्यां द्वैतमेवापतति कथमेवं द्वैतदर्शिनस्ततो याति परां गतिमिति कैवल्यसिद्धिः प्रतिपाद्यत इत्याशं
कायां न केदारे कल्पितसेतूनामंतराले भूमिरिति प्रतिसेतवोपि भूमावेवतिष्ठंतीति विचार्यमाणे भूमयः सेतवोपि सर्वं
मृदेव भवति यथा तथा कल्पितभूतेष्वात्मेति इति भूतान्यप्यात्मनीति इति श्रुतियुक्तिभिर्विचार्यमाणे सर्वमात्मै
व भवत्यतश्चात्मव्यतिरिक्तवस्त्वभावादात्मैकत्वदर्शिनं विदुषः संभवतीति तेन ब्रह्मसंपत्तिश्चेति बोधयति ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति ततएव च विस्तारं ब्रह्म संपद्यते तदा ३० नित्यनिरंतरसमाधिनिष्ठा
निर्मुलितद्वैतप्रत्ययो ब्रह्मविद्यतिर्यदा यस्मिन्काले भूतपृथग्भावं भूतानामाकाशादीनां तत्कार्याणां च स
र्वेषां पृथग्भावं भिन्नपदार्थवत्प्रतीतिविषयत्वं पृथक्त्वमेकस्मिन्नेवात्मनि कल्पितं सत्यवद्वैचित्र्यमिव दारु
णि गजमिव प्रतीयमानमपि आत्मसत्ताव्यतिरेकेण पृथक्सत्ताभावादात्ममात्रमेवानुपश्यति श्रुत्याचार्यो
पदेशजन्यज्ञानानुरूपेणात्मैवेदं सर्वमिति पश्यति प्रकृतिं तत्कार्यं च सर्वमारोपितमधिष्ठाने आत्मनि स्वस्वरू
पेणासंहृत्य प्रविलाप्यात्मानमद्वितीयं पश्यतीत्यर्थः यस्माद्यदुत्पद्यते तत्तन्मात्रमेवेति न्यायेन प्रतीतिदशा
यामपि प्रपंचस्यात्ममात्रत्वं दर्शयितुमाह ततएवेति तस्मात्सर्वमभवदिति मंत्रबलात्तत एव तस्मादात्मनः सका
शादेव विस्तारं द्वैतप्रपंचस्य विस्फुरणं च पश्यति मृदः सकाशादुत्पन्नघटादेर्मृन्मात्रत्वं प्रत्यक्षेण दृष्टं त
द्वदात्मनः सकाशादुत्पन्नभूतविस्तारस्य प्रतीतिदशायामप्यात्मसत्ताव्यतिरेकेण स्वतः सत्ताभावादात्ममात्रत्वं

पापकर्त्रीसदृस्थितिमात्रेणाकर्तुरपिपापलेपप्राप्तिःस्मर्यते तन्न्यायेनात्रापिस्यादित्याशंक्याह नतत्संयोगीति
संयोगीत्वस्यपापलेपप्राप्तिहेतोस्तत्रोपरूपमाणत्वात्तत्संगिनःपापलेपःसंभवेत् नत्वसंयोगिनोऽतिदूरव
२९ त्तिनोयथात्रापिनिरवयवत्वेनातिसूक्ष्मत्वादात्मनोदेहेंद्रियादिभिस्तत्कृतकर्मभिश्चसंयोगाऽसंभवात् न
तत्कृतकर्मलेपइत्याह नलिप्यतइति देहेंद्रियतद्विकारतदवस्थातद्धर्मसाक्षित्वेनाऽविक्रियात्मना
स्थितआत्मास्वयमसंगत्वान्नतत्कृतकर्मभिर्लिप्यतइत्यर्थः ३१ सर्वव्याप्युपाधिःस्वप्रारब्धानुसारेणावर्त्त
३४ तांतत्रस्थोप्यात्मातद्धर्मकर्मावस्थाभिःकिंचिदपिकिंचिन्नस्पृश्यतएवेतिदृढनिश्चयवद्भिर्विद्वद्भिर्वि
ज्ञैरात्मन्येवात्मभावापन्नैःस्वेषांकर्तृत्वभोक्तृत्वादिभ्रममुत्सृज्यमौनेनसदात्मानंदरसास्वादएवक्रियता सा
मितिसूचयितुंश्रीभगवानुक्तमप्यात्मनउपाधिकृतकर्मलेपाभावमेवपुनरपिसदृष्टांतंप्रतिपादयतिमंद
प्रज्ञानामपिकर्तृत्वभोक्तृत्वभ्रमविच्छित्तये ॥ यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते सर्वत्रा
वस्थितोदेहेतथात्मानोपलिप्यते ३२ सर्वगतंआकाशस्यनिरवयवत्वेनगमनासंभवात्सर्वंयेनगतंव्याप्तं
तत्सर्वगतंसर्वेष्वपिघटमठादिषुमूर्त्तद्रव्येषुदुष्टेष्वदुष्टेषुचसर्वत्रबहिरंतश्चव्याप्यवर्त्तमानमप्याकाशं
स्व सौक्ष्म्यात्स्वव्याप्यद्रव्यापेक्षयाऽयमतिसूक्ष्मत्वात्तत्तद्द्रव्यगुणदोषैःसुगंधादिभिश्चवर्षवातातपवन्हिधू
मरजःपंकादिभिरपियथानोपलिप्यते लेपोलेपकलेयनक्रियागविषयत्वात्केनचिदपिलिप्तंनभवतिनस्पृ
श्यतइत्यर्थः तथासर्वत्रसर्वेषुदेहेदेहेषुजातावेकवचनंदेवमनुष्यादियोग्यानुच्चावचशरीरेषुसर्वतोबहि
रंतर्व्याप्यवर्त्तमानोप्यात्मासौक्ष्म्यात् सूक्ष्मात्सूक्ष्मतरंविभात्यस्तिश्रवणात् अव्यक्तमहदादेरपिपर २९

इत्यात्मन उपाधिनाशेपिनाशाभावप्रसवणात् निर्गुणत्वाच्च गुणाः सत्वादयः शब्दादयो वापी स्थादयस्तेभ्यो निर्गतो
यः स निर्गुणः। यद्वा गुणाः गुणकार्यभूताः प्राणादयः षोडशकलाशब्दवाच्यास्तेभ्यो निर्गतत्वान्निर्गुणो निरव
यव इत्यर्थः। निर्गुणस्य भावो निर्गुणत्वं तस्मात् यः सगुणः सगुणव्ययायेति भूतगणः अयं तु निर्गुणत्वान्नव्ये
त्यात्मसति गुणव्यये कारणव्यये च वीयात्तदभावान्नव्येतीत्यव्ययो नित्य इत्यर्थः। नित्यो नित्यानामिति श्रुतेः। नन्वात्म

७५

नोनादित्वेन निर्गुणत्वेन च कारणगुणनाशकनाशासंभवेपि घटादिवत्स्वरतो वा वायुवत्स्वतो वा नाशः स्या
दित्याशंकायामाह परमात्मेति परमश्चासावात्मेतीदं हेतुगर्भितं विशेषणद्वयं आत्मा स्वव्यग्न्यादिभ्यो न नश्य
ति परमत्वात् यन्नैवं तन्नैवं यथा देह इति परमत्वमव्यक्तादपि निरवयवत्वेनातिसूक्ष्मत्वं निरतिशयमहत्त्वं
च तस्मान्नाशयितुरविषय इत्यर्थः। आत्मत्वात् स्वतो नाशरहितः आत्मत्वं प्रत्यक्त्वम् अहंप्रत्ययार्थता सर्वावस्था
सु सर्वदा सर्वैः अहमस्मीत्यात्मसत्तया अनुभूयमानत्वात् बुध्यादिषु स्थूलान्तेषु प्रतिक्षणं विपरीतभावं गतेषु
सत्स्वपि यस्मादेवं तस्मान्निरवयवो निराकारो नित्यो निष्क्रियः परिपूर्णश्चायमात्मा शरीरस्थोपि यद्यप्यात्मनः स्वे
महिम्नि तिष्ठतः परममहतोधिकरणं नास्ति तथापि शरीरेष्वेवात्मोपलब्धेर्दर्शनाच्छरीरस्थ इत्युच्यते ब्रह्मादि
स्तंबपर्यन्तशरीरेषु घटादिष्वाकाश इव वर्त्तमानोप्यात्मा स्वयं तेषु प्रवृत्तेष्वपि पुण्यपापतत्फलदर्शनं कर्म पालिंचिन्न
करोति किंतु शरीरे बुद्ध्युपहित इति साक्षित्वेन तत्स्थीतिष्ठति वायुनाचलत्सु वृक्षेषु तत्स्थ आकाश इव न किंचिच्चेष्टते।
निरवयवस्य परिपूर्णस्य चलनासंभवादित्यर्थः। वृक्ष इव स्तब्धो दिवि तिष्ठतीति श्रुतेः। ननु कर्त्तुः स्वस्यात्मनः स्वतः
कर्मकरणा भावेपि देहे तिष्ठतेस्तत्संयोगाद्देहेंद्रियादिभिः क्रियमाणैः कर्मभिर्लेपः स्यात्तत्संयोगी चपंच महति

भास्यत्वभासकत्वादिधर्मैर्वैलक्षण्यद्योतनार्थो ऽप्यतः क्षेत्रज्ञस्ततः क्षेत्राद्भिन्न आत्मापि क्षेत्रं महदादिसर्वविकारांतं पे
नामरूपजातिक्रियागुणविशेषैरनेकभेदभिन्नं कृत्स्नं तत्तदवस्थात तत्कर्मकर्मभिः सह सर्वं प्रकाशयति स्वस्मिन्न ध्यस्ता
नां महदादिस्थूलांतानां सर्वविकाराणां सत्तां स्फूर्तिं च प्रयच्छतीत्यर्थः एतेन क्षेत्रज्ञस्यात्मनः क्षेत्रतद्विकारतद्धर्मतत्क ३०
र्मतदवस्थाज्ञातृत्वं चेतनत्वं नित्यत्वं सर्वक्षेत्रेष्वेकत्वं बुध्यादिसर्वजडपदार्थप्रकाशकत्वं प्रकाशस्वरूपत्वं स्वप्रकाशत्वं बु
द्धित्वाद्यविषयत्वमेकरूपत्वं सर्वव्यापकत्वमसंगत्वमविक्रियत्वमकर्तृत्वमकारयितृत्वमभोक्तृत्वमभोजयितृत्वं स
र्वद्रष्टृत्वं सर्वदृश्यधर्मशून्यत्वं स्वसन्निधिमात्रेण सर्वप्रवृत्तिहेतुत्वं सर्वभास्यगुणदोषास्पृष्टत्वं सर्वसाक्षित्वं स्वसाक्षात्का ३१
रेण तमस्तत्कार्यनिवर्तकत्वं च प्रतिपादितं भवति एतेनोक्तलक्षणैः क्षेत्राद्भिन्नः क्षेत्रज्ञ आत्मा स्वात्मना सूक्ष्मबुद्धिभिः यु
क्तिकुशलैर्योगिभिः सम्यगवगंतुं शक्यत इति सूचितं भवति ३३ यावानध्यायार्थस्तावंतमर्थं संक्षेपेण प्रतिपादयन्न
ध्यायमुपसंहरति ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ३४ क्षेत्रक्षेत्रज्ञ
योरिदं शरीरं कौंतेय क्षेत्रमेतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति प्रतिपादितयोः प्रकृतिपुरुषयोरेवं महाभूतानीति ज्ञेयं यत्तदित्यादिवा
क्यैः प्रतिपादितप्रकारेणांतरं ज्ञेयत्वज्ञातृत्वादिविशेषणैर्वैलक्षण्यं स्वात्मतया तत्र क्षेत्रज्ञं च भूतप्रकृतिमोक्षं च भूतभू
तशब्देन व्यक्तं नामरूपात्मकं संछादितं जगदुच्यते प्रकृतिपदेनाव्यक्तमस्पष्टनामरूपमसंछादितं तत्कारणमुच्यते तयोर्भू
तप्रकृत्योर्मोक्षं ज्ञसत्त्वान्नासदित्युच्यत इत्युक्तप्रकारेणाभावापादनं च ज्ञानचक्षुषा निरूपणममानित्वादिसाधनसंपत्त्या तीव्रमोक्षे
च्छया च सम्यक्कृतश्रवणादिना समुत्पन्नं यज्ज्ञानं क्षेत्रक्षेत्रज्ञयोर्याथार्थ्यग्रहणक्षमं मतिसूक्ष्मं तदेव चक्षुस्तेन ज्ञा
नचक्षुषा ये मुमुक्षवो यतयो विदुः प्रकृतितत्कार्यविलापनाधिष्ठानभूतं निर्विशेषं नित्यशुद्धबुद्धमुक्तस्वभावं सदानं
देकरसमपूर्वमनपरमनंतरमबाह्यमद्वितीयं परं ब्रह्माहमेवेदमिति स्वात्मना विदुस्ते परं परमपुरुषार्थं विदेहकैवल्यं यांति प्राप्नुवंतीत्यर्थः
३४ इति श्रीमदानंदात्मसरस्वतीभगवत्पादशिष्य [illegible] त्रयोदशोध्यायः १३॥

मत्स्वरूपत्वाद्देहेंद्रियप्राणमनोबुध्यादिभिरधुनापूर्वं शतकोटिजन्मभिः कृतैः कर्मभिः पुण्यपापैर्नोपलिप्यते न किंचि-
त्स्पृश्यत इत्यर्थः एतेन सम्यग्दर्शनविध्वस्ताविद्यातत्कार्याणां ब्रह्मविदां यतीनां कचिदाहारादिनिमित्तकेन क-
र्मणा येन केनापि च लेपो नास्ति ततः कैवल्यसिद्धिप्रतिबंधकद्वैतवासनानिःशेषनिवृत्तये ध्यानं दानुभूतये च सम-
पश्यद्भिः सर्वत्रैतत्सुकरीत्या सर्वदा सम्यग्दर्शननिष्ठयैव स्थातव्यमिति सूचितं भवति न तु यथेष्टाचरणं निरुक्तत्वाच्च
न विरोधापत्तेः संन्यासश्रवणादिश्रमफलाभावापत्तेश्चातः सदा सम्यग्दृष्ट्या स्थातव्यमिति सिद्धं ३२ श्रुतियुक्त्यनु-
भूतिभिरात्मनः प्रकृतिवैलक्षण्यं ज्ञात्वा प्रकृतिमात्मनि प्रविलाप्यात्मनः साम्यमेव सर्वदा पश्यतो यतेर्विदेहमुक्ति-
रिति निश्चित्य प्रकरणमुपसंहर्तुकामः श्रीभगवान् मुक्तेरात्मनः प्रकृतिवैलक्षण्यज्ञानमेवाद्विकारणमिति मंद-
प्रज्ञानां मुक्तज्ञाने निर्विचिकित्सत्वाय पुनरपि एतद्द्योतयितुं प्राह क्षेत्रज्ञ इत्युक्तलक्षणस्यात्मनः क्षेत्रज्ञस्य क्षे-
त्रवैलक्षण्यं परं दृष्टांतेन विशदयति ॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं
प्रकाशयति भारत ॥ ३३ ॥ एक एव रविस्तेजोघन इमं भूर्भुवरादिभेदभिन्नं कृत्स्नं लोकं ब्रह्मांडं सर्वतो व्याप्य स्वते-
जसा यथा प्रकाशयति सर्वेषां पदार्थानां स्वत एव सत्तां स्फूर्तिं च प्रयच्छति सूर्येरौ वह्निजडानां घटादिसर्वप-
दार्थानां घटोऽस्त्ययमिति सत्ता च स्फूर्तिश्च संभाव्यते ततः कृत्स्नं नामरूपविशेषैरनेकधा भिन्नं ब्रह्मांडं स्वयम-
भिन्नस्वभाव एक एव सूर्यः स्वभास्यविलक्षणः [illegible] तत्संबंधरहितः सन् यथा प्रकाशयति तथा क्षेत्रमव्यक्ता-
दिस्थूलपर्यंतं समष्टिव्यष्टिलक्षणं शरीरमस्यास्तीति ज्ञेयत्वेन प्रकाश्यत्वेन च विषयीभूय तिष्ठतीति क्षेत्री क्षेत्रज्ञ
आत्मा स्वयमेक एव चिद्घनः क्षेत्री युक्तिः क्षेत्रतत्स्वामिनोरिव क्षेत्रक्षेत्रज्ञयोरचेतनत्व चेतनत्व ज्ञेयत्व ज्ञातृत्व

स्प

४०

स प्रतिष्ठा भवति ब्रह्मव्यतिरिक्तचेतनाभावात्तद्रूप आत्मा ब्रह्मेति श्रवणाच्च प्रत्यगात्मनश्च पाप्मभावे ब्रह्मत्वं प्रत्यक्तं तस्मा-
द्धिद्धयो ब्रह्मत्वं सिद्धं ॥२१॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदात्मसरस्वतिशिष्यश्रीशंकरानंदस-
रस्वतिकृतौ गीतातात्पर्यबोधिन्यां चतुर्दशोऽध्यायः १४ ॥ ॥ ॥

१५

त्वाऽसंगत्वनिर्वैरत्वलक्षणैः साधनैः सततयुक्ताः सततं सर्वदाऽविच्छिन्नतया युक्ता विशिष्टस्वरूपं त्वां ये भक्ताः स
गुणानिष्टास्त्वां विश्वरूपं सर्वज्ञं सर्वकारणं परमेश्वरं पर्युपासते भजंते किंच अव्यक्तं शब्दादि विशे
षाभावान्न व्यज्यत इत्यव्यक्तं सर्वेंद्रियागोचरं अस्थूलमनण्वह्रस्वमित्यादि श्रुतिप्रसिद्धमक्षरं स्व
स्मिन्नध्यस्तं सर्वमहदादिस्थूलांतमश्नुत इत्यक्षरमपि निर्विशेषं त्वां परब्रह्मरूपेण ब्रह्मविदः शम
दमादिभिरद्वैतत्वादिभिः सत्साधनैः संपन्नाः संतः पर्युपासते निरंतरमनुसंदधते तेषामेतेषा
मुभयेषां च मध्ये के योगवित्तमाः योगः समाधिस्तं विदंति प्राप्नुवंतीति योगविदस्तेषां मध्ये केऽति
शयेन योगिन इत्यर्थः ॥ अत्रायमभिप्रायः मुमुक्षूणां सगुणोपासनं निर्गुणोपासनं चोभयम
पि मोक्षसाधनत्वेनोपदिष्टं तत्र सुकरं किं साक्षान्मोक्षहेतुः कस्तदुत्तममिति ॥ १ ॥ एवं पृ
ष्टवतेऽर्जुनाय कृष्णः प्रथममेवोत्तमं साधनं सुकरं चिंतयित्वा कृष्णसेति स्वपन्ना कृष्णस्त
वेऽर्जुनायादिममेव प्ररोचनार्थं कमुपदिशति ॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां
नित्ययुक्ता उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥ मोक्षस्वरूपे मयि मनःस
म्यगावेश्य मोक्षमेव वांछंतः सतत इत्यर्थः ॥ यद्वा मयि मत्स्वरूपे दृष्टे स्पृष्टे श्रुते मतं च स
र्वं ब्रह्मैवेति सर्वत्र समत्मानत्वग्रहणात् एवं मन आवेश्य सम्यक् निधाय यद्वा मयि मध्या
न एव नतु विपर्यये चित्तेन मन आवेश्य नित्ययुक्ताः मत्कर्मकृत्वादि धर्मेषु नित्यमजस्रं युक्ता

41

रामा०
१

॥श्रीगणेशाय नमः॥ नवमाध्यायांते मन्मना भव मद्भक्त इति निजभक्त्या स्वोपास्तिः कर्तव्येत्यु-
क्ते तत्र स्वरूपे ज्ञाते स्वरूपोपास्तिः कर्तुं शक्या तद्रूपाकांक्षायामर्जुनाज्ञानाद्युपासनार्थं विभूत्यादि विभू-
तिविशेषाननुपरिस्फुटं त्रै मया सर्वाधिकारिणामेकांशेन स्थितो जगदिति विश्वात्मकमैश्वरं रूपमु-
पास्यमिति सूचयित्वा परे तद्रूपं मुमुक्षूपासनीयं नरहं पश्यामीति प्रार्थितवते ऽर्जुनाय तद्दर्श-
यित्वा ममैतद्रूपमुक्तसाधनसंपन्नाः समुपास्ते सज्ज्ञानेनैकेन च लं परमपुरुषार्थं प्राप्नोतीति
स्वोपास्ते महाफलत्वं प्रतिपाद्याधुना सगुणनिर्गुणोपासकानां तारतम्यविशेषं सगुणो-
पासकानां स्वोपास्तेः साधनांतराणि च निर्गुणब्रह्मविद्यासमुत्पन्नज्ञानस्यार्थं साधनविशे-
षं च निरूपयितुं द्वादशोध्याय आरभ्यते । तत्राशेनात्ययातेत्तिपजेवसादिना परंब्रह्म ... उक्ते-
यत्वेनोक्ता निर्गुणोपासना भवार्जुनतद्रूप इति महात्मानस्तु मां पार्थेति मद्भक्ता यांति मामपी-
ति च परस्य ब्रह्मण उपासनं तत्फलं च निरूक्तं सगमेकमेलवमेरक्तमेरकार ... सगुणा
ब्रह्मणोपि स्वरूपमुपासनं च सफलं प्रतिपादितं तत्तद्रूपं ... तयोः परस्परविशे-
षाविज्ञाते मुमुक्षुः ... प्रवर्तेरन्निति तदुभयोः सगुणनिर्गुणोपासकानां तारतम्यविशेषं ज्ञा-
तुमिच्छया भगवंतं पृष्टमर्जुन उवाच । एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्ष-
रमव्यक्तं तेषां के योगवित्तमाः ॥ १ ॥ एवमेवंप्रकारे ... तूलसरमतत्व...

लनाय स्वांतरङ्ग इत्यर्थः ॥ तत एव सर्वत्र प्रपंचे समबुद्धयो ब्रह्मदृष्टयः संतो ये तु [illegible] पतयो ब्रह्मविदः स्व
यमव्यक्तं शब्दस्पर्शरूपाद्यभावान्न व्यज्यत इत्यव्यक्तं सर्वेन्द्रियागोचरं तत एवानिर्देश्यं वागादिभिरिदमित
ति निर्देष्टुमशक्यं सर्वत्रगं गगनवन्निराकारं तत एवा परिच्छिन्नमत एव कूटस्थं कूटवद्दृकंप्यतया
तिष्ठतीति कूटस्थं तत एवाचलं चलनवर्जितं तत एव ध्रुवं शाश्वतमेवं लक्षणमक्षरं परब्रह्म पर्युपा
सते सर्वदानुसंदधते सर्वे निर्विशेषं ब्रह्मैव पपसंतीत्यर्थः ते ब्रह्मनिष्ठा मामेव सच्चिदानंदैकरसं
परब्रह्म प्राप्नुवंति ॥ सगुणोपासकाः पूर्वोक्ता भक्ताः स्वगम्यादिदेवान् प्राप्य क्रमेण मां प्राप्नुवंति अक्षरो
पासकास्तु कोंतिदेवतांतरप्राप्तिं च विनासाक्षात् ब्रह्मैव मां प्राप्नुवंतीत्यर्थः ॥ यत एव ततः साक्षाद् ब्रह्मप्रा
प्तिरेव ब्रह्मविदामब्रह्मविदां च युक्ततमत्वमयुक्ततमत्वं च विस्पष्टयति पश्चापरान्नपेक्षया तदपे
क्षया च राजसान्निध्ये प्राप्तवतामाप्ततमत्वमनाप्ततमत्वं च तत्प्राप्तिरेव विशदयति तद्वत्तेन युक्ततम
त्वं पूर्वेषामौपचारिकमिति सिद्धं निर्गुणोपासकेरवसाक्षात्साधनत्वे ब्रह्मप्राप्तः सूचितं भवति एतेन
सदसद्विवेकवतां पंडितानां प्रत्यक्षात्मनोऽतीव मोक्षे [illegible] सावतीसवकर्मसंन्यासपूर्वकं श्रवणादि
नाब्रह्मज्ञानं तदुपास्तिरेव कर्त्तव्याविदेहकेवल्यसिद्धय इति सूचितं भवति ॥ ४॥ अयुक्ततम
नामक्षरोपासकानां क्लेशाधिक्यमिति सूचयितुमाह क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसामव्यक्ता
हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५॥ यद्यपि व्यक्तस्य ममेश्वरस्योपासकानामपि मलक्षेपकत्वादि ध
र्मसिद्धो वस्त्वेवाधिकक्लेशास्तथाप्येतदपेक्षयाव्यक्तासक्तचेतसामव्यक्ते सर्वेन्द्रियागोचरे अदृ
श्यादिगुणकेऽतर्क्ये चित्तं यमे ये परब्रह्मणा सक्तं तद्भावापत्ये यतमानानां चेतो येषां तेषामव्यक्तासक्तचेत रामा०
सां निराकारं परब्रह्म निर्दिध्यासपतां यतीनामाविषयमागछत आश्रमधर्मकतीयमनियमाद्यभ्यासकृतो ऽ २

निपतांभूत्वापरमानिश्चलपाञ्चस्थ्याऽत्क्रेसाधनैः परमेश्वरोपास्तौ कृतायां चित्तशुद्धिस्ततो ज्ञानं च ततो मो
क्षोऽपि सिध्यतिवानचेमोदि संज्ञापनिर्मुक्तपाऽऽस्ति रूपबुध्यासमुपेताः संतः स्वधर्मस्वाश्रमं स्वजनं स्वल
क्षणं चापरित्यज्यैवातिमनोयोगेन मां विश्वरूपं सर्वज्ञं सर्वात्मकं परमेश्वरमुपासते सदा सर्वत्र सर्वं मामेव भा
वयंतिते एव युक्ततमा योगिश्रेष्ठा इति मे मता मयानिश्चिता इत्यर्थः ॥२॥ एवं वर्त्तमानानां मोक्षैककाम
नयामलकर्मकृत्वादि मोक्षसाधनपरिनिष्ठितानां वा सद्यो सर्वमामेव भावयतः संतोये कालेन
नयंतितेषामेव युक्तयोगित्वं श्रेष्ठत्वमिति मभिप्रायः ॥ एतेन स्वाधिकारानुरूपं सगुणोपासनमे
वारुरुक्षोर्मुमुक्षोः सुकरं स्वार्थं साधनमिति सूचितं भवति ॥२॥ मुमुक्षूणां मंदप्रज्ञानां सगुणो
पास्त्योपरुद्धचित्तसिद्धये तेमे युक्ततमा इति कर्मयोगिनस्तुत्वाऽधुना परब्रह्मणः स्वरूपं साधकानां
साधनसंपत्तिं च प्रतिपादयन्निर्गुणोपासकानां युक्ततमत्वं तदुपास्तेः साक्षान्मोक्षैकसाधनत्वं च फ
श्रि८ लप्रकाशाने नस्वपमेवसिध्यतीत्याह ये त्विति द्वाभ्यां ॥ येत्वक्षरमनिर्देश्यमव्यक्तं
पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ॥३॥ संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ते प्रा
प्नुवंति मामेव सर्वभूतहिते रताः ॥४॥ उपासकानामुपास्तेरूपास्यस्य च क्रमात्साधनतः फलतः स्व
रूपतश्च पूर्वस्मादुत्कर्षद्योतनार्थस्तुशब्दः ॥ इंद्रियग्रामं संनियम्य सनिरुध्य विषयग्रहणात्प्रे
दिते च चलितेषु मनोपि चलतीति तेन समाधिसिध्यते ततइंद्रियाणि विषयग्रहणाद्वैमुख्यं संपाद्येत्य
र्थः सर्वभूतहिते मनुष्यकपिपीलिकादीनां च सर्वेषां भूतानां हिते उपद्रवाभावे रतो जनः कृपानैष्ठुर्य
भावस्पृशतामितिन्यायेनाहितादनाचरणेचरेतानिरताः यद्वा सर्वेषां ब्रह्मादिस्तंबांतानां भूतानां प्राणिनां
हिते परमप्रेमास्पदत्वात्प्रियतमे प्रत्यगात्मनि रताः सर्वत्र प्रत्यग्रूपेणास्थितमात्मानं सर्वात्मकोहमितिस्वा
त्म

य्यावेशितचेतसां ॥७॥ मयि विश्वरूपे एष सर्वभूतांतरात्मेत्यादि श्रुतिप्रसिद्धे परमेश्वरे स्वावेशितं सर्वत्र लैवेति
भावनायामेव स्थापितं चेतो येषां तेषां सर्वदा मद्ध्यानमेव भजतां मद्भजनेन संप्राप्तसत्त्वशुद्धीनां तेषां मद्भक्ता
नां नचिरादेव मदुपास्त्या सम्यक् चित्तशुद्ध्युत्पत्तिक्षणादेव तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि
बुद्धियोगं तं येन मामुपयांति ते तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वते
त्येकं प्रकारेणाहं परमेश्वरः सम्यग्दर्शनलक्षणं ज्ञानयोगं दत्त्वा ज्ञानदीपेनाज्ञानध्वांतविध्वंसनेन चकला
सम्यक् निर्गुणब्रह्मनिष्ठां संपादयेमर्थः मृत्युसंसारसागरात् त्रिपंतेजायंते पुनः पुनः प्राप्तिर्नोपसात्त्व
मत्फरज्ञानं स चानर्थकारणं तेन युक्तः तत्कार्यभूतो हं ममेत्यादिप्रवृत्तिलक्षणः संसारः सोपनिरवधि
कत्वात् दुस्तरत्वात्तापत्रयवडवानलमयत्वाच्च सागरवदुत्तवतीति मृत्युसंसारसागरस्तस्मादुद्धर्तास्मि स
मुद्धारणकर्त्ता भवामि ब्रह्मज्ञानं तन्निष्ठां तत्प्राप्तिं च यथासिद्धेन तथानुग्रहं करोमीत्यर्थः एतेन सगुणो
पास्तिरंगं निर्गुणोपास्तिरंगीति योः फलं तु मोक्ष एव मत्प्रसादैकलभ्यमिति सूचितं भवति ॥७॥ यस्मादक्ष
रज्ञानं तत्फलं च मत्प्रसादैकलभ्यं मत्प्रसादो पि मदुपासनैकलभ्यस्तस्मात् मय्येव मन आधत्स्व मयि बुद्धिं
निवेशय निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥ तत्कारं प्रपञ्चसंक्षिप्तं कर्तृशक्ति तेन तथापि स्वस्वब
द्धमाकरणा तुल्यत्र काश्यानार्थमत ऊर्ध्वमित्युक्तं मय्येव विश्वरूपे न तु निराकारे केवले ऽक्षरे मदुपास्ता
विनातरज्ञाने सात दुपासेर्दुर्लभत्वान्मय्येव गोचरे सगुणे विश्वरूपे मन आधत्स्व सर्वं न वृत्तेर्वि
षयमामेव कुरु न तु शब्दादिकमित्यर्थः किंच मय्येवात्मलक्षणो बुद्धिं वस्तुतत्त्वावधारणशीलामंतः
करणवृत्तिविशेषात्मिकां निवेशय दृढं सर्वत्र लैवेति निश्चयवती बुद्धिः सदा मामनुसंधत्ते त्यर्थः अ
त ऊर्ध्वं निर्विशेषज्ञानं प्राप्य तद्बलेन देहसंबंधमुत्सृज्य निर्विशेषो ऽमलना मय्येव निर्विशेषे परे ब्रह्मणि

४३

रा॰ मा॰ ३

सत्त्वरूपनिरासः कृतो निराकारे ब्रह्मणि मनस्थापनकृतः क्लेशोऽधिकतरो भवति एकैकस्य साधनस्य सिद्धे
र्दुःष्करत्वात्तत्राप्यनात्मन्यहंभावपरित्यागो ब्रह्मणापि कर्तुं न शक्यते तथा ब्रह्मणि जगत्प्रपञ्चपरित्यागोपि त
त्यागस्य निरन्तरं क्लेशसाध्यत्वात् ब्रह्मविद्यामध्यधिकतर एव क्लेश इत्यर्थः इममर्थं स्वयमेव विस्पष्टयति श्रीभ
गवान् क्लेश इति हि यस्मात्कारणाद् व्यक्ता [illegible] गतिस्तद्व्याप्तिर्देहवद्भिर्देहतदभ्यासवद्भिः दुःखिर्दुःख
पयात्तथावाप्यते दुःखेनानन्तक्लेशेन प्राप्यत इत्यर्थः न हि सामान्यप्रयत्नेन देहाद्यहंकारः ध्वंसो
निवर्त्तते चिरकालनित्यनिरन्तरादरपूर्वकनिर्विकल्पसमाधिनिष्ठाविशेषाधिक्येन विना सति पासिन्लिः
त्रोषविनष्टे ब्रह्मणापि वा लम्बसिद्धयस्तोपक्रममस्कारासक्तचेतसां क्लेशोऽधिकतरत्वं तेषां पादेहाद्यहंकार
विच्छित्तिः साधनसंपत्तिः साऽग्रे कथ्यते ॥ ५ ॥ यस्मादेवं तस्मादनायासेनाक्षरोपास्तिसिद्धेः कारणं सगु
णोपास्तिः साऽवश्यं मुमुक्षुभिः कर्तव्या ये तु तन्निष्ठास्ते सुखेनाक्षरोपास्तितत्सिद्धिं च गच्छन्तीत्याह य साधनसा
धनभावमंगीकृत्य साधनस्यैवावश्यकर्तव्यतां सूचयितुमाह ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्ये
नैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥ तु शब्दः पूर्वोपासकव्यावृत्त्यर्थः ये तु सगुणोपासकामुमुक्षवः सर्वा
णि वैदिकान्यवैदिकानि च कर्माणि मयि परमेश्वरे संन्यस्य मदर्पणं कृत्वा मत्पराः मदेकप्रवणाः सं
तः पूर्वोक्तं अहमेव विश्वरूपः परमात्मा परः स्वस्मादन्यः श्रोतव्यो द्रष्टव्यः स्पृष्टव्यो मंतव्यो ज्ञातव्यश्च
पद्रष्टा योपि पश्चात्ते मत्पराः स्वव्यतिरिक्तं वस्तुजितसर्वत्र मदेकपर इत्यर्थः तत एवानन्येन न विद्यते मद्व्यतिरि
क्तं बुद्धेरालंबनं यत्र सोऽनन्यस्तेनैव योगेन समाधिना मां विश्वरूपं सर्वात्मकं परमेश्वरं ध्यायन्त उपासते मे
हाकारव्यासा सदा मामेव ये भजन्तीत्यर्थः ॥ ६ ॥ एवं सगुणोपास्त्या शुद्धान्तःकरणानामक्षरोपास्तिस्तत्फलं प्राप्तिश्च
सुलभेति सूचयितुं सगुणोपास्तेः फलमाह तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात्पार्थ म

मो भव यथा राजार्थं भटस्तथा मदर्थमेव सर्वं कर्म कुर्वित्यर्थः एवमीश्वरार्थमेव कर्म कुर्वतस्तदनुष्ठानसफ
लमाह मदर्थमिति नियमेन श्रद्धयाच मदर्थमेव सर्वाणि कुर्वन्नपि तदनुष्ठानसंभावितचित्तशुद्धि
जन्यज्ञानद्वारा सिद्धिं कैवल्यसिद्धिं प्राप्स्यसीत्यर्थः एतेनात्र सेश्वरोद्देशेन सर्वकर्माचरणमभ्यासापे
क्षया मुमुक्षोः सुखसाधनमिति सूचितं भवति ॥ १०॥ उक्तलक्षणकर्मानुष्ठानेप्यसमर्थस्याप्यत्यंत
मन्दबुद्धेः साधनांतरमाह सर्वदा मदुपासनमेव मुमुक्षोरवश्यं कर्तव्यमिति सूचयितुं अथैतद
प्यशक्तोऽसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११॥ अथवोक्तरीत्या
५५ मामुद्दिश्यैव कर्मप्राधान्येन कर्तुं यदि त्वं न शक्नोषि तर्हि यतात्मवान् यतः संयतः कामसंकल्पाविमु
खीकृत आत्मा चित्तं यस्यासौ इति यतात्मवान् नियतचित्तो भूत्वा मद्योगमाश्रितः कर्मणानेन प्रीणा
तु भगवानिति मयि परमेश्वरे क्षिपमाणानां सर्वेषां कर्मणां योजनं मद्योगः मयि सर्वकर्मसमर्पणात् सर्वक
र्मसंन्यासः इति यावत्तमाश्रितः सन् ततः समनुष्ठितकर्मणां मत्समर्पणानंतरमेव सर्वकर्मफलत्यागं कृतानां
सर्वेषां कर्मणां यानि फलानि तेषां त्यागः संन्यासस्तं कुरु कर्मफलेषु कामं परित्यजेत्यर्थः भगवत्समर्पितेषु स
त्सु कर्मसु परार्थेष्विव फलकामासंभवाद्यथा सर्वकर्मपरित्यागः तथैव तद्भक्तिरित्यभिप्रायः ए
तेन कर्मफलेषु सुतरां कामं परित्यज्येश्वरार्पणबुद्ध्या विधिवत्कर्माचरणमतिमूढस्यापि मुमुक्षोः सुखसा
धनमिति सूचितं ॥ ११॥ एवं यतात्मवान् पूर्वकृतं सर्वकर्मफलत्यागं कुर्वित्युपदिश्याथैवं मुमुक्षोरपे
क्षितस्वपुरुषार्थसिद्धये स्वविमृश्यादर्पितुं सर्वकर्मफलत्याग एव सर्वेभ्यो मोक्षसाधनेभ्य उत्तमसाध रामा०
नमिति तं स्तौति श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनं ७
तरं ॥ १२॥ मुमुक्षोरभ्यासात् सर्वसंन्यासपूर्वकाद्यमनियमादिश्रमसाध्याच्छ्रवणाद्यभ्यासात् ज्ञानं श्र

निवसिष्यसि निवहे ह कैवल्यं प्राप्स्यसि नात्र संशयः मद्भक्तस्य तत्र प्रतिबंधासंभवात् कैवल्यं सिध्यतीति न
वेति संदेहो न कर्तव्यः किंतु मदेकाश्रयस्य मदुपास्यचित्तशुद्धिस्तत्प्राप्त्यानंतरं न विदेहकैवल्यं च नि
श्चयेन हि नैव सिध्यतीत्यर्थः ॥८॥ विश्वरूपोपासनमनेकविपरीतप्रत्ययकोटिप्रतिबंधकमनेकरीत्याक
तुमशक्यानामतिमंदप्रज्ञानां साधनांतरमुपदिशति अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं अभ्या
सयोगेन ततो मामिच्छाप्तुं धनंजय ॥९॥ पृत्तावलेन ज्ञानेन धनं जयतीति हे धनंजय अथवोक्तरीत्या मयि वि
श्वरूपे परमात्मनि स्थिरं निश्चलं यथा तथा तथा चित्तं समाधातुं सम्यक् स्थापयितुं यदि न शक्नोषि तर्हि त्व
मभ्यासयोगेन विपरीतप्रत्ययानंतरं स्वकुलसजातीयप्रत्ययावृत्तिरभ्यासः तद्रूपेण यदि प्रत्ययप्रविलापनं सर्व
कं सर्वमिदं भौतिकमेवेति सर्वप्रमाणसिद्धं सर्वस्य भौतिकत्वप्रत्ययेऽचिरकालेन नित्यनिरंतरं तत्स्वपर्याप्तस
मभ्यस्यमाने सद्य सर्वत्र भौतिकप्रत्ययो विपरीतप्रत्ययानंतरितो दृढतरः समुदेति तेन मनः स्थूलं न हेतु
नांधकारादिप्रत्ययानां सर्वासनानां संक्षये सति मनः सुस्थिरं भवति एवं सर्वस्य भौतिकमात्रत्वप्रत्ययाभ्या
सः सगुणावलोपास्तिसिद्धरूपापत्त्या योगाद्यभ्यस्य तेन चाभ्यासयोगाख्याभ्यासयोगेन मनसि निश्चले
सति तत्सदनंतरं विश्वरूपं मां परमेश्वरमाप्तुं सर्वत्र भौतिकत्वप्रत्ययप्रत्यक्षा सर्वं ब्रह्मैवेति सगुणाव
लंबना विश्वरूपं ब्रह्मप्रत्ययेरूपासितुमिच्छ त्वमिच्छां कुरु सर्वं मामेव भावयेत्यर्थः ॥९॥ उक्तलक्षणाभ्यास
योगेनापि त्वमुपासितुमशक्तश्चेत्तर्हि मदनुग्रहे साधनांतरमाह अभ्यासेप्यसमर्थोऽसि मत्कर्मपरमो भ
व मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१०॥ अभ्यासेपि सजातीयप्रत्ययावृत्तिलक्षणाभ्यासेपि यदि त्वमसम
मर्थोऽशक्तोसि तर्हि त्वमभ्यासयोगमकृत्वैव नियमेन मत्कर्मपरमो मत्कर्म वैदिकं लौकिकं च सर्वं नत्वा
स्त्वार्थमीश्वरार्पणमदर्थकर्मैव कर्मपरमं प्रधानं तात्पर्यं यस्य कर्तव्यं न तु ध्यानादिकं यस्य स मत्कर्मपर

य

संयंत्रे

मदर्थे

५

एवञ्चित्तस्य शुद्धिसत्त्वापासकृदुपदेशादेवज्ञानं तेन मोक्षः सिध्यतीत्यपायेन स्वत मंस्वार्थे कर्माणि
प्रवर्त्तयितुं कर्मफलत्यागः स्तूयते श्रेयो हीत्यादिना ततो नात्र श्रुतिविरोधो नापि समयविरोधः अत्र
पद्धाम एवं वमनआधत्स्वे मा (स्प सर्वकर्मफलत्यागं ततः कुरु यतात्मवानित्यंतेन ग्रंथेन युक्तस्य
चित्तशुद्धेः परमकारणमधिकारिभेदेन मुमुक्षुभ्यो हि भेदभिन्नं सगुणोपासनं कर्त्तव्यत्वेन प्रति
पाद्य निर्गुणोपासनोपरि शुद्धबुद्धेस्तदुपास्तेः फलभूतमक्षरोपासनं कर्त्तव्यमिति बोधयितुं त
दुपासनस्य श्रवणादेरन्तरंगत्वोत्कृष्टत्वं प्रतिपादयति ॥ श्रेयो हीति ॥ अमुमुक्षोः परिशुद्धात्मन
स्त्वभ्यासः श्रवणाद्यभ्यासः श्रेयान् सगुणोपासनेभ्यः सर्वेभ्यः श्रेष्ठो भवति ज्ञानादेव तु कैवल्यमि
ति श्रुतेरेव तु शब्देनेतरव्यावृत्तिपूर्वकं ज्ञानस्यैव साक्षान्मोक्षकारणत्वावधारणात् सिद्धेः प्रकृष्टका
रणं श्रवणादिरेव ज्ञानहेतोः श्रवणादेरभावे पूर्वोपासना नैष्फल्यमेव यतस्ततोऽत्र श्रवणाद्यभ्या
सस्तेभ्यः श्रेयानुपपत्त्या यद्येवमत्यैहिककामस्य शुद्धात्मनः सर्वकर्मसंन्यासपूर्वकं कार्यमिति श्रेयः
फलं तथा बोधितं भवति आत्मा वारे द्रष्टव्यः श्रोतव्य इति संन्यस्य श्रवणं कुर्यादित्यादिश्रुतिस्मृ
तिप्रसिद्धिं द्योतनार्थो हि शब्दः अभ्यासात् श्रवणाद्यभ्यासात् ज्ञानं तज्जन्यं ब्रह्मात्मैकत्वग्राहकं
अपरोक्षं ततः श्रेष्ठतरं ज्ञानात् ... एतावदभ्यासस्य निष्फलत्वात् तदुक्तज्ञानस्य ततः श्रेष्ठतरत्वं ज्ञाना
द्विशेषपरकत्वाच्चावहनाद्बलाविद्यासन्निधौ वज्ज्ञानस्याऽवसेत्तानं संपादनीयमिति बोधि
तं भवति तस्मात् ज्ञानादपि सप्रतिबन्धात् निदिध्यासनरूपध्यानं उक्तलक्षणं विशिष्यते तत्र स्तुत
परूपतिनिष्कलंकध्यानमतो नङ्गति श्रवणाद्ध्यानेप्याप्रतिबन्धसाक्षात्कारहेतुत्वादुक्तेत्तानाहि हि
ष्टत्वं ध्यानात् कर्मफलत्यागः प्रत्यक्षे तेऽवासनया कर्मत्वेन पक्षे नेतिहृत्संजात तत्कर्मफलमिति व्या

45

वशात्मननमाविष्कृतिप्रक्रिजन्मब्रह्मलौकिकलवेदनलक्षणात् श्रेयो हि मोक्षस्तस्य श्रेष्ठतरं साधनं त्वखिलेति दिश
दः सर्वेषां स्वस्य सिद्धिर्द्योतनार्थः ज्ञानात् स प्रतिबंधकात् प्रतिबंधनिवृत्तिकारणात्वात् न तत्सजातीयप्रमाप
कत्रिलक्षणाविशिष्यते जन्मादिहेतोरविद्याकामसंकल्पादिप्रवृत्तिबंधस्य निवर्तकत्वाद्विशिष्टतरं भव
ति निरुक्तलक्षणाद्ध्यानात् कर्मफलत्यागो विशिष्यते मनोनैश्चल्यस्यातिदुर्लभत्वात् विपरीतप्रस
पत्तिवारणस्यातिदुष्करत्वात् निरंतरप्रयत्नैकसाध्यत्वाच्च ध्यानं महत्तरक्लेशसाध्यं पतस्ततो
पध्यानशक्तानां कर्मणां फलपरित्यागस्तु निरुक्तश्रमरहितत्वेन मोक्षप्रत्यंतरंगसाधनत्वे
न च ध्यानाद्विशिष्टतरं भवति काम्यमानात्मकत्वधर्मस्याभपत्तेस्त्वेव पूर्वोक्तश्रमरहितत्वेन ततः
श्रेष्ठतरं भवति प्रत्यनुष्ठानादनंतरमुत्तरकालस्य वा तदनुष्ठानतः सर्वकर्मसंन्यासेन तो नियतचित्त
स्य कामसंकल्पादिदोषनिवृत्तेः कस्य शुद्धबुद्धेः कर्मयोगिनः संसारोपशमो मोक्षः [illegible] इतीत्य
र्थः ननु कर्मफलत्यागाद्देवमोक्षोऽस्ति हेतुरतिशोकमालविततमेवाविद्यानमतद्देहभवतिनामुः
पं ध्याविद्यते पर्ना पुत्रादि [illegible] ति विरोधोत्तानामुक्तिरितिस [illegible] सम पविरोध [illegible]
ति चेत्त्यागाच्छांतिरनंतरमित्यस्य वाक्यस्य कर्मफलत्यागस्तुतिपरत्वात् स्तुतेः प्रवृत्तिप्ररोचनार्थ
त्वाच्च अथ चित्तं समाधातुमित्यारभ्य मत्कर्मपरमो भवेति मद्युक्तस्याप्यसक्यत्वे [illegible] न कर्तव्ये कर्म
णामप्यशक्यत्वे चित्तशुद्धिसाधनत्वेन करणीयतया कर्मफलत्यागस्य विधानाद् [illegible] प्रा
प्यस्ये नैव निर्दिष्टाप्रसंगा तेमत्कर्मके [illegible] मत्कर्मपदत्वादिसाधनपूर्वकविधानवैयर्थ्यापत्तेश्च आ
त्मा वारे द्रष्टव्य इत्यात्मसाक्षात्कारहेतुश्रवणादिविधेरानर्थक्यप्रसंगाच्च ततः कर्मफलत्याग
स्तुतिरेवैषा श्रवणलयापरि [illegible] कामोपि न संभवतिन दनुदय

तु कुत्सेवर्त्तते न तु गुणानुध्यानगुणास्यापि द्वेषवद्बन्धकत्वात्॥ करुणाइत्यत्र मनुवर्त्त्यऽवप्रत्यय अद्वेष्टृत्वादिध
र्मत्रितयसिद्धेः कारणमाह॥ निर्मम इति॥ परदेहवत्स्वदेहान्निर्गतो ममभावो यस्य सः निर्ममः राग
द्वेषहेतोर्ममताबन्धान्निर्मुक्त इत्यर्थः तदभावादेवाऽमुष्याऽद्वेष्टृत्वादिधर्मत्रितयसिद्धेः कारणमा
ह॥ निरहंकार इति बुद्ध्यैवाहमिति परे बुद्ध्यापि वा आत्मभावोपपादेहान्निःशेषनिर्गतो हमुद्धिर्यस्य स नि
रहंकारः निरन्तरब्रह्मनिष्ठया ब्रह्मण्येव निरूढत्वाद्देहेऽव देहाद्यावऽहंभावो विच्छिद्यते तत एव निर्म
मत्वं सिध्यति॥ न हि देहेऽहंबुद्धौ सत्यां ममतेयं दृप्या॥ इति ततो देहेऽहंभावाऽभावादेव विद्वान्निर्म
मत्वं तत एव समदुःखसुखः॥ समे अनिष्टत्वेष्टत्वबुद्धिमन्तौ करूपे रागद्वेषहेतू दुःखसुखे द्वे यस्य॥ यो
र्जनेकेषस्य ब्रह्मनिष्ठत्वेन समबुद्धिसिद्धेर्हेतुमाह॥ क्षमीति तितिक्षुराध्यात्मिकादिदुःखानां सतापविला
परहितेऽपि न सहन्तेऽशीलस्य बद्धमौल्यार्थः॥ कक्षादिवति क्षामतिक्षिप्रमानो न कुप्येत न कम्पेतेति क्षन्तः
तर्हि केऽयं स्यात् तत्रसमिमतमाह॥ संतुष्ट इति॥ सततमिति विशेषणं यच्चके नापि संबध्यते॥ सुखदुःख
योर्भानाऽवमोऽपि लाभाऽलाभयोश्च सततं सर्वदापि संतुष्टः ब्रह्मानन्दानुभवात्सन्तोषयुक्तः सन्नेव प्र
सन्नेव दृष्टो भवति॥ सदाऽऽनन्दयुक्तत्वे हेतुमाह॥ योगीति॥ सर्वदा ब्रह्मण्येवान्तर्दात्मनि चित्तैकाग्र
त्वेन स्थितिर्योगोऽस्यास्तीति योगी सदाऽऽत्मारामइत्यर्थः योगित्वसिद्धेर्हेतुमाह॥ यतात्मेति॥ सततं य
तः संयतः सम्यक् परिरोधी वशीकृतोऽन्तःकरणं इत्यात्मा देहो यस्य स यतात्मा स एव कार्य
कारणसंघातनिरोधे समाधिः समाधिमत एव विपरीतप्रत्ययनाशो जातएवसम्यक्ज्ञानं तत्वत एव वि
देहमुक्तिरतो यतेः सदा समाधिना भवितव्यमिति सूचितं॥ यद्वा यतनिरुद्धः आत्मा स्वभावो वासनाप
र्यायतात्मा॥ सततं योगी यतात्मेति विशेषणाभ्यां नैरन्तर्येन योगसिद्धेः कारणमाह॥ दृढनिश्चय इति॥ निरं

४६ त रा मा० ६

निष्कामदर्शिनं न हि रेतः सर्वत्र सर्वथा ब्रह्ममात्रोपलंभः कर्मफलत्यागो ध्यानाद्विशिष्यते ॥ एतत्त्वसमर्थमात्मैवा
भूदिति श्रवणान्निरवशेषितसर्वविक्षेपत्वात्कर्मफलत्यागः समाधिपुष्टिमतो ध्यानाद्विशिष्टत्वेनोक्तं ॥ त्यागात्सर्व
कर्मफलत्यागान्निर्विकल्पकसमाधेर्निःशेषविनष्टविपरीतवासनाग्रंथेर्विदुषस्त्वनंतरमेतद्देहपाता
नंतरमेव शांतिरात्यंतिकसंसारोपशमो ब्रह्मात्मनावस्थानलक्षणा भविदेहकैवल्यं सिध्यतीत्यर्थः ॥ अत्र प
त्रापि विशिष्यतरस्फुटत्वात्मा ... ककामस्यैतानस्याप्रतिबद्धत्वासिध्यपेसविकल्पको निर्विकल्पस्तु समा
धिरवरूपं कर्ममत्त इति बोधितं भवति ॥१२॥ निरुत्कर्षातिलक्षणावृत्तिभावं विदेहकैवल्यं प्राप्नुमिच्छया

स

पस्त्वऽद्वेष्टृत्वादिधर्मसंपन्नो भूत्वा ... निष्ठायामेव तिष्ठति स एव मद्भक्तो मम प्रियतर इति वक्तुं विद्वं
त्तोतिपतीनां सम्भृत्तानसिद्धपेवलनिष्ठाकर्तव्येति सूचयितुं सप्तभिः ॥ अद्वेष्टा सर्वभूतानां मैत्रः क
रुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥१३॥ संतुष्टः सततं योगी यतात्मा दृढ
निश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥ सर्वभूतानां सर्वेषामपि प्राणिनामद्वेष्टा द्वे
षो नामऽप्रीतिस्तामात्मन उपद्रवं कुर्वतोऽपि जंतोर्यस्य कस्यापि न करोति मनो वाक्कायकर्मभिः नान्वरतो
ऽद्वेष्टा निर्विकल्पसमाधिनिष्ठयानिमीलितभेदप्रत्ययत्वाद्देहमेवेदं सर्वमिति सर्वात्मभावापन्नस
विद्वेषोऽद्वेष्टप्रत्ययानुत्पत्तौ स्वस्वरूपे सर्वत्र प्रीतिमत्तया द्वेषबुद्ध्यऽसंभवात्सर्वेषामपि भूतानामद्वे
ष्टैव भवति ब्रह्मविद्याति: सर्वे कस्मिन्नपि गोत्त दपकारिणि द्वेषः स्यात्सर्वात्मभावापन्नस्यैकत्र रागासंभवा
द्विद्वेषोऽनुपपन्नः सर्वभूताऽद्वेष्टृत्वं अद्वेष्टृत्वाविदुषः रागद्वेषाद्यभावस्तेन मुक्तेः प्रतिबंधाभाव
श्च सूचितो भवति ॥ किंच ॥ सर्वेषां भूतानां मित्रवदनुकूलतया वर्तत इति मैत्रः स्वात्मभूतेषु ... स भूतेषु
र्वत्र मित्रवद्वर्तनं विदुषो युक्तं मित्रत्वसिद्धेः कारणमाह ॥ करुण इति ॥ करुणायैव सर्वेषामा

९

दर्शनस्पर्शनादिभिरुद्वेगं परस्य न प्राप्नोतीत्यर्थः॥ हर्षामर्षभयोद्वेगैर्मुक्तः॥ इष्टप्राप्तौ हर्षः॥ रोमाञ्चप
द्रवप्राप्तावमर्षोऽसहिष्णुता॥ चौरसर्पादेः क्रूरजंतोर्दर्शनादिना भयं प्राणाहरणहेतोरनर्थस्य प्राप्ता
वुद्वेगो गोप्यथ सर्वैरेतैश्चित्तविकारैः स्वाऽतंत्र्यान कृतैः मुक्तः सन् हर्षादीनां विपरीतधर्मे स्वपरिनिष्ठितो मु
त्वाद्यो मल्लिङ्गापामेव तिष्ठति समम प्रियः इत्येक एवार्थः॥ १५॥ व्यञ्जनविद्वोलक्ष्यतां तरां तपाह॥ अ
नपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥ १६॥ देहेन्द्रि
तेपि च व सु नि सर्वत्र देहजीवनादाव पि असद्गुध्याजीवन्ने वमक्त वान्मोक्षे प्यपेक्षानविद्यते यस्य
सोऽनपेक्षः सर्वकामनिर्मुक्त इत्यर्थः॥ शुचिः॥ कर्मस्वऽसंगमः शौचमि
तिन्यायेन देहेन्द्रियादिभिरेव न तु स्वेन क्रियमाणो त्पद्ये न्यो दानवि सर्गादिषु द्वंद्वेष्वऽद्वेषु वक
मेषु कर्मत्वऽकर्मत्वदर्शनेन स्वस्यतैः संबंधाभावात् कर्तृत्वदर्शीव जनविदेव शुचिः नित्यशुद्ध
इत्यर्थः॥ दक्षः श्रुतिस्मृतीतिहासपुराणान्याय मीमांसादिसर्वशास्त्रार्थान्मध्यायने न तदर्थप्र
काशनाऽज्ञेष्ठोनाऽनुष्ठापनेष्ठ सर्वेष्वपि च कर्मसु स्वयं बोद्धुं बोधयितुं कर्तुं कारयितुं च समर्थ
इत्यर्थः॥ तथापि सर्वारम्भपरित्यागी॥ आरम्भंते इत्यारंभाः सर्वे च ते आरंभाः सर्वारंभाः कर्माणि
लौकिकानि वैदिकानि च सर्वाणि कर्माण्यपि विद्या कामसंकल्पैर्जहुकारादिदोषप्रवर्द्धकत्वेन ज्ञानेन ततः ज्ञानप्रति
बन्धकत्वात् तानि परित्यक्तुं शीलमस्यास्तीति सर्वारंभपरित्यागी सर्वकर्मसंन्यासीत्यर्थः॥ नन्वविहितानांचरसाध
र्मस्त्यागस्त्वऽधर्मेऽधर्मे धर्मबुद्धिर्धर्मेत्वऽधर्मबुद्धिश्चाप्नोति च स्वविवेकिनः संतापायैव भवति क
थं धर्मस्त्यक्तोऽस्वयमधर्मं कृत्वाश्नोतिपो वीनसंनपतीत्याशंकाया न॥ कर्मणामोक्षप्रत्यऽसाधनत्वाद्
त्पन्नज्ञानस्य प्रतिबंधकत्वाच्च मुमुक्षोस्तत्त्यागस्य मायापरिच्छिन्नत्वात् त्सापानुवर्तित्वाद्धि द्वान्नतपतीत्याह॥ यत

राम्या०

९

तरसमाधिसंजातसम्यक्ज्ञानस्वविषयभूतेपरेब्रह्मरूपे वात्मत्वानुभूतासमुत्पन्नो ब्रह्मैवाहंनतुसंसारीत्येवंल
क्षणोदृढःप्रमाणांतरप्रत्ययांतरैरच्छेद्यःस्वभावःनिश्चयोयस्यसदृढनिश्चयः।भूतस्य दृढेहेयथा तथाब्रह्मरूपे
वारूढहंबुद्धिरित्यर्थः॥ एवं नित्यनिरंतरसमाधिनिष्ठासंभूतेनाधिष्ठानयाथात्म्यसंदर्शनेनारोपितवस्तु
तत्त्वपर्यालोचनयावेसिद्धं सर्वमिदमहंच ब्रह्मैवेति सर्वस्यस्वस्वचसाक्षाद्ब्रह्ममात्रत्वावधिगमलक्षणोदृढःप्र
माणांतराऽकंप्यो निश्चयोवस्तुतत्त्वावधारणरूपोयस्यसदृढनिश्चयः॥ एवंदृढनिश्चयत्वेसिद्धेकारणमा
ह॥ मय्यर्पितमनोबुद्धिरिति॥ अहमितिबुद्धिः इदमितिमनः इदमहमात्मिके मनोबुद्धी मय्येवप्रत्य
गभिन्नेपरस्मिन्ब्रह्मरूपेऽर्पिते सर्वदामदेकविषयत्वेन स्थापिते येन समय्यर्पितमनोबुद्धिः अहंबुद्धेरिदं
बुद्धेश्चमामेवविषयं कलयन् सर्वदा मामनुसंधत्ते मदनुसंधानपरः सदा सर्वत्र ब्रह्ममात्रद
र्शीबुद्धिविधृतिःसमेदृश्वरस्यप्रियःआत्मभूतत्वात्सर्वेषामात्मैवखलुप्रियः तानित्वात्मैवमेमतमिति
स्मृतिः॥ स्वात्मत्वेनावधृतत्वात् आत्मभूतोज्ञान्येव ममनित्यप्रियः तदन्येतु नैमित्तिकप्रियाइत्यर्थः।।१४
प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइत्युक्तएवार्थःपुनरप्यत्रप्रद्धानमनाविवेकवतोसक्लबुद्धी
नोवपमपिब्रह्मरूपेश्वरस्यप्रियामविद्यामेइतिश्रवणमननिदिध्यासासमाधिपूर्वज्ञिसंभ
त्यर्थंप्रतिपाद्यते॥ अद्वेष्टत्यादीनिस्थितिमतिलक्षणानि पाठितानि साधनकसतु
तानयत्नसाधनानिश्रेयस्संपादनीयानीति सूचयितुमध्यायसमाप्तिप्रतिपादयति॥ यस्मा
न्नोद्विजतेलोकोलोकान्नोद्विजतेचयः॥ हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः॥१५॥ लोकोज
नोयस्मान्नोद्विजतेनुद्विग्नोपयानमजतेयस्यब्रह्मविदआगमनश्रवणादर्शनादिनाप्राणिवर्गोन
विच्छिद्यतइत्यर्थः॥ लोकान्दुष्टपद्रवकारिणोस्तुष्टोरसर्पव्याघ्रादयः स्वपंचनोद्विजतेतेषामागमन

योः॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः॥१८॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित्॥ अनिकेतः
स्थिरमतिर्भक्तिमान्मे प्रियो नरः॥१९॥ लोके त्वऽपकर्त्ता शत्रुरुपकर्त्ता तु मित्रं लोकदृष्टिमनुसृत्य तन्मायम
त्राह न तु विद्वद्दृष्ट्या॥ अहमेवेदं सर्वमिति सर्वात्मदर्शिनो विदुषः शत्रुमित्रादिभेदप्रत्ययाऽसंभवा
त् प्रारब्धवशाद्धि हस्यकश्चिदपकारी भवति कश्चिदुपकारी भवति तत्र शत्रौ मित्रे चैव स्वप्नवद्विद्वान्समः
समदर्शी नः॥ तथोत्कृतयोः मानावमानयोः पूजातिरस्कारयोः संतोषविषादहेत्वोरपि समो निर्विका

र एव भवतीत्यर्थः॥ तथैव शीतोष्णसुखदुःखेषु प्राप्तेषु समः समदर्श्येव भवति॥ किंच॥ तुल्य
निंदास्तुतिः॥ निंदा विद्यमानानामविद्यमानानां वा दोषाणां प्रत्यक्षेणाविष्करणं॥ स्तुतिस्तथाविधगु
णानां प्रत्यक्षेणाकीर्त्तनं॥ निंदा च स्तुतिश्च निंदास्तुती अनात्मगोचरे तुल्ये समे यस्य स तुल्यनिंदास्तुतिः
तयोः समो निर्विकार इत्यर्थः॥ मानावमानयोः शीतोष्णादिषु च समदर्शित्वे हेतुमाह॥ संगव
र्जित इति॥ मानावमानशीतोष्णादीनामनुभविता सोऽहंकारस्तत्रादौ ममाध्यासः एव संगस्तेन वर्जि
तः विज्ञानात्मविषयकमानावमानादेरविषये परब्रह्मण्यात्मभावापन्नतया स्वयं तत्संबंधरहित एव
सर्वत्र समदर्श्येव भवतीत्यर्थः॥ तत एव मौनी वाक्संयमी वा वाच्याभावान्नहि सर्वं ब्रह्मैव पश्यता विदुषो वा
च्यमस्ति तदभावादेव विद्वान्मौनी॥ विजानन्विद्वान्भवते नातिवादी इति श्रुतेः॥ प्रारब्धवशात्प्राप्तेन ये
नकेन शिष्टेन वाऽशिष्टेन वा सदसत्त्वभावनानिर्मुक्तेन भैक्षेण वस्तुनाऽल्पेन महता वा संतुष्टः सं

तृप्तः संप्राप्तालंप्रत्यय इत्यर्थः येनकेनचिदाशीत इति स्मृतेः॥ अनिकेतः॥ निकेतो निवासो नियतो नवि
द्यते यस्य यतेः सोऽनिकेतः ग्रामैकरात्र इत्यर्थः॥ अष्टौ मास्येकाकी यतिश्चरेदिति श्रुतेः॥ स्थिरमतिः॥

विपरीतभावनाजनकेषु मानावमानशीतोष्णादिषु सुखदुःखादिषु प्राप्तेष्वपि सर्वमिदमहं च ब्रह्मैवेति

व्यथ इति।। गता विगता निर्गता व्यथा कृत्याऽकृत्याऽनुष्ठानाऽननुष्ठानकृतः संतापो यस्य स गतव्यथः कृत्याऽकृत्य
योरनात्मकर्तृकयोरकर्त्रात्मदर्शी ब्रह्मविन्न तप्यतीत्यर्थः।। नैनं कृताकृते तपत इति श्रुतेः तर्हि कथं तिष्ठतीत्यत आ
ह।। उदासीन इति।। आहारादौ कर्मणि प्रवृत्तोऽप्रवृत्तो वा देहेन्द्रियादिषु स्वारब्धानुरूपेण प्रवृत्तेषु सत्स्वपि
तटस्थवदुदासीनः साक्षीभूत्वाऽविक्रियात्मनानुतिष्ठतीत्यर्थः।। एवं लक्षणो यो मद्भक्तः स मे
प्रिय इत्यन्वय एवार्थः।।१६।। रागद्वेषादिरहितो मुक्तेः प्रतिबंधो न कश्चिदस्ति मम ज्ञानोत्पत्तौ न संपूर्ण इत्य
भाविति सूचयितुमुक्तमेवार्थे हि मलक्षणान्यभिप्राह।। यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति।। शुभा
शुभपरित्यागी भक्तिमान्यः स मे प्रियः।।१७।। यो ब्रह्मविद्यतिः स्वपरयोरिष्टप्राप्तावनिष्टप्राप्तौ वा प्राप्ते योऽयं वस्तुनि
न हृष्यति परप्रयत्नेनापि तत्र हर्षं न करोतीत्यर्थः।। तथैवानिष्टं प्राप्य न द्वेष्टि स्वाऽनिष्टप्रापके द्वेष्यऽ
निष्टेऽर्थे वाऽप्यप्रीतिं न करोतीत्यर्थः महत्यप्यनर्थे संप्राप्ते सति न शोचति स्वनिष्टप्राधेऽपि च न
तद्विषयामत्तां न बलेनापि च स्वयमाप्नुं मोक्षविलोपं न करोतीत्यर्थः।। तथा प्राप्तस्यानेत्यस
निवृत्तिं न कांक्षति प्रारब्धभोगक्षयमन्तरा वा क्षणमात्रेणाप्यनिवृत्तेरसंभवादिति ज्ञात्वा तत्प्रतीकार
यत्नं किंचित्तदित्यर्थः किंच।। शुभाशुभपरित्यागी शुभानि पुण्यानि अशुभानि पापानि तानि सह
भावीनि इष्टानिष्टफलानि विद्याभ्यासेन क्षिपेमानः कर्मानेन कर्मवृत्तानेननाहं कर्तेति प
रित्यक्तं स्वस्मादितरेलपयितुं शीलमस्यास्तीति शुभाशुभपरित्यागी देहेन्द्रियादिभिरेव कृतैः कर्मभिः प्राप्त
देहेऽपि स्वयं न लिप्यत इत्यर्थः।। तद्यथा पुष्करपलाश आपो न श्लिष्यन्त इति श्रुतेः।। एवं लक्षणो भक्तिमान्न त्वा
न वा समेतिः स मे प्रिय इत्यन्वय एवार्थः।।१७।। इदं ब्रह्मविद्यतेर्लक्षणं विशिष्टतरं विकारहेतुष्वप्य
ऽविकारात्मनाऽवस्थानरूपं सर्वप्रत्यक्षमित्याह तत्रैवाध्याम्।। समः शत्रौ च मित्रे च तथा मानापमान

६

नामित्यादिनामपाश्रितिपादितं धर्म्यामृतं वतीनां स्वधर्मत्वेन प्रपत्नादनुष्ठेयत्वाद्धर्म्यं॥ यद्वामुमुक्षुत्व
धर्मेण प्राप्यं धर्म्यं अमृतस्य मोक्षस्य नियतसाधनत्वादमृतमिदं मद्वेष्टृत्वादि साधनजातं ये पर्युपासते
नित्यं समनुतिष्ठंति ते मद्भक्ता मद्भावनानिष्ठाः परमेश्वरस्यातीवात्यंतप्रियाः परप्रेमास्पदा भवंति॥ लोके
सर्वेषां यथोक्तकारिणस्तत्प्रियाः संतो हृष्टाः सन्तुष्टा यथोक्तकारिणो येनुपतयो भवंति ते ममातीव तत्प्रि-
या इति लोके मोक्षसाधने तेषामप्रवृत्तिसिद्धये प्रस्तुतिस्ततः परमेश्वरस्यातिप्रियत्वसिद्धये भगवं
तो विशेषेण पथ्योक्तमिदं धर्म्यामृतं पतिभिः कृतश्रवतीः मोक्षैककामैः प्रयत्नेनानुष्ठातव्यमि-
ति सिद्धं॥२०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानंदात्मसरस्वतीशिष्य श्रीशंकरा-
नंदसरस्वतीकृतौ गीतातात्पर्यबोधिन्यां द्वादशोऽध्यायः ॥ ५२ ४
ति

अध्या १२ पत्र ४

रामा०
२

सर्वदा सर्वत्र ब्रह्माकारापन्ना एकवृत्त्या स्थिरा निश्चला मतिर्मननशीला चित्तवृत्तिर्यस्य स स्थिरमतिः स्थिरप्रज्ञ
इत्यर्थः॥ दृढनिश्चयप्रतिज्ञानस्य मानांतरबाधराहित्यं स्थिरमतिरिति वृत्तिनैश्चल्यमिति तयोर्भेदः॥ भक्तिमान्॥
एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं॥ अहेतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे॥ लक्षणं भक्तियोगस्य निर्गुणस्य
ह्युदाहृतं॥ अस्यार्थः॥ अहेतुकी निमित्तरहिता विपरीतप्रसंपत्तिवृत्त्यादिप्रयोजनवर्जिता ब्रह्मवि
दां स्वभावसिद्धा चाव्यवहिता विच्छिन्ना च वृत्त्यंतरवर्जिता पुरुषोत्तमे प्रत्यगभिन्ने परमात्मनि या भक्ति
रखंडाकारवृत्तिस्तदेव निर्गुणस्य निर्गुणविषयस्य भक्तियोगस्य भक्तेर्लक्षणं स्वरूपं महर्षिणोदाहृतमुक्त
मित्यर्थः॥ निरुक्तलक्षणा मुख्या भक्तिरस्यास्तीति भक्तिमान् ब्रह्मनिष्ठो यो नरः स्वनिष्ठया स्वं ब्रह्मैव नार
यति प्रापयति न तु योऽन्तरं लोकांतरं चेति नरो ब्रह्मविद्युतिः स मे प्रियः स्फुटमेवार्थः॥१९॥ अद्वेष्टा स
र्वभूतानामित्यारभ्याऽत्र पद्यकैर्ब्रह्मनिष्ठस्य ब्रह्मविदो लक्षणं जातं तत्सर्वं मोक्षैककामैः सर्वतो विर
क्तैः साधकैर्यतिभिः श्रवणमनननिदिध्यासनमुमुक्षुत्तानस्य परिपाकैकसाधनमवश्यं संपादनीयमिति बो
धयितुं तत्संपादननिष्ठान् साधकान् प्रस्तुवन्नध्यायमुपसंहरति॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्यु
पासते॥ श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः॥२०॥ तुशब्दः सिद्धेभ्यः साधकानां व्यावृत्त्य
र्थः॥ ये तु मद्भावापत्तिमेव पुरुषार्थं यमानाः सुखसाधनं सिद्धं सर्वं संन्यस्य श्रवणादिना संपन्नज्ञान
यत ४ वंतो यः श्रद्दधाना इदं उक्तं परमसाधनं एवंरूपमनुष्ठेयमिति विश्वासवंतः संतो मत्परमाः अहं नि
र्विशेषं परं ब्रह्मैव परमं निरतिशयं प्राप्तव्यमिति येषां ते मत्परमा मय्येव परमार्थत्वबुद्धयो
भूत्वा॥ यद्वा अहमेव परमो निरतिशयो ऐश्वर्यसंपन्नो विश्वाधिकोऽतुलं प्राप्यं ईश्वर इति धी
र्येषां ते मत्परमा मत्परमैश्वर्य [illegible] वर्तिनो भूत्वा यथोक्तमद्वेष्टा सर्वभूता

50

नं द्रष्टुं स्वरूपं मन्निहितानं च सं वेत्तुं ह्येवेति सर्वस्य स्वस्य च ब्रह्मसमानत्वावगाहिन्या मत्स्पयान्तरङ्गन्यया भ
क्त्या त्वेऽनुसंधाने नैवंरूपेऽहं रूपो विश्वात्मको हं परमात्मा सम्यग्गाराद्धितः सन्नत्वेन पथार्थस्वरूपेण
इदमेव परमार्थवस्त्विति ज्ञातुं शास्त्रतुं द्रष्टुमिदमेवाहमिति स्वात्मना साक्षात्कर्तुमपि प्रवेष्टुं च वि
देहीभूत्वा मदात्मनाऽवस्थातुमपि च परन्तपोऽस्मिन्निर्विशेषब्रह्मात्मना ज्ञानस्याविषयो भवामीत्य
र्थः अत्रायमभिप्रायः मुमुक्षोरधिकारिणः चित्तशुद्ध्यै सविशेषविश्वरूपस्य ब्रह्मणः उपास्तो
स्वहृद्भक्त्या भज्यत्वेवं ह्येवेदं सर्वमिति कृता यां तयाभेदेऽतस्यपनापात्वापरिशुद्धात्मनो निर्विशे
षं परं ब्रह्म ज्ञातुं साक्षात्कर्तुं मदात्मनाऽवस्थानलक्षणां विदेहमुक्तिं च प्राप्तुमपि स्वयमेव विषयो
भवतीति ५४ इत्येवं भक्तेर्ब्रह्मप्राप्तेः कारणत्वमुक्त्वाऽधुना वक्ष्यमाणसाधनपञ्चकसंपन्नायो मा
मजीतितस्यैव चित्तप्रसादः सम्यग्ज्ञानं मोक्षश्च सिध्यतीति स्वचपेन्ध्यायमुपसंहरति मत्कर्म

त

कृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ५५ मत्कर्मकृन्मदर्थं

कं

मेव कर्म लौकिकं वैदिकं च चेष्टामात्रं सर्वमपि करोति न तु स्वार्थमीषदपि यः स मत्कर्मकृत् मत्प
रमः पदार्थं पुरुषः कर्म करोति न तदेव फलं प्राप्तुं प्रयतेनान्यत्तद्वदयमपि मदर्थं कर्म कुर्वन्न स्वेन मा
मेव प्राप्तव्यत्वेनाहमेव कृतानां कर्मणां फलं परमाऽनुजनागतिरस्येति मत्परमः पहोस एव
रक्षकः सरेवाभ्यपरतीयः तस्वप्राणमिधस्तथैव सर्वगतिनावाधारः सर्वगतिर्भवोत्सोक

मितिनिरतिशयप्रीत्याऽहमेव परमो रक्षकत्वादिधर्मैरुत्कृष्टतमो यस्य स मत्परमः यद्वा मीयतेयदाप्यो
ऽन्ययेतिमामा नामेंद्रियाणां वृत्तिर्मत्पराः सर्वत्र मत्स्वरूपयहणपरामैंद्रियवृत्तिर्यस्य स मत्परमः ततएव
मद्भक्तः सर्वात्मानं मां सर्वत्र सर्वदा भजति चक्षुरादीनां विषयभूतं वस्तु सर्वं ब्रह्मैवेत्यनुसंदधातीति
मद्भक्तः संगवर्जितः पुत्रमित्रकलत्रादिषु प्रीतिहेतुषु सक्तबुद्ध्याऽनुषक्तिरहितः तर्हि मेष्वऽनुरागा
भावे द्वेषस्तु स्यादेवेत्याशंकायामाह निर्वैर इति सर्वभूतेषु स्वस्यापद्रवकारिष्वपि सत्स्वपि निर्वै
रः वैरं शत्रुत्वबुद्धिः सर्वत्र ब्रह्मभावनया तस्मान्निर्गता यस्य सः निर्वैरः एवंभूतः सर्वविक
ल्पो मुमुक्षुर्भवति स भक्तवर्यो निर्विशेषब्रह्मविज्ञानेनात्मप्रसादसंपन्नेन मां परं ब्रह्मेति निर्वि
देहकैवल्यं प्राप्नोतीत्यर्थः ५५ ॐतत्सदिति श्रीकृष्णार्जुनसंवादे श्रीगीतासुबोधिन्यामेकाद
शोऽध्यायः ११ ॥ ता

विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ४९
बहुबाहूदरादिरूपत्वेन ईदृगेवं करालदंष्ट्राघोरं मम रूपं दृष्ट्वा ते व्यथा परितापो मास्तु विमूढभावश्चित्त
व्यामोहश्च मास्तु किंतु व्यपेतभीः गतभयो भूत्वा प्रीतमनाः सन् त्वं पूर्वमेव ममेदं रूपं पुनः प्र
पश्य दृष्ट्वा प्रशान्तो भवेत्यर्थः ४९ संजय उवाच इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामा
स भूयः आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ५० महानसमेय आत्मा स्व
भावो यस्य स महात्मा वासुदेवस्तथा तदेव व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव रूपं मेयं पश्येत्युक्त्वा
वतम्भेरो स्वकं रूपं दर्शयामास उपसंहारदर्शनयोर्निमीलनोन्मीलनवत्स्वापत्तत्वज्ञापनार्थ
तथेत्युक्तं पुनः सौम्यवपुर्भूत्वा धैर्यवचनेरेनमाश्वासयामासाऽभयं चकार ५० मानवरूपदर्श
नेनाश्वासवचनेन च स्वस्थः सन्नर्जुन उवाच दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृ
त्तः सचेताः प्रकृतिं गतः ५१ सौम्यं शान्तं तव देहरूपं दृष्ट्वेदानीं विकृतिं भयकंपादिलक्षणां त्यक्त्वा प्रकृ
तिं स्वभावं गतोऽस्मि सचेताः स्वस्थचित्तः संवृत्तो जातोऽस्मीत्यर्थः ५१ प्रशान्तमर्जुनं दृष्ट्वा प्राल्हादपितु
श्रीभगवानुवाच सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः
५२ अपरिमिततेजोमयत्वादुःखेन दर्शनं यस्य तत्सुदुर्दर्शं सुदुर्दर्शमपीदं दर्शितलक्षणं मम विश्वरूपं

गी० १२

रूपंतत्वंदृष्टवानसिखलुएतद्दर्शनमलभ्यंमायापात्त्वलब्धमित्यर्थः अलभ्यत्वमेवविशदयति देवा इति
तेजोबलपौरुषैरुत्कृष्टा देवा इंद्रादयोपिममास्यरूपस्यनित्यंदर्शनकांक्षिणः सर्वदैतद्रूपंद्रष्टुमपे
क्षंतेनतुत्वंयथान्यथादृष्टवंतोभवंतिदेवानामपिदुर्लभंमद्दर्शनमित्यर्थः ५२ जन्मांतरेभ्योगेछुपा
यथोक्तविधिनावेदाध्ययनादिपुण्यकर्मातिशयानुष्ठानाद्देवभावंगतानांमद्भक्तिशून्यानांतेषामिं
द्रादीनांमद्दर्शनमलभ्यमितिसूचयन्नपितुवेदादीनांस्वस्वरूपसाक्षात्कारेसाधनत्वंनिषेधयति नाहंवे
दैर्नतपसानदानेननचेज्यया शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा ५३ नवेदैःसकलवेदाध्यय
नैः नतपसाकृच्छ्रादिना नदानेनकन्यादिना नचेज्यया श्रौतस्मार्तकर्मभिरप्येवंविधोविश्वरूपोहंद्र
ष्टुंशक्योस्मियथामांत्वंदृष्टवानसिनथावेदाध्ययनादिपुण्यकर्माणोमांसविशेषमेवद्रष्टुंनेशक्नु
वंतिकुतोनिर्विशेषंसाक्षात्कुर्युरित्यर्थः एतेननवेदयज्ञाध्ययनैरितिप्रतिपादितस्यैवार्थस्यना
ह्वेदैरितिपुनःप्रतिपादनेनकर्मणांमोक्षंप्रतिसाक्षात्साधनत्वंकेषांचिदपिनसिध्यतीतिस
म्यक्सूचितंभवति ५३ ननुवेदादीनामसाधनत्वेतर्हिकेनत्वत्साक्षात्कारइत्याकांक्षायामाह भ
क्त्यात्वनन्ययाशक्यअहमेवंविधोऽर्जुन ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप ५४ तुशब्दोन्यसा
साधनत्वनिर्धारणार्थः सर्वंखल्विदंब्रह्मेत्यादिशास्त्रार्थोपदेशजन्यज्ञानेनसमुत्पन्नयाऽनन्ययाभक्त्या

राम०

भवन्तं देवमात्मानमेव सौम्यं काल्परूपं मे मह्यं दर्शय प्रहृष्टिविषयं कुर्वित्यर्थः ४५ तदेवेत्युक्त्वाऽनिर्धारि-
तत्वान्तं हृष्टं रूपं विशेषयति विशिनष्टि किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव तेनैव रू-
पेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ४६ एवंपत्रथैव किरीटिनं गदिनं चक्रहस्तं त्वामसितानीं द्रष्टु-
मिच्छामि यत इदं रूपं भयानकं ततश्चतुर्भुजेन भुजचतुष्टयवता तेनैव वासुदेवेन रूपेण शान्तेन युक्तो
भवतदा चतुर्भुजाभिशिष्टरूपाभावं सूचयितुमाह सहस्रेति सहस्रं बाहवो यस्य हे सहस्रबाहो विश्व-
मूर्ति यस्य हे विश्वमूर्ते सर्वात्मन् एतद्रूपमुपसंहृत्य प्राचीनं शान्तं रूपं दर्शयेत्यर्थः ४६ स्याने हृषीकेश

52

मादिना स्तुवन्तं विश्वरूपसंदर्शनेन प्रहृष्टं तद्रूपेण क्लिष्टमर्जुनमाश्वासयितुं विश्वरूपसंदर्शनमति-
दुर्लभमदनुग्रहेणाते लब्धमित्यपश्लोकयितुं श्रीभगवानुवाच मया प्रसन्नेन तवार्जुनेदं रूपं परं द-
र्शितमात्मयोगात् तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७ हेऽर्जुन त्वदीयभक्त्याति-
शयात् प्रसन्नेन लब्धानुग्रहवता मया तेजोमयं कोटिसूर्यप्रकाशं विश्वं विश्वात्मकं अनन्तं एवानन्तमे-
तवाद्यं ते इदं दृश्यमानं रूपमात्मयोगादात्मनः स्वस्य योगात् मायायोगसामर्थ्यात्तभेऽक्ता युग-
रूपस्य दर्शितं इतरेषामप्येतद्विषयमेवन्तवैव दृष्टिविषयं गमितमित्यर्थः ४८ नराह्यगहमौम्या
दीनां बाल्यपशोदापाश्च अक्रूरस्यापि इदं त्वया पादर्शितमेवमया प्रसन्नेन दर्शितमितिकथामित्याशंक्य
पानदवान्तरे रूपसुजनमनं भवति इदं तु सर्वोपमन्यैरदृष्टं चेत्याह यन्मइति त्वदन्येन भक्तो वैपोस्मत्तो भिन्नयेन

केनापिनदृष्टपूर्वमेवममपरमेश्वरस्यप्रसन्नस्यमायामादिकालीनमीश्वरत्वकारणंसर्वोत्तमंमदैवतेनेदर्शि
तंतवभाग्यातिरेकंममैतद्रूपसंदर्शनेनकृतार्थोसीत्यर्थः ४७ एतद्रूपदर्शनस्यदुर्लभत्वमेवप्रतिपाद
यति नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः एवंरूपःशक्यअहंनृलोकेद्रष्टुंत्वदन्येनकु
रुप्रवीर ४८ वेदयज्ञाध्ययनैर्हीत्यत्रत्रयमाणानामध्ययनपादेस्यप्रत्येकंसंबंधः वेदाध्ययनैर्यज्ञाध्य
यनैरितिनियमेनऋगादीनांचतुर्णांवेदानामध्ययनैर्यज्ञोपमंत्रदेवतानांप्रयोगप्रतिपादकवेदार्थज्ञा
नाध्ययनानियज्ञाध्ययनानितैः ननुवेदाध्ययनेनैवयज्ञाध्ययनस्यसंभवात्पुनर्यज्ञाध्यय
नेनकृतंव्यर्थमेवेतिचेन्न वेदाध्ययनकालएवबहूनांतदर्थविचारयोग्यत्वासंभवात्पदसमासाध्य
यनपूर्वकत्वाद्विचारस्यअथातोधर्मजिज्ञासेतिधर्मजिज्ञासायावेदतदंगाध्ययनानंतरभावित्व
श्रवणात् प्रथममक्षरग्रहणार्थमनंतरमर्थज्ञानार्थंचाध्ययनंकृतंव्यर्थमेवेतिसिद्धं दानैःकन्याग
वादिभिःक्रियाभिःश्रौतस्मार्तकर्मानुष्ठानैरुग्रैःकठिनैःशक्यैस्तपोभिःकृच्छ्रचान्द्रायणादिभिरपि
पुरायपकर्मविशेषैरपिएवंरूपोविश्वात्मकोऽहंपरमेश्वरोनृलोकेमर्त्यलोकेत्वदन्येनमदनुग्रहवर्जि
तेनान्येनद्रष्टुमशक्योऽस्मिमनुष्यसादृविमुखानांद्रष्टुमशक्योहमित्यर्थः शक्यतेऽहंनृलोकइतिसि
द्धेसत्यपिसंधौकारकक्रियायामर्थगौरवंद्योतयितुंशकआर्षत्वात्संधभावोनदोषाय ४८
एतद्रूपसंदर्शनेनतवमनसोव्यथाप्रीतिरद्रूपमुपसंहरिष्यामिअवायामास्त्वित्याह मातेव्यथामाच

सत्त्वं सिंहासनपरिष्कररागादिषु पवेशनमासनं भोजनमन्नोदकादिस्वीकारः तेषु त्वमेकः रहस्येकस्त्वसितः
सन्न अथवा वहेनो मम क्षमेयामातुलेपहेति बुध्याऽपहासार्थं परिहासमापपद्य तत्कारणं द्योवदसत्कृतोऽ
वमानितोऽसि तत्तदपराधजातं क्षमेत्वामहमप्रमेयमचिंत्यमहिमानं परमेश्वरं क्षामयेऽहं क्षमस्वेति प्रार्थयऽ
र्थः ४२ ननु यथा गदादपराधं क्षमेतेतत्सहमपि किं क्षामये त्वामिति प्रार्थनयेत्या शंकायां न भवानु सर्वलो
कपूज्यः परमेश्वर इति सहेतुकं पूज्यत्वमेव प्रतिपादयति पितासि लोकस्य चराचरस्य त्वमस्य पूज्य
श्च गुरुर्गरीयान् न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभावः ४३ चराचरस्य
स्थावरजंगमात्मकस्यास्यानुभूयमानस्य लोकस्य सर्वप्राणिजातस्य त्वं पिता जनकोऽसि पतो वे
ति स्थावरागमत्वं सर्वेषां भूतानां जनयितेत्यर्थः न केवलं पितैव त्वं सर्वलोकस्य किंतु महान्गुरुरप्य
सीत्याह गुरुरिति सकलानर्थबीजभूताऽविद्यानत्कार्यविध्वंसक जत्वज्ञानोपदेशेन गरीयान् सर्वो
त्तमो गुरुश्चासि यस्मात्तस्मात्त्वं पूज्यः सर्वलोकानां किं तु गतमपि वेति ननु मतोऽप्यधिको ब्रह्मादि
योऽसमहतोऽप्याः संत्येवेत्यत आह नेति आत्मन आकाशः संभूत इत्यस्य महतो भूतस्येति च श्रव
णात् आकाशादिसर्वभूतजनकत्वेऽधर्मे ज्ञानमलमकलवेदोपदेष्टृत्वे च लोकत्रयेऽपि गरीयान्म
हत्तमस्त्वत्समोऽन्यो नास्ति जगन्मूलेषु ... सर्वे ... लोकत्रये ... महान्नहीश्वरहितो प्रसन्ने
केऽस्य प्रसिद्धः ... अन्यस्य संजिहीर्षायां सत्यां विहारः सिद्ध्यतः त्वत्समानकाप्यविद्यमानत्वार्थः त्व

दीपार्द्ववंशे
अ:=४

53

गी० ११

त्समस्यैवासंभवे सत्यन्यस्त्वधिकस्त्वत्तो महत्तमोऽन्यः कुतः स्यात् न कुत्रापि संभवतीत्यर्थः नत्वत्समश्चाभ्य
धिकश्च दृश्यत इति श्रुतेः त्वत्समस्यैव पुरुषस्यासंभवे हेतुमाह प्रतिमीयतेऽनयेति प्रतिमा सादृश्यं न विद्य
ते यस्य स एवाप्रतिमः प्रभावः सामर्थ्यं मायायोगजं प्रपंचवैधर्म्यं साक्षात्कारिपि घटनाऽघटनपटीयस्त्वलक्ष
णं यस्य सोऽप्रतिमप्रभावः तस्य संबुद्धिः हे अप्रतिमप्रभाव निरतिशयमहत्त्वसंपन्नेत्यर्थः ४३ जगद्गु
रुत्वेन जगज्जनकत्वेन च सर्वलोकपूज्यस्य तव परमेश्वरस्य मया नापराद्धं यत्प्रमादेन पदं पराद्धं तत्क्षंत
व्यमिति प्रार्थयन्नमस्कृत्वा प्रणामपूर्वकं प्रसादयति तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमी
शमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ४४ यस्मान्निरतिशयमहत्त्वं एव
त्वं परमेश्वरस्तस्मात्कायं प्रणिधाय अष्टभिरंगैः संश्लेषं यथा स्यात्तथा भूमौ स्थापयित्वा प्रणा
म्य ब्रह्मादिभिरीड्यं स्तुत्यमीशं परमेश्वरं त्वां प्रसादये प्रसन्नो भवेति प्रार्थये हे देव सापराधं अपि पुत्र
स्यापराधं पितेव सख्युरपराधं सखेव प्रियायाः प्रियः स्त्रियोऽपराधं एवं ममापराधं सोढुं सं
तुमर्हसीत्यर्थः प्रियायार्हसीत्यत्र संधिरार्षः ४४ देवेश जगन्निवासेति प्रसादयन्स्तुवन्नेव विश्व
रूपोपसंहारं प्रार्थयते अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रू
पं प्रसीद देवेश जगन्निवास ४५ अदृष्टपूर्वं न कदाचिदपि दृष्टं विश्वरूपं दृष्ट्वा हृषितो हृष्टः संतुष्टोऽस्मि
तथापि च हृद्वरवक्त्रादिभिः विकृतान् ... भयेन मे मनो व्यथितं आकुलं च भवति हे देव प्रसीद प्रसन्नो

राम०

त्वयाप्याप्तमिदं सर्वं त्वन्मात्रमेवातः सर्वं त्वमेव नैवानंतरूपोसि त्वमहं इतीपद्स्यार्थः ३८ यस्मादेवं
तस्मात्सर्वं त्वमेवेति त्वय्येव स्तुतिविष्णुस्तवपद्धार इत्यादिश्लोकेति पञ्चभिः स्तवमर्थं प्रतिपादयति वायुर्यमो
ऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो
नमस्ते ३९ वायुः यमः अग्निः वरुणः शशांकश्चंद्रः प्रजापतिः सर्वलोकपितामहश्च तदुस्त्वं
प्रपितामहस्तत्पिता विष्णुश्चापि त्वमेवेत्यर्थः एवं सर्वं त्वमेवेति भगवतः सार्वात्म्यं सर्वात्मतां प्रतिपाद्य
ऽधुना श्रद्धाभक्तिवेगेन सर्वात्मनः परमेश्वरस्य नमस्कारातिशयेन नमो नमस्ते त्वित्यादिना स्व
श्लोकमर्थः ३९ भक्तिवेगात्यसंतोषातिशयेन स्तुवन् पुनः सर्वतो नमस्करोति नमः पुरस्तादथ
पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ४०
हे सर्व सर्वात्मन् सर्वात्मने ते पुरस्तात्पृष्ठतोपि नमः सर्वतः सर्वत्रापि ते नमोस्तु हे सर्वेति विशेषणा
त्सर्वात्मनः मायादिदिग्विभागोपपद्यपि न संभवति दिग्विभागरहितोः स्वरूपस्यापि सर्वात्मत्वेन ध्यान
त्वान्यथापि नमः पुरस्तादिति स्वहृत्पि गन्याकं नतु वस्तुगत्या ननु हे सर्वेति नामोक्तं न त्वर्थं न इति
मनःस्थतथात्वे अनंतजगत्त्रिवासेति त्वमादिदेव इत्यादिवाक्यार्थं व्याघातप्रसंगान्नन्नेव सर्वश
दार्थरूपमेव निर्वर्त्यानं तेस्यादिनानन्त्विनौ हेतुमाह अनंतवीर्यामितविक्रमइति सर्वतो वि
क्षिप्यइत्यपि नुंस सारादि तु योप्यंगीयं तेजः विक्रमः शत्रुवधादिसामर्थ्यं ... स्पष्ते अनंतं वीर्यं यस्य

54

सचामितो विक्रमो यस्य स च उभयोः कर्मधारये अनंतवीर्यामितविक्रमः हेतुगर्भमिदं विशेषणं अनंतवी

गी० म० र्यामितविक्रमत्वात्सर्वं जगत यतः समाप्नोषि बहिरंतः सर्वतो व्याप्नोषि पिंडमिव वीर्येण तेजसा स्वरूपेणा

१० विक्रमेण सत्तया च सम्यग्व्याप्नोषि वा न हि ततः ख्वे सर्वोऽसि सर्वात्मकोऽसीत्यर्थः एतेन नामरूपात्मकं ज

गत्सर्वं त्वमेव तत्त्वतो मदणुमात्रमपि निरात्मकं निरूपयितुं न संभवतीति सूचितं ४० एवं स्तुत्वा नत्वा म

हूनं स्वापराधं क्षमापयति द्वाभ्यां सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति अजानता म

हिमानं तवेदं मया प्रमादात्प्रणयेन वाऽपि ४१ तवाऽपरिमिततेजोबलवीर्यसमग्रैश्वर्यसंपन्नस्य स

र्वेश्वरस्य सख्यादिकं तु परमेश्वरस्य इदं यद् रहस्यमानं महिमानं विश्वात्मकं स्वरूपमजानताऽतत

वतामयाममायं सखा स्निग्ध इति मातुलेय इति च मत्वा हे कृष्ण हे यादव हे सखेति प्रमादात् प्रणयेन त्व

हेन वापि प्रसभं हठात् दुक्तावचनं यद्दुक्तं तत्सर्वं क्षामये क्षमतामित्यर्थः पद्मयत्तरेण संबंधः

अत्र हे सखेति संधिरार्षः महिमानं तवेदमिति प्रचुरः पाठः तवेमं मिति पाठांतरमप्यस्ति तवेदं म

हिमानमिति इदं पदस्य महिमानमित्यस्य च वकत्वेयं कुलम्बषणमितिवत्तलिंगव्यत्ययेन समानाधि

करणप्रदेशद्वस्य ... गत्वेन विचारः ४१ किंच यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासन १८०

भोजनेषु एकोऽथवाऽप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ४२ न च यत्र वर्तते सदैकरूपेणावि

क्रियात्मना कूटवत्तिष्ठतीत्यच्युतः हे अच्युत परमात्मन् विहारः ... भोजनेषु विहारः क्रीडा शय्या

55

[illegible]

गी

श्रीगणे[?]शायनमः दशमेमंदप्रज्ञानांमनःशुद्धिद्वारेणोक्तसिद्धयेस्वविभूतिविशेषानुपासार्थमभिधा
यादमंदप्रज्ञानांतुविष्टभ्याहमित्यादिनाविश्वात्मकमैश्वरमेवसोपाधिकंस्वरूपमुपास्यत्वेनसूचयित्वेदा
नीमर्जुनेनप्रार्थनयाविश्वरूपेमायाविलासविजृंभितंस्वरूपमत्यद्भुतंदर्शयितुंस्वतत्त्वस्यसाक्षात्क्रियोप
कारयितुंस्वसाक्षात्कारस्यातिदुर्लभत्वंभक्त्येकगम्यत्वंचप्रतिपादयितुमेकादशाध्यायआरभ्य
तेतत्रादौसर्वजगत्कारणंसर्वात्मकंसर्वैश्वर्यसंपन्नंस्वरूपंतस्योपास्यत्वेनबोधयितुंश्रुत्वातत्साक्षा
त्कर्तुकामःसन्भगवत्कृतानुग्रहानुवादेनभगवंतमभिमुखीकरोति अर्जुनउवाच मदनुग्रहायपरमंगु
ह्यमध्यात्मसंज्ञितं यत्त्वयोक्तंवचस्तेनमोहोऽयंविगतोमम १ मदनुग्रहायपरत्वेभ्रातृपुत्रादयोमदीयाः
म्रियंतेहतैतेनपापमहमितिशोकमोहसागरेमग्नतोममानुग्रहायमोहेनशोचतमामपिकृपयानुगृहीतुम
त्यर्थः परमध्यात्मसंज्ञितमात्मयाथात्म्यप्रकाशकं अशोच्यानन्वशोचस्त्वं नायंहंतिनहन्यते नजा
यते वेदाविनाशिनंनित्यं अच्छेद्योयमित्यादिलक्षणंपरमपरमार्थविषयमात्मनः कर्तृत्वभोक्तृत्वा
दिभ्रमापनोदकमतएवगुह्यंगोपनीयमयोग्यानामेसद्धर्माणामप्रश्नाद्यान्नामद्देयंयद्वचस्त्वयोक्तमु
पदिष्टंतेनवचसाआत्मानात्मस्वरूपप्रकाशकेनमिथ्याज्ञाननिवर्तकेनायंप्रत्यक्षोक्तलक्षणोमोहस्त्वि

रम०

नत्प्रेमःविगतःविशिष्टेनगतःविगतस्तत्कृपयाविनष्टमोहोजातोस्मीत्यर्थः १ एवंभगवत्कृतो
पकारानुवादेनभगवंतंस्तुत्वातत्स्वरूपदिदृक्षयातन्माहात्म्यमस्तौति भवाप्ययौहिभूतानांश्रुतौ

प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ४ सृष्टिस्थितिलयप्रवेशनियमानां समर्थत्वात् हे प्रभो तव स्वरूपं
मया द्रष्टुं शक्यमिति यदि मन्यसे ब्रह्मात्मैकत्वदर्शनलक्षणो ज्ञानयोगो योगाः तेषामीश्वर हे योगेश्वर ततो
मे त्वं दर्शयात्मानं स्वरूपमव्ययं अव्ययस्योपाधित्वादव्ययफलहेतुत्वाद्वाऽव्ययं यदुपासनान्मुमुक्षुर्ह्यात्मा
स्वरूपमाप्तो मुक्तो भवति ४ एवं प्रार्थितोऽर्जुनेन श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ स-
हस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च ५ दिव्यो मायया जातानि दिव्यानि नानावर्णा-
नि नानाकाराणि च नानाप्रकाराणि शतशः सहस्रशश्च बहून्यपारानन्तरमेव पश्य न तु कालान्तरे न तु
द्रष्टुमिच्छामि ते रूपमिति यदि दर्शयात्मानमिति चार्जुनेनात्र वैश्वरं रूपं दर्शयेत्युक्ते त्रिविक्रमाकारवत्स्वा-
कारवैस्सर्वं रूपमदर्शयित्वा पश्य मे पार्थ रूपाणि बहूनामादित्यादिरूपाणां प्रदर्शनं भगवता स्व-
ऽप्युक्ते मेव औषधमानयेत्युक्ते पर्वतानयनवदिति न शंकनीयं अव्यक्तादितत्त्वपर्यन्तस्थूलसूक्ष्मका-
रणप्रपंचरूपेणास्मच्छिष्यशिष्टिरूपेण च सर्वात्मना स्थित अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ अन्तरात्मा सहस्र-
शीर्षा देव इत्यादिश्रुतिप्रसिद्धमीक्षणे नैव सर्वमीश्वरस्य कारणब्रह्मणः स्वरूपमेव बहुधा विवर्तो मु-
ख्यमिति स्वेनैवोक्तत्वात् न तु केवलशंखचक्रादिविहितं रूपं तस्यापि मायाकृतत्वेनानैवात्मनस्तत्त्वा-
त्मनः सर्वात्मकं सर्वकारणं सर्वोत्तममैश्वरं रूपं पश्येति देवार्जुनस्य द्रष्टुमिष्टत्वाद्भगवतानतिदर्शितं नाकिं-
चित्त्वानुपपन्नं मन्तव्यम् ५ किंच पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा बहून्यदृष्टपूर्वाणि प

विस्तरशो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाऽव्ययं २ कंग्राह्यं सुखंस्वरूपानंदस्तमलानिम
कापयतीति कमलमात्मज्ञानं पत्रं देवयतनात्त्रापत इति पत्रं कमले चतेन त्रेचकमलपत्रे ते नाऽक्ष्यते
प्राप्यत इति हे कमलपत्राक्ष तानेकराम्यय यस्मात्त्वचूहि यस्मात्कारणात् अहं कृत्स्नस्य जगतः प्र
भवः प्रलयस्तथा मत्तः तिस्वामवष्ठभ्य अहं सर्वस्य प्रभव इति त्वत्तः ईश्वरादेव भूतानामाकाशादीनां
तत्कार्याणां च सर्वेषां भावाप्ययौ उत्पत्तिप्रलयौ विस्तरशो बहुशो मया त्वत्तः श्रुतौ किंच अ
हं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च सर्वभूतमहेश्वरं मत्तः सर्वं प्रवर्तत इति माहात्म्यं महात्मसर्वोपा
धिक आत्मस्वरूपं यस्य स महात्मा तस्य भावो माहात्म्यं सा वोत्थ्यमपि चकारात्सर्वेश्वरत्वं च बहुशो मया
त्वत्तः श्रुतमित्यर्थः २ तस्मात्तत्सर्वं सत्यमेवेत्याह एवमेतद्यथाऽऽत्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छा
मि ते रूपमैश्वरं पुरुषोत्तम ३ सर्वातिशयमहत्वात्तस्य स्मः सर्वव्याप्तिहेतुत्वादीश्वरः हे परमेश्वर सर्वज्ञ
त्वं सर्वभूतमहेश्वरमित्यात्मानमात्मस्वरूपं यथात्थ येन प्रकारेण स्थितं वक्षितं देवमेवं यथार्थमेवं
सर्वकारणं सर्वव्यापकं च सर्वनियंतृत्वैर्वृतमैश्वरं रूपं नान्यथेश्वरस्य च नस्याप्ति न तत्र परीक्षा कर्त
व्या किंतु त्वदनुग्रहपात्रीभूतस्य ममैवेत्यपेक्षेत्याह द्रष्टुमिति पुरुषाभ्यां व्याकृताव्याकृताभ्यां त्व
महिमानत्मत्वात् हे पुरुषोत्तम ममज्ञानमसाक्षात्पयते यद्वै प्रसरस्य मेम्ब्रैश्वर्यं ज्ञानतेजःशक्तिरंपन्नं सर्वा
त्मकं स्वरूपं द्रष्टुमिच्छामि तथा ममेच्छा सातोत्यर्थः २ मद्वेव मा ... पादितं ... द्रष्टुमिति

गी० ३

नेकान्यपरिमितान्यत्यद्भुतान्याश्चर्यरूपाणि दर्शनान्यूर्ध्वाधस्तिर्यक्पृष्ठतो विकृताः सौम्याः साधारणाः भयंकराश्च
त्रादृश्यो यस्य तमनेकाद्भुतदर्शनं दिव्यानि भूषणानि यस्य तमनेकदिव्याभरणं दिव्यान्यनेकान्युद्यतान्युद्धृतानि निष्कोशादायुधानि
यस्य तं दिव्यानेकोद्यतायुधं ददर्श ॥ १० ॥ दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं देवमनन्तं
विश्वतोमुखं ॥ ११ ॥ सर्वाश्चर्यमयं तेजोबलवीर्यशक्तिरूपगुणैश्वर्यवाऽस्यानादिविशेषैः सर्वैराश्चर्यप्रचु
रैरुपेतं स्वप्रभैव दीप्यमानं प्रकाशमानमिति देवं सर्वतोमुखं सर्वात्मकमत एवानन्तमपरिच्छिन्नस्वरूपं ददर्श पा
र्थ इति पूर्वेणान्वयः ॥ ११ ॥ विश्वरूपस्य परमेश्वरस्य तेन देवविशदयति दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थि
ता यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥ दिव्याकाशे युगपदेकदैवोत्थितस्य सूर्याणां सह
स्रस्य युगपदुत्थिता सम्यक् लोकिताऽमेघाद्यावरणवर्जिता च या भाः प्रभा विद्यते सा विश्वरूपस्य भासः प्र
काशस्य स्फुरणस्य यत्तु स्वप्रकाशे सदृशी स्यात् समाना कदा भवेत्तत्रापि विश्वरूपप्रकाशस्य सदृशी ति वक्तु
मशक्तेह योः स्फुरणसंपन्नौ विचार्यमाणायां सूर्यसहस्रप्रभाया एव सा या विश्वरूपप्रकाशस्याधिकोऽभवि
ष्यतीति मन्ये इत्यभावः ॥ १२ ॥ इहैकस्थं जगत्कृत्स्नमिति यदुक्तं भगवता तत्पश्यत्यर्जुनो यदृष्टवानित्याह
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥ यदा पश्यति स्म
तदा दिव्यं वसुदेवतनयं देवं पाण्डवो देवदेवस्य तत्रैव विश्वात्मके शरीरे एकस्थमपि देवपितृमनुष्यादिभेदेना
नेकधा प्रविभक्तं कृत्स्नं जगदपश्यत् ॥ १३ ॥ दृष्ट्वा किं कृतवानित्यत आह ततः स विस्मयाविष्टो हृष्टरो

श्चर्याणि भारत ६ अदृष्टपूर्वाणि पूर्वं येन केनाप्यदृष्टानि बहून्यसंख्यान्याश्चर्याणि अद्भुतानि
रूपाणि पश्येत्यर्थः ६ कृतकृत्यत्वमित्याकांक्षायामाह इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं मम दे
हे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ७ गुडा वर्तुलत्वप्रधाना आसमन्तात्केशा यस्य स गुडाकेशः हे गुडा
केश सचराचरं स्थावरजंगमोपेतं सर्वमेकत्रैव तिष्ठतीति एकस्थं कृत्स्नं जगदिहास्मिन्मम देहे विश्वा
त्मके अद्य पश्य यच्चान्यत्परेषां पराजयं नाशनं वा द्रष्टुमिच्छसि तदपि मय्येव पश्येत्यर्थः ७ किंच
न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ८ यथा पूर्वं मित्रा
दीन्दृष्टवानसि तथा मां त्वं प्राकृतेन दिव्यतेजःपुंजं विश्वरूपं परममप्रमेयमनेन प्राकृतेन चर्ममयेन
चक्षुषा त्वं द्रष्टुं न शक्नोषीत्यर्थः तर्हि मम का वा गतिरित्याकांक्षायामाह दिव्यमिति
ते तुभ्यं मह्यं पुनः योग्यं दिव्यं तेजोमयं चक्षुर्ददामि येन मां द्रष्टुं शक्ष्यसे तेन चक्षुषा मे ममैश्वरमी
श्वरत्वकारणं योगं योगमायाविजृंभितं स्वरूपं पश्येत्यर्थः ८ संजय उवाच एवमुक्त्वा ततो राज
न्महायोगेश्वरो हरिः दर्शयामास पार्थाय परमं रूपमैश्वरं ९ योगो योगमाया सकार्या तत्स्याः प्रवर्तेः
कारणत्वादीश्वरः महांश्चासौ योगेश्वरश्च महायोगेश्वरः स्वसाक्षात्कारवतामविद्यां सकार्यां हरती
ति हरिः परमात्मा ऐश्वरमीश्वरस्य विष्णोः परमं निरतिशयं रूपं दर्शयामासेत्यर्थः ९ तद्रूपमेव वर्ण
यते द्वाभ्यां अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं १० अ

गी०
४

तत्क्रियाऽनाश्रयत्वात्क्रियाविषयत्वादनंतत्वाच्च नक्षरतीत्यक्षरं निरुपकूटस्थं एतद्वैतदक्षरं गार्गीति श्रु
तेः तत एव परमसुत्तमोत्तमं अन्यस्मान्नुपरः पुरुष इति श्रुतेः तत एव परमार्थत्वात्परमपुरुषार्थत्वाच्च वेदित
व्यं मुमुक्षुभिः ज्ञातव्यं स आत्मा स विज्ञेय इति श्रुतेः वेदितव्यं परमं पदमक्षरं निर्विशेषं परं ब्रह्म जगत्तत्त्वमे
वतद्व्यादिजगद्बीजमेतस्मान्यदस्तीत्यत आह त्वमस्येति अस्य महदादिस्थूलपर्यंतस्य विश्वस्य सर्ववि
कारजातस्य परं निधानं निधीयते सर्वमस्मिन्निति निधानं जगद्बीजमव्याकृतात्मत्वमेव महतः परमव्यक्तमिति
ज्ञाह शांतानुपरोधादिति परस्मान्नसन्नासत्तत्सदसदिति आत्मैन एवैतद्विश्वं सर्वं तत्पानित्यमपीति श्रुतेः
मत्तः परतरमिति स्मृतेश्च ननु पद्द्वय अहमेव परं ब्रह्मानिर्विशेषं जगत्कारणं वाऽहमेव तथापि मत्तोऽन्यः क
श्चिदीश्वरोऽस्ति तत्त्व उपास्यश्चेत्यत आह त्वमव्यय इति न विद्यते व्ययो नाशो नाशनाभ्यामस्येत्यविना
शोपस्य सोऽव्ययो नित्यः शाश्वतधर्मगोप्ता शश्वद्भवतीति शाश्वतो वेदस्तेनोक्तोपेक्षमो ज्ञानकर्मोद
यः तेषां गोप्ता वरोऽश्वमेधमेरक्षकः सच्चिदात्मको ईश्वरोऽपि त्वमेव एषभूताधिपतिरेषभूतपालए
षसेतुर्विधरण एषां लोकानामसंभेदायेति श्रुतेः ननु निर्विशेषं परं ब्रह्म सविशेषमपरं ब्रह्माप्यह
मेव तथापि मत्तोऽन्यो जीवोऽस्ति भेदापेत्यत आह सनातन इति न जीवो म्रियत इति श्रवणात् सना
तनो नित्यः पुरुषः पुरिशयनात्पुरुषः आत्मापि त्वमेव अयमात्मा ब्रह्मेति श्रुतेः १८ ननु सत्यं
ज्ञानमनंतं ब्रह्म यतो वा इमानि एष सर्वेश्वरः प्रज्ञानं ब्रह्मेत्यादिश्रुतिप्रामाण्यापत्या पदं ज्ञातं तत्तस्मे

58

रामः

माधनंजयः प्रणम्य शिरसा देवं कृतांजलिरभाषत १४ स्वरूपं पश्य मे पार्थ रूपाणि पश्यादित्यान्वसून् इति
त्वया पर्योक्तेन तथैव पश्यामीत्याहऽर्जुनः पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् ब्रह्मा
णमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् १५ हे देव तव देहे भूतविशेषसंघान् भूतविशे
षाः देवतिर्यगादिविभेदभिन्नाः जातिविशेषास्तेषां संघान् तानेव विशेषयति देवानिति तत्रापि विशे
षयति ब्रह्माणमिति ईशं सर्वप्राणिनां नियंतारं कमलासनस्थं ब्रह्माणं चतुर्मुखं ऋषीन् नारदसन
कादीन् दिव्यानुरगांश्च षवासुक्यादीन् पश्यामीत्यर्थः १५ अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्व
तोऽनंतरूपं नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप १६ अनेकबाहूदरवक्त्रनेत्ररूप
मनंतरूपं अनंतानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि हे विश्वेश्वर विश्वरूप तव नांतं न मध्यं पुनरादिं
न पश्यामि १६ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दी
प्तानलार्कद्युतिमप्रमेयं १७ तेजोराशिं तेजःपुंजमत एव सर्वतो दीप्तिमंतं प्रकाशयुक्तमत एव दीप्ताने
लार्कद्युतिं ज्वल्यमानसूर्यानलसन्निभमत एवाऽप्रमेयं परिच्छेदरहितं चक्षुः अगोचरमत एव
समंतात्सर्वतो दुर्निरीक्ष्यं दुःखेन द्रष्टुमशक्यं पश्यामि शिष्टं स्पष्टं १७ त्वदीयैतन्महामायापातसंभा
विताऽर्जुनस्त्वद्रूपमहत्त्वदर्शनेनैव त्वामेवमहं मन्य इत्याह त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं
निधानं त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे १८ अक्षरं निरवयवत्वान्निराश्रयत्वा

सिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः २१ हि यस्मात्त्वं शाश्वतधर्मगोप्ता तस्माद् यमप्यनद्भुतस्व
रूपं त्वां दृष्ट्वा केचिद्बलाधिका सुरसंघाः सुराणां देवानां संघाः सुरसंघाः ते वसमीपे विशंति केचिद्ब
लाभीताः संतो दूरादेव प्रांजलयो भूत्वा गृणंति स्तुवंति तथा महर्षिसिद्धसंघाः महर्षयो भृग्वादयः सि
द्धाः कपिलादयः तेषां संघाः स्वस्तीत्युक्त्वा पुष्कलाभिः शब्दार्थपुष्टियुक्ताभिः स्तुतिभिः त्वां स्तुवंति
२० एवं सामान्येनोक्त्वा विशेषमाह रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च गंध
र्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे २२ रुद्रादित्या वसवस्तथान्ये ये च साध्या देवता
भेदा विश्वे विश्वेदेवा अश्विनौ मरुतो देवविशेषाश्चोष्मपाः पितरस्ते च ऊष्मभागा हि पितर इति श्रु
वणात् गंधर्वा यक्षा असुराः सिद्धास्तेषां संघाश्च सर्वे विस्मिता आश्चर्यं प्राप्तास्त्वां वीक्षंते २२
एवं देवादीनां प्रवेशनं स्तवनं विस्मयदर्शनं चोक्त्वाऽधुना भयंकराकारदर्शनेन लोकानां स्वस्य च
भयकार्यं प्रतिपादयति त्रिभिः रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं बहूदरं बहुदंष्ट्रा
करालं दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहं २३ बहूनि बहुविधानि च वक्त्राणि नेत्राणि यस्मिंस्तत्
बहुवक्त्रनेत्रं बहवो बाहव ऊरवः पादाश्च यस्मिन् बहुबाहूरुपादं बहुभिर्दंष्ट्राभिः करालं विकृतं १८०
महदतिपरिमाणं ते रूपं स्वरूपं दृष्ट्वा लोकाः प्राणिनः सर्वे मत्केषणावाधिताः प्रव्यथिता महा
व्यथां प्राप्ता नाहं तथैवाहमपि प्रव्यथितो भीतः पार्थः २४ [illegible] नभःस्पृशं दीप्त

व तथापि मत्तो भिन्नं जगदस्तीत्याशंक्याह सर्वं खल्विदं ब्रह्मेत्यादि श्रुत्यर्थमनुस्मृत्य तदपि त्वमेवेत्याह
अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रं । पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तं
१९ अनादिमध्यान्तं आदिमध्यान्तरहितं वीरारामाक मेवीर्यमनन्तमपारं वीर्यं यस्य तमनन्तवीर्यं अनन्तवा
हुं अनन्ताः संख्यातीता बाहवः यस्य तमनन्तबाहुं शशिसूर्यौ नेत्रे यस्य तं शशिसूर्यनेत्रं दीप्तः शिखाभिः
जाज्वल्यमानो हुताशो वक्त्रे यस्य तं दीप्तहुताशवक्त्रं स्वतेजसा सूर्यवत्तपन्तं प्रज्वलन्तं त्वामिदं विश्वं
पश्यामि इदं विश्वं त्वमेवेति त्वद्भिन्नं विश्वं पश्यामि त्वां विश्वात्मना स्थितं पश्यामीत्यर्थः १९ तदेव वि
स्पष्टयति द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्र
यं प्रव्यथितं महात्मन् २० हि यस्मात्कारणात् द्यावापृथिव्योः भूम्यान्तरिक्षयो रन्तरमन्तरालं स
र्वं त्वयैकेन विश्वात्मना स्थितेन व्याप्तं दिशो याः प्राच्याद्याः सर्वा दिशश्च व्याप्ताः एताः उग्रं ते स
रामेतच्च रूपं कालरूपं त्वत्कं विनु सर्वं त्वयाप्यपेन व्याप्तं तत्त्वमात्रमेवेति न्यायेन त्वद्व्याप्तं विश्वं त्वमा
त्रमेवातः सर्वं विश्वं त्वमेवेत्यर्थः ब्रह्मैवेदं सर्वमिति श्रुतेः एवं सार्वात्म्यमभिधायाद्भुतत्वं विवृणुते रूप
मस्तीति दृष्ट्वेत्यादिना महात्मन् महान्महत्तरः विश्वमय आत्मा देहो यस्य सः हे महात्मन् अद्भुतमा
श्चर्यकरमुग्रमतिभयदं रूपं तवेदं रूपं दृष्ट्वा लोकत्रयं त्रिलोकस्थप्राणिजातं सर्वं प्रव्यथितं सुदुःखं व्याकु

लं च भवतीत्यर्थः २० किंच अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति स्वस्तीत्युक्त्वा महर्षि

गी० ६

वैश्च अवनिपालसंघैः सहैव त्वां विशन्ति विशधातोरवापि संबंधः भीष्मो द्रोणस्तथा सौतपुत्रः कर्णः
अस्मदीयैरपि योधमुख्यैर्द्रुपदधृष्टद्युम्नादिभिः सह त्वरमाणाः सन्तः भयानकानि भयंकराणि दं
ष्ट्राकरालानि ते वक्त्राणि विशन्ति प्रविशन्ति तत्र केचिद्योधमुख्याः चूर्णितैः चूर्णीकृतैरुत्तमाङ्गैः
शिरोभिरुपलक्षिताः सन्तो दशनान्तरेषु दन्तविवरेषु दृश्यन्ते २६ २७ पुनरपि तेषां भगवद्वक्त्रप्र
वेशनमेव सदृष्टान्तं प्रतिपादयति यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति तथा
तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति २८ नरलोके मर्त्यलोके वीराः शूराः नरलो

६०

कवीरा भीष्मादयः शिष्टः स्पष्टार्थः २८ किं च पुनर्वक्त्राणि प्रविशन्तीत्याकांक्षायां प्रवेशनप्र
योजनं सदृष्टान्तमुपपादयति यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः तथै
व नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९ समृद्धवेगाः प्रचंडवेगाः शल
भाः लोकाः शत्रुजनाः शिष्टं स्पष्टं २९ एवं प्रवेशनप्रयोजनमुक्त्वा तद्दर्शनपापरमेश्वरस्य
कृत्यमाह लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्स
मग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ३० ज्वलद्भिर्वह्निः प्रदीप्तैरिव ज्वालाज्वल्यमानैर्वदनैः सम

राम०

न्तात्सर्वतः प्रविष्टान्समग्रानशेषान्लोकान् शत्रुजनान् ग्रसमानो नितरां गिलन्सन् त्वं चेजिह्वाभि
र्लेलिह्यसे तालुलेहनं करोषि हे विष्णो तेजोभिः [illegible] समग्रं सर्वं जगदापूर्य व्याप्य तव उग्राः

मनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥२४॥ हि
शब्दो ऽवधारणार्थः हे विष्णो सर्वव्यापिन् नभःस्पृशं मेघपथमनभो व्याप्तं सर्वं स्पृशतीति नभःस्पृ
शं सर्वव्यापकं तेजोविशेषेणादीप्तं जाज्वल्यमानं अनेकवर्णं वर्णयितुं निवर्णा रूपाणि येन तानि अनेक
विधानि यस्मात् अनेकवर्णं ब्रह्मादिनानाविधविचित्ररूपविशेषविशिष्टं आत्तानि विस्फारितान्याननानि य
स्य तं व्यात्ताननं सूर्यमण्डलवद्दीप्तानि विशालानि विकृतानि च नेत्राणि यस्य तं दीप्तविशालनेत्रं त्वां दृष्ट्वैव प्रव्य
थितान्तरात्मा भयप्रक्षुब्धान्तरंगो ऽहं धृतिं धैर्यं शमं मनःस्वास्थ्यं च न विन्दामि न लभे किं तस्मात् सर्वः ॥२४॥ उक्त
मेवार्थं प्रकारान्तरेणाह भगवत्प्रसादं प्रार्थयन्ने दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि दि
शो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥२५॥ जगतां निवासो यः सः हे जगन्निवास देवेश अस्मान्
पक्षपातस्य प्रमेव दीप्ते प्रकाशेन इति देवः सन्निधानात्सर्वाभीष्टं चेष्टयतीति देवेशः दिशो न जाने भयेन वि
ते स्वास्थ्यं जगत्सु सुखं च न लभे न प्राप्नोमि भीतो ऽस्मि प्रसीद प्रसन्नो भव ॥ स्पष्टं ॥२५॥ पश्चात्तु दृष्टस्यमी
ति यदत्तं सज्जयपरेषां पराजयं च द्रष्टास्मीति तदप्यत्र दृष्टमित्याह चतुर्भिः अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरु
त्तमांगैः ॥२७॥ चकारस्य सर्वपदेन संबंधः अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः स

गी०
७
स्व४
61

तान्लोकान्नुजनान्समाहर्तुं प्रवृत्तोस्मि नत्तुलोकसंहारार्थं प्रवृत्तेन त्वया मां विना संहारः कर्तुं न शक्य इत्यत आ
ह ऋतेपीति प्रत्यनीकेषु प्रतिपक्षसेनास्ववस्थिताः सज्जीभूय वर्तमानाः त्वदेजेयाय यथा भीष्मद्रोणक
र्णादयस्ते च सर्वे त्वामृतेपि त्वत्प्रवृत्त्यभावेपि न भविष्यन्ति न स्थास्यन्ति मयपि महाग्रस्तत्वात्समुपस्थिते केऽर्जुनो
विष्यन्ति सर्वे पि निपतत्यर्थः ३२ एवं स्वप्रवृत्तिर्वोत्क्राफलितमाह तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा श
त्रून्भुंक्ष्व राज्यं समृद्धं मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३ महात्मकृता मयैवस
र्वे ध्वते क्षत्रियमारोषु सत्सु न योत्स्य इति तव प्रवृत्त्यऽभावो निष्फलो यस्मात्तस्मात्त्वमुत्तिष्ठ युद्धाय सन्नद्धो
भव यशो लभस्व देवैरपि अजय्या भीष्मादयोऽर्जुनो जितवानिति कीर्तिं प्राप्नुहि शत्रूंश्च दुर्योधनादीन् जि
त्वा शत्रुजयेन लब्धं समृद्धं सर्वैश्वर्यसंपन्नं राज्यं भुंक्ष्व भीष्मादीष्वतिरथीं कं संस्था शत्रुजयाद्यलेभ स्वे
त्वर्जुनस्याशंकां निःशेषयितुमाह मयैवेति यद्यपि शस्त्रास्त्रबलपराक्रमसंपन्ना भीष्मादयो दुर्जे
पा एव न तथाप्येते त्वत्प्रवृत्तेः पूर्वं मयैव स्वैरेण तेजोबलपौरुषमाहृत्य निःसारतां गमयित्वा निहता जी
र्णापरर्णवृत्पतनोन्मुखीकृता भवन्तीत्यर्थः सव्येन वामहस्तेन शरान्संधातुं मयोक्तुं शीलमस्यास्तीति
हे सव्यसाचिन् पूर्यतानेपाशुवर्तेष्वा [illegible] पातनेत्वं निमित्तमात्रं न तत्तत्त्वप्रयत्नविशेषोस्तीति स
र्वः ३२ उक्तमेवार्थं निर्विविक्तिसा पविस्पष्टयति द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यान
पि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ३४ द्रोणं भीष्मं कर्णंज

राम०

सर्वेऽग्रामा सोदीप्तप्रभातेपंतीग्रीष्माऽर्के वत्तापं कुर्वंति ३० यस्मात्कसोतेमात्रिनः कालांतकश्च
महाप्रस्रानयिमज्वलद्धृदनैर्गिलसिविचापमारोमहाद्भुतमेवकत्पंतस्मात् आख्याहिमेकोभ
वानुग्ररूपोनमोस्तुतेदेववरप्रसीदविज्ञातुमिच्छामिभवंतमाद्यंनहिप्रजानामितवप्रवृत्तिं ३१
हेदेववरदेवताश्रेष्ठतेनेमोस्तुत्वांनमस्कृत्वाप्रच्छामिप्रसीदऔग्रंत्सन्त्वाप्रसन्नोभवउग्ररूपःउ
ग्रस्पमलयकालरुद्रस्यरूपमिवरूपमाकारायस्पपद्धाउग्रमेवलोकेभयंकरंरूपंपस्यसःउग्ररूप
:कोभवान्प्रलयकालरुद्रोवाप्रलयाग्निर्वामहाप्रलयाग्निर्वाकोलांतकोवायमउग्ररूपोवाऽन्यो
वातवस्वरूपप्रवृत्तिंचमेमह्यमाख्याहिकथयआसमंतादनुप्रवृत्तंआद्यं:पद्माआदौभवं
अद्यंस्तेजगतःसंहारकत्वेसौम्यरूपंजगदाघमीप्सुरेवाभवंतंविज्ञातुमिच्छामिकथयेत्यर्थ
:नतुप्रदीप्तस्वरूपंप्रत्यक्षदर्शनेनैवज्ञातुंशक्यतेकोभवानितिकोऽयंप्रश्नइत्यतआहनेति
हिप्रसादंहमनुष्यःकिंविस्तरेणतस्माततवप्रवृत्तिंनप्रजानामिअतस्त्वमेवब्रूहीत्यर्थः ३१ स
स्वप्रवृत्तिंवाख्यातुंश्रीभगवानुवाच कालोऽस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः
ऋतेऽपित्वांनभविष्यंतिसर्वेयेऽवस्थिताःप्रत्यनीकेषुयोधाः ३२ लोकक्षयकृत्लोकानांमुमुर्षो
रापमारोगानावाप्रसानोक्षयनाशनंकरोतीतिलोकक्षयकृत्प्रवृद्ध [illegible] प्रवृद्धःकोलोऽस्मिसर्वेषा
सांसंहारहेतुःकालोहमित्यर्थःइतिस्वप्रवृत्तिंख्याययित्वास्वप्रवृत्तिंमाहलोकानितिइहात्रसमव

पत्वमित्यर्थः तव प्रकीर्त्या जगत् अनुरज्यते अनुरागं चोपैतीति यत्तत्स्थाने युक्तं तत्तदनुरक्तिविषय
त्वमित्यर्थः तव प्रकीर्त्या भीतानि रक्षांसि दिशो द्रवंतीति यत्तत्स्थाने युक्तं तत्र रक्षः पलायने हेतुत्वमि
त्यर्थः सिद्धसंघाः सिद्धानां देवताविशेषाणां संघास्त्वां नमस्यंतीति यत्तत्स्थाने युक्तं तव सर्ववंदन
मस्कारविषयत्वमित्यर्थः यद्वा हे हृषीकेश कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमि
ह प्रवृत्त इति प्रसंगे भीरुपमाणे सर्वदुष्टलोकसंहारार्थं प्रवृत्तोसीत्युक्ते सकलसंरक्षणाय तव प्रकीर्त्या प्र
कृष्टवर्णनेन स्तुतेन जगत् साधुलोकः प्रहृष्यति संतोषमुपैतीति यत्तत्स्थाने युक्तं सर्वेश्वरस्य सर्वलोकनारा
परायणो न भवतः सर्वदुष्टसंहारे क्रियमाणे साधूनां प्रहर्षणं युक्तमेवेत्यर्थः तव प्रकीर्त्या जगत्साधु
लोकः त्वयि भक्तवत्सले सर्वेश्वरे तस्मिन् हृदि परमात्मन्यनुरज्यते अनुरागं वहतीति यत्तत्स्थाने युक्तं लोकोपद्र
वनिवारणाय प्रवृत्ते परमकृपालो परमेश्वरे त्वयि साधूनामनुरागजननं युक्तमेवेत्यर्थः तव प्रकीर्त्या दुष्टा
न् संहर्तुं प्रकृष्टत्वात् तव प्रकृष्टवर्णनेन स्तुतेन रक्षांसि भीतानि राक्षसाः सर्वे भीताः संतः दिशो द्रवंति
दिक्षु शरणं प्रतिपलायंते तव प्रकीर्त्या सर्वलोकसुखकारिणः सिद्धसंघाः सर्वे त्वां नमस्यंति सिद्धा
इति देवजात्युपलक्षणं देवर्षिसिद्धगंधर्वचारणादयः सर्वे स्वामिनं त्वां तत्तथैव कर्त्तव्यमिति प्रार्थनारू
पेण त्वां प्रणमंतीत्यर्थः ३६ भगवतः सर्वदेवनमस्कार्यत्वे हेतुं वदन्नकाकास्वेन नमस्कार्यत्वमापा
पादयति कस्माच्चेतेन नमेरन् महात्मन् गरीयसे ब्रह्मणोप्यादिकर्त्रे अनंत देवेश जगन्निवास

यद्रथं च तथाऽन्यानपि भगदत्तसोमदत्तादीन् च योधवीरान्मया तेजोबलपौरुषापकर्षेण हतान् हतप्रायांस्त्वं
जहि बाणैः पातय तत्र मा व्यथिष्ठाः द्रोणादिभ्यस्त्रस्य पन्नईति न याविधः स च्छेद मरणाभो प्सइति वा सर्व
वी पश्यन्नि पुत्रः करोदुर्जयइति पितृवरेणावध्यः सैंधवइति वैतसौ च दपि व्ययो मा कुरु किंतु मदनुग्रहे
णारणे सपत्नान् दुर्योधनादीञ्छत्रून् जेतासि जेष्यसि अत्र न संशयो यस्मादेवं तस्माद्युध्यस्वेति नात्र वि
धिः किंतु युक्ते कारणं ज्ञानं तत्कारणं चित्तशुद्धिः तत्कारणं स्वधर्मानुष्ठितिरिति सच्चयत्निवयत्नि पृथ्व
स्येति मुमुक्षुस्त्वं स्वधर्ममनुवर्तस्वेति तात्पर्यार्थः एतेन भक्तासमाराधितः परमेश्वरः स्वभक्तानां
दुर्लभमपि कार्यं सुलभं करोतीति सूचितं भवति ३४ यत्तदर्थं सर्वं तदाच्छाप संजय उवाच एतच्छ्रु
त्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभी
तः प्रणम्य ३५ किरीट्यर्जुनः भयभक्तिभ्यां वेपमानः कंपमानः सन् कृताञ्जलिर्भूत्वा केशव
स्येतदुक्तप्रकारं वचनं श्रुत्वा हस्ताभ्यां नमस्कृत्वा साष्टांगं च भूयो प्रणम्य सगद्गदं हर्षातिश
येनानंदाश्रुजलवेगेन च कुण्ठितकण्ठध्वनि यथा तथा भीतभीतो ऽत्यंतभयप्राप्तः सन् भूय एवेदं
वचनं कृष्णमाह ३५ अर्जुन उवाच स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च र
क्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ३६ हे हृषीकेश एतेव प्रकीर्त्या त्वन्महि
त्वकीर्तनेन श्रुतेन सर्वं जगत्प्रहृष्यति हर्षमाप्नोति यत्प्रहृष्यति तत्स्थाने युक्तं तत्र सर्वं जगदनुरज्यते विष

गी०
९

तिमर्त्सितुंपद्स्वरूंकदाचिदेनाधिकंचिदपिनक्षरतीत्यक्षरंनित्यंकूटस्थंसच्चिदानंदैकरसमद्वितीयंनिर्वि
शेषंतत्परंब्रह्मत्वमेवत्वत्तोनान्यत्ततोऽनेनत्वंसिद्धं सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः एतदेवं ततः सर्वदेवन
मस्कार्यत्वेनत्वमुक्तोसिनितितात्पर्यार्थः ३७ ब्रह्मैवेदंसर्वमित्यादिश्रुत्यर्थोवक्षमेनसविशेषनिर्विशे
षंचसर्वंत्वमेवेतिभगवतःसर्वात्म्यमतियादयन्नाह त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनि
धानंवेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप ३८ पूर्णत्वात्पुरुषःस्वयंनिर्विकारत्वात्स
र्वकारणःसनातनः आदिदेवःजगत्कारणत्वादादिःस्वप्रकाशत्वाद्दिव्यतइतिदेवः आदिश्चासौदेव
श्चादिदेवःहिरण्यगर्भादिकर्तामायोपाधिकःपरमेश्वरस्त्वमेवास्यपरिदृश्यमानस्यविश्वस्यनिधानं
सृष्टिप्रलयादपश्चजलेतरंगादयइवयत्रमहदादयोविकाराःसर्वेनिधीयंतेतन्निधानंजगद्बीज
मायापाधेत्वमेवासि बुद्धितद्वृत्तिकारणेऽहंकारममकारादीन्साक्षाद्व्यवधानेनसर्वदापीवेत्तिजाना
तिसचवेत्तासर्वसाक्षीप्रत्यगात्मापित्वमेवासितद्वेद्यंबुद्धितद्वृत्तिकारणादिसर्वदृश्यजातंत्वमेवासि किं
च परंसर्वदृश्यविलक्षणंतयासर्वमहत्त्वंमायातत्कार्यलेशःसर्वंधतःजीवेशजगदाभासक
ल्पनाधिष्ठानंनित्यशुद्धबुद्धमुक्तस्वभावंनिर्विशेषनिराभासनित्यानंदैकरसमद्वितीयपरमपुरीयप
रंधामपरंज्योतिःपरब्रह्मतच्चापित्वमेवासि अनंतमपरिच्छिन्नरूपंविद्यतेकस्यतत्पंचपसंबोधनेअनंतरू
पयतस्त्वपापब्रह्मणाःसद्रूपेणास्यप्रपंचस्यकल्पितस्याधिष्ठानत्वात्त्वयाततंव्याप्तंसत्स्फुरणरूपेणयद्व्याततंत्वयात्तमेवेतिसोपेन

63

राम०

९ तथासौ कश्चित् सत्त्वादिमहत्त्वादीश्वरत्वाच्च तव सर्वनमस्कार्य है किं वत्तो अमित्यर्थः ।

त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ चकारस्त्वर्थः महान्महत्तरः सर्वोत्कृष्ट आत्मा स्वभावो यस्य हे महात्म
न् ते तुभ्यं सिद्धादयः सर्वे देवाः कस्मात्तु हेतोः न नमेरन् हेतुनानेन न नमेयुः सर्वप्रकारैर्विचार्यमाणे त्वमेव केन
नमस्करिष्यतीत्यर्थः ननु हमपि लोकसाधारणः केन विशेषेण मह्यं नमस्कुर्युरित्याशंकायां नेत्याह
स्वयं बलवीर्यतेजः शक्तिविशेषैः परमार्थतस्त्वं भवानेव सर्वोत्तमः सर्वनमस्कार्य इति सर्वनमस्कार्यत्वे
हेतुना गरीयसे इत्यादिना गरीयसे ज्ञानादिभिरुक्तो विशेषैः सर्वोत्तरः सर्वगरीयान् तस्मै गरी
यसे गुरुतराय ज्ञानादिभिः सर्वेभ्यो गरीयस्त्वादित्यर्थः किंच ब्रह्मणोऽप्यादिकर्त्रे ब्रह्मणो हिरण्य
गर्भस्यापि सर्वस्य तत्पितेरपि सर्वाराध्यस्यादिकर्त्रे आदिर्जनिकारणं कर्त्ता नियामकः पुनरपि हेत्वंत
राण्याह हे अनंत देवेश जगन्निवास अनंतत्वाद्देवानामीश्वरत्वाज्जगन्निवासत्वाच्च सर्वदेवनमस्कार्यो
सीत्यर्थः अनंतश्चात्मा यो देवानामधिपो यस्मिन्लोको अधिष्ठित इति श्रुतेः ननु ममानंतत्वं
न संभवति जगत्कारणत्वाद्व्यवधानादित्याशंकायामाह सदसदिति नामरूपाभ्यामस्तीति प्रति
दिरूपते तत्सत्कार्यं जगत्तत्तद्विलक्षणमसज्जगत्कारणमव्याकृतं तदुभयं सदसच्च त्वमेव स
र्वैक्येन क्लृप्तेति श्रुतेः ननु सदसद्रूपत्वेपि ममानंतत्वं न संभवति परेणाक्षरेण व्यवधानादित्यत
आह त्वमक्षरमिति तत्परं तयोः जगदव्याकृतयोः कारणं यो नित्यत्वेन सच्चिदानंदरूपत्वे
न निरतिशयमहत्त्वेनातिसूक्ष्मत्वेन परं विलक्षणं कारणं च यावायत्तदक्षरमानि विदित्वेमोदित्य

गी० १०

श्रीगणेशाय नमः ॥ पूर्वाध्यायांते मन्मना भव मद्भक्त इत्यर्जुनं प्रति मुमुक्षुसंचित्तशुद्ध्युपेतज्ञानयुक्ता न ह्यारा केवलमिदं
येन सविशेषब्रह्मोपास्तिरुक्ता इदानीं मंदप्रज्ञस्य मुमुक्षोः रूपस्य वृत्तीर्मोक्षः उपास्त्वोपास्तेः सिद्धिपूर्वं प्रवृत्तिसिद्धये
स्वोपास्तेः फलं स्वरूपं च परमात्मनः उपास्यस्य सर्वज्ञत्वं सर्वेश्वरत्वं सर्वात्मत्वं तत्त्वं भक्तानुग्राहकत्वं विभूतिविस्त
रं च प्रतिपादयितुं दशमाध्याय आरभ्यते तत्रादावर्जुनस्य श्रोतुरुपासोत्सुकत्वमुपे मनोरंजयितुमिदं श्रीभगवानु
वाच भूय एव महाबाहो शृणु मे परमं वचः यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया १ हे महाबाहो ज्ञानयत्स्वव
स्तुनः परमं सर्वस्मादुत्कृष्टत्वात् विज्ञेयत्वात् सर्वव्यवहारागोचरत्वाच्च भूयः पुनरपि देवबोधयितुं मुच्यमानं मे मम परमा
र्थविषयं तन्निष्ठासिद्धिकारणं वचो वचनं शृणु इदं श्रुत्वा तदर्थं ज्ञात्वा तरिष्यामीति तत्र स्वरोपि यमाणाय प्रीतिं कुर्वते
श्रवणेनोत्सुकायेत्यर्थः ते तुभ्यं हितकाम्यया हितं नित्यनिरतिशयं सुखं तस्य संपादनेच्छया प्रवक्ष्यामि तत्र च्छ । तेवतन
र्थः एतेन शुश्रूषात्वान्मत्वात् ज्ञात्वा तत्प्रीतिमोक्षे श्रद्धाय श्रद्धावते एव तत्त्वोपदेशः कर्त्तव्य इति सूचितं १ ननु मम तत्
त्वोपदेष्टारो महांतो व्यासादयः संति तेषां परं वचः श्रुतवंतो ममापि ज्ञानं भविष्यति किं मद्वचन इत्यस्यामित तत्र आ
ह न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः २ सुरगणा इंद्रादयो देवा म
हर्षयो भृग्वादयः व्यासादयश्च मे मम महदादिसर्वप्रपंचसृष्टुः परमेश्वरस्य प्रभवं प्रभावं उत्पत्तिस्थितिप्रवेश
नियमननिग्रहानुग्रहादिसामर्थ्यं सर्वेशः सर्वप्रकारेण विदुः न विजानंति ननु देवा भृग्वादयश्चादिमा दिव्यज्ञा
नसंपन्ना स्वकर्तृत्वेन भावेन जानंतीत्यत आह अहमादिरिति हि यस्मात् कारणात् देवानां महर्षीणां च सर्वेषामुत्प
त्ते वैभवसिद्धेस्तपःसिद्धेर्योगसिद्धेर्दिव्यज्ञानसिद्धेश्चाप्यहमेवादिः कारणं तस्माच्च देवा महर्षयस्समस्तानि ति
न पुनरिमं महर्षयो देवता स्वेति [illegible] तेन मत्तं भवनं हेतं न विजा

64

राम०

गीतातात्पर्यदर्पणोध्याय १०

पत्र १५

षैति ब्रह्मवित्त्वं नाम ब्रह्मरूपेण सर्वदेहस्थवित्स्वरूपो आत्मत्ववेदनं तत्सत्त्वे देहाद्यहंभावाऽभाव एव तत्सत्त्वे तु ब्रह्म
रूपात्मत्वभावनाऽभावः द्वयोर्विपरीतप्रत्यययोस्तेजस्तिमिरयोरिव युगपदेकमात्र्याद्ये काधिकरणात्तन्न संभवति अस
त्येवानात्मन्यहंभावे तन्नाश्रितजात्याद्यभिमानेनैव विदुषः कर्मकर्तृत्वं नास्ति ततो न बुद्धिपूर्वकं विदुषः पापाचरणं सं
भवति ननु देहात्मना पापं कृत्वा मया पापं कृतमित्यभिज्ञक्लिष्टतत्त्वमस्य यः पुनरविक्रियब्रह्मात्मना न हं कर्ता सोऽन्य
कर्तृत्वमनस्य श्लोकस्य क्रमादुपयुज्यते एवं तिचेन्न तथात्वे सार्वात्म्यदर्शनविच्छित्तिप्रसंगात् सार्वात्म्यदर्शने देहाद्या
त्मत्वबुद्धिः पापाचरणं च विदुषो न संभवति अहं ब्रह्मविन्मदोषो नास्ति मया हिंसा वा पद्येष्टाचरणीयं कारे
ति स ब्रह्मविदेव न भवति सर्वं खल्विदं ब्रह्म नेह नानास्ति इत्यादिश्रुतिविहितस्य सर्वात्मभावात् अतो न बुद्धिपूर्वकं विदुषः पापाच
रणं किंत्वऽबुद्धिपूर्वकं किंचित्संभवति तेन तस्य लेपो नास्ति यथाप्युक्तं तस्य माहात्म्यस्य एतदेव विशेषणं सर्वपा
पैः प्रमुच्यत इति पद्य अनादिं जन्मादिविकारवर्जितं अत एवाजं जन्मादिसर्वविकाररहितं लोकमहेश्वरं सर्व
पालोकानां महान्तमीश्वरं निरतिशयैश्वर्यसंपन्नं निग्रहानुग्रहकर्तारं मोक्षप्रदातारं च मां परमात्मानं यो वेत्ति
शास्त्राचार्योपदेशाभ्यां ज्ञात्वा मोक्षेच्छया यो मामुपास्ते स मर्त्येषु मनुष्येषु मध्ये एवासंमूढः संमोहः तदसद्विवेक
स्वरूपः तद्रहितलक्षणत्वादसंमूढः यस्मात्तन्मात्मानं सर्वेषु देहेष्वनुस्यूतं दृष्ट्वा स्वयं तद्विषयो भूत्वा मोक्षमेवोपेक्ष
माणः सन् श्रद्धाभक्तिभ्यां मामुपास्ते तस्मादसावसंमूढो मर्त्येषु सर्वपापैर्बुद्धिमनोवाक्कायकृतानि जन्मा
न्तराणि पापानि कानि च तैः सर्वैः पापैः ज्ञानोत्पत्तेः प्रतिबंधकैर्मदुपास्त्या प्रमुच्यते प्रकर्षेण निःशेषं मुच्यते मु
च्यते ज्ञानमुत्पद्यते येन साक्षात्पापाप्यकर्मपाशेरिति सर्वपापानि मदुपास्त्या सर्वपापाद्विमुक्तः

नेतियथापि तन्महत्त्वं शिष्यसुतत्ततो मम महत्त्वमहमेवोपदेष्टा पीतिभावः २ अनुत्त्वे ... महत्त्वमयादि ... तांत

श्रुत्वेतो मम मनेन किं स्यादित्याकांक्षायामाह यो मामजमनादिं च वेत्ति लोकमहेश्वरं असंमूढः स मर्त्येषु सर्वपापैः

प्रमुच्यते ३ मर्त्येषु मरणशीलेषु शतकोटिसंख्याकेषु पि ... यो मुमुक्षुः सदसद्विवेकवैराग्याभ्यां असंमू

ढः संमोहो विपर्ययो ... ताव ... हितो ऽसंमूढः ... विषयापा ... सर्वसंन्यस

मन्ने साद संयतः स च मामजत्वेनादिसमुपन्ने ऽतो न जायते जन्मादिरहितं जन्माद्यसंभवे कारणमाह अनादि

मिति न तेस्य ... जनितानि चादियदीति मामजत्वाद्दाहि जन्मादिकारणनिमित्तमुपादानं चेन विद्यते यस्मा

ऽनादिस्तमनन्तत्वाजं नित्यं ननु नादित्वाजेत्वयोः ... स्यापि ... भवान्न स्यापि नित्यत्वं स्यादित्यत्याशंक्या तो

तस्य भावत्वमहेश्वरत्वं परममहत्त्वमुक्तं ... मानगम्यत्वं वस्तुचापितुमाह लोकमहेश्वरमिति पस्य ... क्षमा

त्रैणलोकाः जगत्सर्वं वेष्टते स ईश्वरः पथा रथो जडो ऽपि केनचेतनेन याज्येज्जगत्स्वचेतनेन च ... तोजग

त्स्रष्टा ... पयाति तोः चेतन स्य समत्वं भावत्वं परममहत्त्वं चानुमीयते ... अ स्यजगतो नित्यमेवेति ... पतेच

तेतो ऽनादिमजं महाश्चासावीश्वरश्च महेश्वरो लोकस्य महेश्वरो लोकमहेश्वरस्तं सर्वस्य प्रपंचप्रवर्तकं चकोरा

ट् स्या ... ऽसंगो ... पं मानिर्विशेषं परं ब्रह्मवेत्ति यः साक्षादिदमेवाहमस्मीति स्वात्मना विजानाति स ब्रह्मविद्याति

सर्वपापैः सर्वैर्बुद्धिपूर्वकैरबुद्धिपूर्वकैश्च पापैः पापकोपैः दुःखदुपोनिदुर्गतितिप्रमुच्यते पापैः पापकौ

पैश्च न ... स्वबध्यते ... यः ब्रह्मविदः सर्वात्मदर्शिनः बुद्धिपूर्वकपापायानं ... संभवति ... वितना

संभवानपायपापकर्मा च श्रसास्य देहजातितत्त्वेभ्यो ऽभिमानेन ममत्वाभिमानेनेत्येवं मुच्यत्वाह विन्न मेवन से

३ पात्मा सर्वपापनिवृत्तिर्ज्ञानं च मम साधनं सिध्यतीति भावः एतेन संसारमोक्षस्थितिबंधहेतुरित्यादि कृतिर्भगवद् संसार
बंधनं च मोक्षकारणत्वं यस्य प्रतिपादितं भवति तेन मुमुक्षुभजनीयत्वं सिद्धं ४ भवंति भावा भूतानामिति स्वस्य
मुमुक्षूपास्यत्वे कारणं दुष्टशिष्टनिग्रहानुग्रहसामर्थ्यं बंधमोक्षहेतुत्वं सर्वतंत्रस्वातंत्र्यं सर्वज्ञत्वं सर्वैश्वर्यं
च स्वस्य च वित्वाऽधुना सामान्येन स्वविभूतिभेदं भक्तानामुपासनीयं वक्तुमिदं शाति महर्षयः सप्त पूर्वे चत्वारो मनव
स्तथा मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ६ एवं सर्वेभ्यः प्राकृतेनाऽस्मत्प्रभृत्वाद्यो विहितातां महर्ष
यः तथा पूर्वे प्राचीनाः स्वायंभुवादयश्चत्वारो मनवे ब्रह्मभजगम्बंधुः ब्रह्मणः संकल्पात्मकान्मनसो जाता
मानसाः तत्र एव मद्भावा मम परमेश्वरस्य स्वरूपत्वेन भावं अंतः इति मद्भावा मम विभूतयः इत्यर्थः लोके लोकत्रि

तये येषां भृग्वादीनां स्वायंभुवादीनां च संबंधिन्य इमाः सर्वत्र परिदृश्यंते स्थावरजंगमात्मकाः प्रजा एताः सर्वा
अपि मम विभूतयः एवेत्यभिप्रायः एतेन चराचरात्मकं विश्वं सर्वं मय ब्रह्मरूपो विभूतिरेवेति सिद्धं भवति ६
एवमात्मोपयोगजन्मैश्वर्यं विभूतिं च प्रतिपाद्य एतद्वृद्धस्य गिदितवतः हृदं तस्य फलमाह एतां वि
भूतिं योगं च मम यो वेत्ति तत्त्वतः सोऽविकंपेन योगेन युज्यते नात्र संशयः ७ मम विविधेषु भूतेषु परस्य
ब्रह्मणः एतां प्रतिपादितां विभूतिमापाद्यां विविधाकारेण भवनं विभूतिः तां सर्वोत्कृष्टतां योगं च माया यो ए८०
गजन्मैश्वर्यं च हि स्थित्यादिनं च सर्वेशनियमननिग्रहानुग्रहादि सामर्थ्यं चैतत्सर्वं तत्त्वतो यथार्थ्येन यो
विचक्षणः पात्मा चार्योपदेशाज्जानाति विवेकितत्वेनाभोनिने दृढात कि नु परमात्मनः स्वरूपमेवेति सर्वम

सन्तानं प्राप्य मुक्तो भवतीत्यर्थः ३ स्वोपास्या सर्वपापविनिर्मुक्तानां मुमुक्षूणां तस्मादेव ज्ञानेन ज्ञानसा
धनं च भवतीत्याह द्वाभ्यां बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवोऽभावो भयं चाऽभयमे
व च ४ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ५ ज्ञानं ब्रह्मा
त्मैकत्वविषयं परोक्षमपरोक्षं च बुद्धिस्तदेवाहमिति ज्ञानं तु ब्रह्मभावनात्मिका असंमोहः वि
परीतभावनानुदयः क्षमाऽध्यात्मिकाद्युपद्रवसहिष्णुता सत्यं यथार्थवचनं सत्यमिति ब्रह्मोच पा
स्तुतोऽस्ति तस्य सत्यत्वे नास्तीति निषेधायोगात्। यतः श्रुतिः अथात आदेशो नेति नेतीति नेति नेत्यात्मा इ
त्यादिरिति चारोपितजगन्निषिध्यैव ब्रह्माधिगमयति ततो वासनया प्रतीयमानं नामरूपात्मकं जगत्सर्वं मिथ्यै
वेत्यधिष्ठानसंदर्शनसंजातविज्ञानेन। नेदं जगत्किंतु ब्रह्मैवेत्यधिष्ठानमात्रत्वावशेषं निषिध्य तत्रिवेधाव
धिभूतं तद्रूपेणावेन स्वच्छत्वस्वतंत्रसुस्थं चिदेकरसं परंब्रह्म इदमेवाहमिति शुद्धात्मना बुद्धिमता सम्यग्वेत्तुं यह
वेतान्तं तु शक्यत एवेत्यभिप्रायेणोक्तं प्रस्यातस्य निभृतानीति एवं ज्ञातुमशक्तो स्यपतेरुपायांतरमाह
येनेति इदं परिदृश्यमानं जडं जगत्सर्वं येन प्रकाशैकरूपेण ब्रह्मणा नितं बहिरंतश्च सर्वतो व्याप्तं प्र
काशितं च भवति स पर्यगाच्छुक्रमकायमिति तस्य भासा सर्वमिदं विभातीति श्रुतेः ततः प्रकाश्यस्य प्र
काशव्यतिरेकेण पृथक्स्वरूपाभावादग्निव्याप्तायःपिंडवदेतद्दर्शनात् ब्रह्मव्याप्तमिदं सर्वं ब्रह्मैवेति स
र्वस्य ब्रह्ममात्रत्वविज्ञानेन स्वस्यापि ब्रह्ममात्रत्वं ज्ञातुं शक्यत एवेत्यर्थः ॥ पुरुषः स परः पार्थेति परस्य ब्र

निवर्त्तते देहवंतः पुनर्न भवंति तदेवाक्षरं परं ब्रह्म मायोपाधिकस्यास्य ममेश्वरस्य धाम मम श्रीहरेः तमवा
धितमनाद्यंतं प्रकाशात्मकं स्वरूपं नैजमित्यर्थः २१ परस्तस्मादित्यादिश्लोकद्वयेन स्वस्य परस्य ब्रह्मणः
स्वरूपं तत्प्राप्तिं नाम पुनरावृत्तिं च प्रतिपाद्याधुना कथं तत्प्राप्स्यामः केन वा साधनेनेति यतनेनेत्याकांक्षावतां यदि
मुहुर्जन्मनां मोक्षैककामानां तत्प्राप्तौ परमसाधनमाह पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्यांतःस्था-
नि भूतानि येन सर्वमिदं ततं २२ परः अव्यक्तात्तु परः पुरुष इति श्रवणात् सर्वो जनः पुरुषः बहिरंतः सर्वत्रैक-
रसत्वेन पूर्णत्वात् पुरुषः सोऽक्षरः परमात्मा अनन्यया नविद्यतेऽन्यः परमात्मातिरिक्तो विषयो यस्याः सा-
ऽनन्या सर्वत्र ब्रह्ममात्रग्राहिणी अहमिदं प्रपंचनिर्मुक्तानयाऽनन्यया भक्त्या सर्वमिदमहं च ब्रह्मैवेति वि-
विद्वाननं पेनिभक्तिस्तीनं भजति स तत्सो नार्थः तु शब्दोऽवधारणार्थः भक्त्या
नैवाचार्यप्रसादलब्धेन समाधिनिष्ठया मुमुक्षुणा लभ्यः प्राप्यः परमात्मा न तु कर्मणा योगेन सांख्येन च तत्-
त्प्राप्तुं शक्यमित्यर्थः ननु परं ब्रह्माति सूक्ष्ममतींद्रियं च कथं मुमुक्षुरिदमेवाहमिति ज्ञातुं शक्नुयादित्याकां-
क्षायामाह यस्येति यस्य निर्विशेषस्य परिपूर्णस्याद्वितीयस्य ब्रह्मणोंऽतःस्थान्यंतरं तद्देशोद्ये रोजग-
रमिवाभासरूपेण मानि भूतानि स्थितानि भवंति यद्यपि दर्पणे नगरं स्थितमिव भाती यतो न यापि सन्निहित-
दृष्ट्या सम्यग्विलोक्यमाने दर्पणमेवास्ति न तु तत्र नगरं स्वरूपं स्वरूपेण विद्यते तद्वद् ब्रह्मण्यपि जगदस्तीव भा-
तिस्तान दृष्ट्याधिष्ठानग्राहिण्या परिशील्यमाने ब्रह्मैकमेवास्ति न तु तत्र जगत् ननु यदुक्तं तत्स्यमेवद्यं यो

त्र यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ २३ योगिन इत्यत्र योगिनः यो
गिन इति जातिसहस्रादीनामेकशेषे कृते योगिन इति रूपसिद्धिः तत्रैकेन योगिन इति पदेन संन्यासिन उच्यन्ते द्वितीयेन
तु कर्मिणः कर्मिणां कर्मफलसंन्यासयोगाङ्गेन गौणयोगित्वात् योगिन उभयविधाः यत्र यस्मिन्काले प्रयाता मृताः सन्तः
स्वयमनावृत्तिं च यान्ति तं कालं वक्ष्यामि इत्यन्वयः योगिन उभयविधानां योगिनां सामान्येनैकत्र मृतानां पुन
रावृत्तिरन्यत्र मृतानां तु उत्तरायणमिति नियमेन परलोकप्राप्तौ सत्यामुभयेषां स्वयमाकाङ्क्षा भवति यत्कर्म कुरु
ते तदभिसंपद्यत इत्यादिश्रुतिबलात् क्रियाभेदे फलभेद इति न्यायेन च नियतमयनविभागं दर्शयति अग्नि
ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः २४ तेऽर्चिषमभिसंभवं
त्यर्चिषोऽहरित्यग्नेरनन्तरमहरेव श्रूयते ननु ज्योतिः कथमत्राग्निर्ज्योतिरिति श्रुतिविरुद्धमुच्यत इति न शंक
नीयं अर्चिश्शब्दस्याग्निर्ज्योतिषोरुभयोरपि साधारण्याच्छ्रुत्यार्चिरित्युक्तं तद्देवतानुविभज्य दर्शितं ततो
न कोऽपि विरोधः अग्निरुत्तरायणकालाभिमानिनी देवता ज्योतिश्च कालाभिमानिनी देवता अहरित्यहरभि
मानिनी देवता शुक्लः शुक्लपक्षाभिमानिनी देवता षण्मासाः षण्मासाभिमानिनी देवताः संवत्सरादी
नामप्युपलक्षणमेतत् यत्रोत्तरायणकालेऽस्मादयः कालाभिमानिनो भवन्ति तिष्ठन्ति तत्तस्मिन्नुत्तरायणे प्रया
ता मृताः सन्तो ब्रह्मविदस्तेषां ब्रह्मोपासकत्वेन ये विद्वांसो ब्रह्मविदो ब्रह्मोपासका योगिन उक्तक्रमेण ब्रह्म गच्छ
न्ति प्राप्नुवन्ति न साक्षात् स तेजसि सूर्ये संपन्न इत्युक्त्वानन्तरं तनरंग्यणन्यरं पुरुषमीक्ष त इति ब्रह्म मानवं तरणं स्माव

२५
आवृत्तिं ४

104

रम०
१२

स्मरणो ज्ञानैकसाध्यत्वं उत्क्रान्तस्मरणेन ज्ञानेन ब्रह्मभावापन्नानां उपतीनां संसाध्यत्वं निवर्तते इत्यत्र
एवेति लक्षणां विदेहमुक्तिं चरमफलं प्रतिपाद्य इदानीं मुक्तप्रकारेण ब्रह्मज्ञानं तु मध्यमानां मुमुक्षुबु
द्धीनां मुमुक्षूणां चित्तशुद्ध्येकान्तैः सत्यकामपरं चापरं च ब्रह्म यदोंकारः । तत्परापरयोर्ब्रह्मणोः रूपाभेदो प्रणवस्य प्रती
कत्वं स्थापयित्वा । न तु यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति श्रुत्या सत्यकारीत्या स्तुतेनोच्चा
र्यमाणे ओंकारे परब्रह्मबुद्धिं कृत्वा तमेव ब्रह्मेति ये ध्यायन्ति तेषां प्रणवावेशितब्रह्मबुद्धीनां मन्येषां च तपःश्र
द्धे ये ह्युपवसन्त्यरण्य इत्यादिश्रुत्युक्तसगुणोपासकानां क्रमेण विदेहमुक्तिं प्राप्स्यमानानां संन्यासयोगव
तां प्रयाणकाले प्राप्तेऽपि तेषां कागतिरित्याकाङ्क्षायां तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते ते अर्चिषमभि
संभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं सं
वत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था
इति अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान्षड्द
क्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो
राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्त इति श्रुत्युक्तेनोत्तरायणे
न ब्रह्मप्राप्तिरुत्तरायणेति लक्षणेति वा धूमपितृयुक्तदक्षिणायनेन वा प्रवृत्तधर्मिणां कर्मिणां कर्मफलमिति सूचना
र्थं च दक्षिणायनमपि मार्गद्वयं तत्र केनगन्तानामुत्तरायणेति मध्ये न मार्गेण गन्तानामुत्तरायणेति च प्रतिपादय

२६

105

शाधिकाग्न्यादिदेवताधिष्ठितत्वात् विद्याप्राप्यत्वात् प्रकाशलोकप्रविष्टत्वात् ब्रह्मप्राप्तिहेतुत्वेनोत्कृष्टत्वाच्च
देवयानलक्षणा गतिः शुक्ला भवति अप्रकाशदेवताधिष्ठितत्वात् धूमप्राचुर्यात् पुनः संसारहे
तुत्वेन निकृष्टत्वाच्च पितृयानलक्षणा गतिः कृष्णा भवति एवं शुक्लकृष्णे निर्मलमलिनस्वभावे एते
पूर्वोक्ते गती मार्गौ जगतो लोकस्याऽत्र गच्छद्भिर्ज्ञानकर्माधिकारिणा गृह्यंते न त्वन्ये केवलमात्मनाते
षां ज्ञानकर्मणोरनधिकारात् ततो ज्ञानकर्मस्वऽधिकारिणामेव मोक्षार्थं कर्मफलानुभवार्थं च कर्मणा
पितृलोको विद्यया देवलोक इत्यादिश्रुतिप्रसिद्धे एते पदव्यौ शाश्वते मते जीवानामनादित्वान्नित्यत्वा
दनंतत्वाच्च तेषां यावत्संसारस्तावत्पर्यंतं स्वर्गापिध्यै मोक्षसिद्ध्यै च द्वावप्येतौ मार्गौ नित्यावेव भवत इ
त्यर्थः एवं तयोर्नित्यत्वं प्रतिपाद्य द्वयोर्नियतं फलमाह एतयोर्द्वयोर्गत्योर्मध्ये एकया गत्या शुक्ल
या विद्वान् नावृत्तिं मुक्तिं याति न तु पुनरावर्तत इति श्रुतेः अन्यया गत्या कृष्णया अविद्वान् आवृत्तं पुनर्जन्मा
दिसंसारायाऽऽगच्छतीत्यर्थः प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययं तस्माल्लोकात्पुनरैत्यस्मै लोका
य कर्मणे इति श्रुतेः २६ शुक्लायाः गतेः फलं मोक्षः कृष्णायाः गतेः फलं बंध इति द्वयोर्गत्योः स्वरूपं
फलं च कारणं च विदितवतो विदुषः प्रमादोऽत्र न कर्तव्य इति सूचयितुमाह नैते सृती पार्थ जानन्यो
गी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन २७ एते निरुक्तलक्षणे तरायणसंसृति
के गती पदव्यौ जानन् श्रुतिस्मृतिप्रतिपत्तिमत्तया बंधमोक्षकारणत्वेन सम्यक् जानन् कश्चन कश्चिदपि योगी

राम०
१२

रा०द्वि० ॥२

यतिश्रुतिः सूर्यद्वारस्यादीनामुपलक्षणं ततश्च क्रमेणैव योगिनो ब्रह्म प्राप्नुवन्तीत्यर्थः ननु ब्रह्मविदः सद्यः
विशेषश्रवणाद्योगिनामपि क्रममुक्तिरेवेति चेन्न । न तस्य प्राणा उत्क्रामन्तीति ज्ञानिनामुत्क्रमणाभावश्र
वणात्तत्रैव समवनीयन्ते ब्रह्माप्येतीत्यन्तरालाभावश्च श्रूयते अत्र ब्रह्म समश्नुत इत्यादि श्रुतिविरोधप्रसंगाच्च नाशं
काकर्तव्या अत्रोत्तरायणे कालाभिमानित्वेनादित्यदेवतानामुपन्यासः दक्षिणायने रात्र्यादेर्भक्तानाम
प्युपासकानामर्चिरादिमार्गेणैव ब्रह्मप्रापकत्वनियमार्थं ब्रह्मगन्तॄणां तत्र ब्रह्मलोके विश्रमार्थं तत्र सुखा
नुभवार्थं च एवमन्यत्रापि द्रष्टव्यं २४ कर्मिणः स्वकृतकर्मफलमारोहणावरोहणादुःखं श्रुत्वा विवेकवैराग्य
प्रां ब्रह्मवेदन संपादनपराभवंत्विति बोधयितुं दक्षिणायनमृतानां फलमाह धूमो रात्रिस्तथा कृष्णः षण्मा
सा दक्षिणायनं तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५ धूमो धूमाभिमानिनी देवता रात्रिः रात्र्यभि
मानिनी देवता कृष्णः कृष्णपक्षाभिमानिनी देवता षण्मासाः षण्मासाभिमानिनी देवताः एवं दक्षिणायने
कालाभिमानिन्यो भवन्ति तत्र दक्षिणायने प्रयातो मृतो योगी कर्मयोगी चान्द्रमसं चन्द्रमसः प्राप्नं ज्योति
रिष्टापूर्तादिपुण्यकर्मसंभवं फलं प्राप्य अनुभूय तत्क्षयान्ते पुनरपवाणिनिति न्यायेन कर्मफलभोगसंक्षये
शेषकर्मानुभूयते निवर्तते नैव मार्गेणामानवं लोकं पुनरायाति पुनर्गच्छन्त्येवं यातायातदुःखमनेन महो
कष्टमविवेकिनामिति सूचितं भवति २५ ननु कदाचित्कर्मैवेतद्दुःखं विगर्हणामित्याशंकायामाह शुक्लकृष्णे
गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्तते पुनः २६ शुक्लकृष्णे ते न प्रका

लोकं प्राप्य तत्र य
द्रमसं ५

मेदनिर्गुणं ब्रह्मश्रवणावलंबनेनाविदित्वा स्वहृदयमत्तिष्यामजस्रं सम्यगुपास्य योगी सगुणब्रह्मोपासकः स्वयमा
दित्यब्रह्मभवनालेषु लोकेषु गमनकाले स्थानेस्थाने सम्यगः ऽऽआदिभिः पूज्यमानः सन् दिव्यं सुखमनुभू
ततोऽप्यतिशयेन साप्नोति नैतावन्मात्रमेव फलं ब्रह्मोपास्तेः किंतु स्थानं सर्वाधिष्ठानमाद्यं सर्वकार
णं परं ब्रह्मोपैति प्राप्नोति च मुक्तिं च गच्छतीत्यर्थः २८ इति श्रीमदानंदसरस्वतिशिष्यश्रीशंकरा
नंदसरस्वतिकृतौ गीतातात्पर्यबोधिन्यामष्टमोऽध्यायः २८ श्रीगणेशाय नमः मंदबुद्धेर्स्थि
तप्रज्ञस्य योगमार्गेण ब्रह्मप्राप्त्यर्थं चाध्यात्मादिभेदरहितमक्षरशब्दवाच्यं ब्रह्मोपास्यत्वेनोप
दिश्य तदुपासकस्य योगिनोऽर्चिरादिमार्गेण गमनं ब्रह्मप्राप्तिं चाष्टमे प्रतिपाद्येदानीमुत्तमस्या
मनेनैव मार्गेण मोक्षप्राप्तिर्नान्यथेति मा भून्माशंकां निवर्तयितुमधिकारिणां सुदृढबुद्धीनामि
हैव मोक्षप्राप्त्यर्थं च साक्षान्मोक्षकारणं परं ब्रह्मविषयं ज्ञानं विज्ञानं च ब्रह्मस्वरूपं च परम
ब्रह्मणः स्वस्य प्रकृतिकर्तृकेषु सद्यादिषु साक्षित्वाऽसंगत्वोदासीनत्वादिधर्मांश्चोपास
नाप्रकारभेदांश्च स्वस्य सार्वात्म्यं चान्यत्र प्रतिपादयितुं नवमाध्याय आरभ्यते तत्रादौ वक्ष्ये
प्रियमर्जुनं सद्यापादिष्टविज्ञानयास्वयमेव ज्ञानं विज्ञानं तन्माहात्म्यं च प्रतिपादयितुं श्रीभगवानु

106

१४

मोक्षेच्छया योगनिष्ठायां प्रवृत्तोऽहं सो वा परमहंसो वा मुमुक्षुर्न विमुह्यतीति विमोहो नाम मोक्षमार्गविरो
धिमार्गविस्मरणं प्रमादेनापि तद्बलं बन्धं न करोति कश्चिदपि योगनिष्ठापां प्रमत्तो न भवेदित्यर्थः य
स्मादेतद्योगतत्त्वो बंधमोक्षहेतुत्वेन प्रसिद्धं तस्मात्वं मुमुक्षुर्वत् सर्वेषु कालेषु आहारशयनादिष्वपि सर्वदा
योगयुक्तो भव ब्रह्मात्मानुसंधानमेव कुर्वन् कश्चिदपि बाह्यानुसंधानमित्यर्थः ॥ २७ ॥ एवमुत्तरायणद
क्षिणायने च योगिभिः क्रमेण गम्यं मार्गद्वयं तत्र गन्तॄणां च योगिनां च फलं सम्यक् प्रतिपाद्या
ऽधुना सगुणब्रह्मोपासकस्यार्चिरादिलोके प्राप्यसुखं ब्रह्मप्राप्तिं च विस्पष्टयति वेदेषु यज्ञेषु
तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं
॥ २८ ॥ वेदेषु ऋगादिषु सांगेषु सकलस्वरोष्वध्ययनविध्युक्तनियमेन सम्यगधीतेषु सत्सु य
ज्ञेष्वाधानादिष्वश्वमेधान्तेषु यागेषु साद्गुण्येन सांगोपांगं सम्यगनुष्ठितेषु तपःसु कृच्छ्रचान्द्रायणा
दिष्वैकात्म्येन सम्यगाचरितेषु दानेषु कन्यागवाश्वादिविषयेषु यथोक्तदेशकालपात्रादिसंपत्त्या
सम्यक्कृतेषु सत्सु तत्कर्तॄणां यत्पुण्यफलं पद्यद्वूर्ध्वलोकेषु भोक्तव्यं सुखं शास्त्रे प्रदिष्टं निर्दिष्टं त
त्सर्वमपि इदमक्षरं ब्रह्म परममित्यादिना निरूपितमध्यात्म[illegible]धिभूताधिदैवाधियज्ञादि

२८

107

तिव्रजतः स्यादतो वक्ष्ये धनेन निरुक्तलक्षणाविज्ञानसहितं ज्ञानं साक्षान्मोक्षकारणं तत एव ब्रह्मज्ञानं विशेषयति गुह्यतम
मिति कापसिध्याद्यष्टैश्वर्यसिद्धादियोगचर्यास्तापानि रहस्यानि मंत्रतंत्रौषधादीनि तेभ्यः सर्वेभ्यो गुह्येभ्य उत्कृष्टगु
ह्यतमं परमरहस्यमित्यर्थः ततएव यस्मै कस्मैचायोग्याय दुर्गुणिने न देयं किंतु शुद्धात्मन एवेति सूचयितुमाह अनसू
यव इति परगुणेषु दोषाविष्करणमसूया सैव कामक्रोधलोभमोहेर्ष्यादीनामुपलक्षणं असूयादिदुर्गुणाय स्यनसं
ति सोऽनसूयस्तस्मै अनसूयवे सकलगुणयुक्तशिष्याय ते तुभ्यमिदं ज्ञानं प्रवक्ष्यामि सम्यगुपदेक्ष्यामीत्यर्थः ननु इदं ज्ञा
नं प्राप्नुवतो मम किं स्यादित्यत आह यदिति तीव्रमोक्षेच्छावैराग्यशमदमाद्युत्तमसाधनसंपन्नः सन् त्वं यज्ज्ञा
नमुक्तविशेषणविशिष्टं यत् ज्ञानं ब्रह्मात्मैकत्वविषयं ज्ञात्वा सम्यगनेनाधिगतात्मस्वरूपः सन् अशुभादनाद्यविद्या
संभाविनः संसारदुःखरूपाद्वा हान्मोक्ष्यसे मुक्तो भूत्वाऽखंडानंदैकरसब्रह्मात्मना सुखस्यास्यसीत्यर्थः १ उक्तस्यैव
ज्ञानस्य जिज्ञासाहेतुं विद्यामाहात्म्यं प्रतिपादयति राजविद्या राजगुह्यं पवित्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं क
र्तुमव्ययं २ राजविद्या विद्याः ज्ञानानि सकलवेदशास्त्राध्ययनसमुत्पन्नानीहलोकपरलोकसाधनानि यानि ज्ञानानि
सर्वाण्यपि संसारबंधकान्येव भवंति न तु निवर्तकानि ब्रह्मविद्या तु सोम्य तिमात्रेण विदुषो ब्रह्मलोकगमपि त्वा सकार
णां संसारं निःशेषं निवर्तयति यथा प्रबोधः स्वाप्नं संसारं दुःखं चेतनया ततः सर्वासां विद्यानां राजा श्रेष्ठा भवत्यत उच्य
ते राजविद्येति यद्वा सर्वा विद्याः राजन्त्यः सम्यगहंकारं द्विपित्वा [illegible] स्वात्मनि रोहयंति इयं तु स्वात्मानं तत्त्वमसी
ति वाक्यश्रवणमात्रेण संजाताः सम्यग्ज्ञानात्मनि अहंकारं नाशयित्वा सर्वसंसारधर्मनिर्मुक्तमात्मानं राजयति प्रकाश
यतीति राजा सा च सा विद्या च राजविद्या राजगुह्यं च गुह्याः संवरणीयाः मंत्रयंत्रदिव्यौषधादयः पदार्थाः वाऽमूल्या
रत्नादयस्तेषां सर्वेषां राजाऽतिरहस्यत्वेन गोपनीयत्वात् राजगुह्यं राजवत्संवरणीयत्वाद्वा राजगुह्यं किंच पवित्रं पुनातीति
पवित्रं न ह्यपीदं ब्रह्मज्ञानमनुत्तमं पवित्रं सर्वाण्यपि नलानिलादयो देवा गोदयो वेदा गंगाद्याः सरितश्च पापक्षितान्यप्यशोधा

व

रामं०
१५

ह

वाच इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवे ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात्
१ परस्मस्यानुभावोस्मीति प्रकृष्टःसपरःपार्थइत्युपांत्याध्यायेनिरूपितनिर्विशेषब्रह्मणः
सन्निहितत्वात्तद्विषयत्वेनभक्तानुग्रहेच्छावेशात्तद्ध्यानरूपत्वेनचेदमितीदमात्मतत्त्व
ज्ञानंनिर्दिष्टं तुशब्दोब्रह्मज्ञानस्यप्रमनिपमादिक्लेशरहितत्वात्साक्षा न्मोक्षैकसा
धनत्वाच्च सगुणज्ञानाद्विशिष्टत्वद्योतनार्थः य तःसगुणज्ञानेज्ञातृज्ञेयादिभेदस
त्त्वंसंपाद्यान्यथायैवभवतिनतुनिर्गुणपर्यायेप ये ह्यन्यथातोविदुरन्यराजानस्तेक्षय्यलो
काभवंतीतिब्रह्मणास्तेषांचभेदंयःपश्यतामविद्वान्यपशुरेवंसधीनत्वंजन्मादिवंधंचप्रब्रवीति
श्रुतिः इदंतुब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतावरणात्ब्रह्मप्राप्तपएवभवत्यतःसगुणज्ञानादेवं
धकात्ब्रह्मज्ञानस्योत्कृष्टत्वं रक्षणएवमोक्षहेतोस्तत्कृष्टत्वात्स्यादित्यर्थः तुशब्देनो
क्तमुत्कृष्टत्वमेवविस्पष्टयति सविज्ञानंमिति विज्ञा॥नंनामाऽपरोक्षानुभवः प्रज्ञैवेदंस
र्वं अहंब्रह्मास्मीत्यादिश्रुत्युक्तरीत्यासर्वस्यात्मत्वरूपेणब्रह्ममात्रत्ववेदनंनतुपाताले संग्रहणादि

२९

108

सुखस्यमहत्वदर्शीनात्तत्वज्ञानस्यात्यंतिकीपा १

साधनत्वेपिफलतोमहत्वमस्तीत्याह अव्ययमिति फलतोनव्येतीत्यव्ययमव्ययफलं नह्यश्वैः प्राप्यतेहि अ
वंतादितिज्ञानमात्रस्यवस्तुनोश्ववत्वप्रवणात् ज्ञानस्याऽश्रमसाध्यत्वेप्यस्यैवनित्यफलजनकत्वमित्यर्थः
ज्ञानस्यमोक्षसाधनत्वेबाधकप्रमाणाभावाद्वाऽव्ययमित्युक्तं एवंज्ञानस्यानायाससाध्यत्वमव्ययफल स
जनकत्वंचप्रतिपाद्यनिःशेषसंसारदुःखध्वांतविध्वंसनकारणेज्ञानेरविवदनायाससुलभ्येविद्यमानेपि
धूर्त्वाश्वहृद्यामुक्तिमार्गमुत्सृज्यकामनयाकर्मोपास्यादौप्रवृत्तान्पुरुषान्दृष्ट्वाक्रोशन्निवदयापेद
माह अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ३ अस्योक्तगु
णविशेषणविशिष्टस्यधर्मस्याऽविद्यापाजननेनपरमपवाहेपात्यमानाःपुरुषाःश्रूयंतेऽनेनेतिधर्मोज्ञा
नंतस्यमोक्षैकहेतोर्ज्ञानस्यस्वरूपेतत्फलेमोक्षेच अश्रद्दधानाः अश्रद्धानामकृतिहेतुःफलाध्यवसान
पास्याविशेषःतच्छून्याद्दुर्विदग्धाःपुरुषाःकुकर्मरतामोक्षेमोक्षसाधनेज्ञानेच अश्रद्धाभक्तिश्रपन्न
रहिताःसंतोमामप्राप्यमामात्मानंद्वैतरसहस्तगतमोक्षाख्यंफलमुत्सृज्यमृत्युसंसारवर्त्मनिमृत्यु
युक्तःपिष्टःसंसारोमृत्युसंसारः नानायोनिषुनरकेचपुनःपुनःपतनलक्षणस्तदेववर्त्मतस्मिन्नेवंनिर्व
तेनितरांवर्तंतेभुक्त्वाभुक्त्वाजायंतेम्रियंतेअहोवतदौर्विदग्ध्यमपारदुःखकारणंएतेनेतिरूमहत्वविशिष्ट ए.म.०
स्यज्ञानेधर्मेप्रयत्नः अश्रद्धावंतोनिष्ठावंतश्चभवंतितएवमुक्ताभवंतीतिसूचितंभवति ३ एवंज्ञानस्यसर्वो १६
त्तमत्वंसुलभत्वंदुर्भगालभ्यत्वंचप्रतिपाद्यपूर्वंयदुक्तंपरस्यात्मानुभावोन्यइति यत्स्वात्मस्थानिभूतानिप्रेन

णि भजतां नरकदुःखकारणं पापमेव नापुण्यं तेन न चापि तात्कालिकमेव पापं न तु उत्पन्नं इदं ब्रह्मज्ञानं तु तदा विद्वा
त्पन्नपापमपि विधूयेति अवराणां शतकोटिब्रह्महत्याकल्पार्जितं यावत्पापराशिं बहुजन्ममरणदुःखप्रवाहकारणं
तूलपर्वतानग्निरिव ध्वांतपटलमर्क इव समूलं निर्दह्य ब्रह्मविदं निष्कर्माणं करोति अतो ब्रह्मज्ञानमेव ब्रह्मविष्णु
शिवादीनामर्कादीनां च यावत्कालं दुर्लभं तत्ममैव वितर्कं मुक्तिकरं वस्तुत इत्यर्थः ज्ञानस्यैतन्माहात्म्यं शास्त्रैकग
म्यं वा प्रमाणांतरगम्यं वा आद्ये अंतरंगमेवेत्याशंकायां सूर्यस्य तदा येन सह गाढं ध्वांतविध्वंसकत्वं न के
वलं शास्त्रैकगम्यं किंतु प्रत्यक्षावगम्यं च यथा तथा ज्ञानस्यापीत्याह प्रत्यक्षावगममिति अवगम्यतेऽनेनेत्यव
गमं प्रमाणं न तु प्रत्यक्षं वेदवेद्यं प्रत्यक्षमवगमं यस्य तत्प्रत्यक्षावगमं ज्ञानमाहात्म्यं विद्वत्प्रत्यक्षमित्यर्थः य
द्वा अवगम्यतेऽनुभूयत इत्यवगमः फलं प्रत्यक्षोऽवगमो यस्य तत्प्रत्यक्षावगमं भोजनादिसुखवत्सद्यः प्रत्य
क्षं ज्ञानफलं न तु धर्मादिफलवत्परोक्षमित्यर्थः धर्म्यं च मुमुक्षोः धर्मवदर्हतीति धर्म्यं सर्वेषामाश्रमिणां स्व
धर्मानुकूलमेव ज्ञानं न तु धर्मविरोधीत्यर्थः यद्वापि पराद्धर्माद्धर्म्य एव च पुनः सर्वतोमुख्यादिः अनुत्तमापि तत्स्वश्र
मसाध्यत्वमस्ति न तथा ज्ञानस्येत्याह सुसुखमिति सुतरां देहेन्द्रियादिश्रमं विनैव तत्त्वज्ञप्रसादाल्लादित्वा
नमिव ब्रह्मज्ञानमपि बुद्ध्यारूढं कर्तुं सुखं मनायासमेव शुद्धान्तःकरणानां सुसंपाद्यमित्यर्थः ननु करिष्ठं रूप
नवन्नज्ञानस्याल्पक्रियासाध्यत्वे फलेनाप्यल्पत्वमेव स्यात् क्रियाभूयस्त्वे फलभूयस्त्वं क्रियाल्पीयस्त्वे फले
स्याप्यल्पीयस्त्वं सर्वप्रसिद्धमित्याशंकायां नन्वल्पीयस्त्वापि चंद्रालोकनक्रियापापान्तदर्शिनस्तदाहन्तद

भूतानि चराणि स्थावराणि च सर्वाणि मत्स्थानि मय्यव्यक्तमूर्तौ तिष्ठंतीति मत्स्थानीत्युच्यंते यथा तोये तरंगबुद्बुदादयस्तोय
सत्तया सत्तावंतो भूत्वा तोये तिष्ठंति यथा नगरनिवासिनो दर्पसत्तया सत्तावंतो भूत्वा दर्पणे तिष्ठंति तथा सर्वाणि भूतानि
मत्सत्तया सत्तां प्राप्य मयि तिष्ठंतीत्यर्थः सदायतनाः सत्प्रतिष्ठा इति श्रुतेः एतेन सर्वभूताधारं यत्तद्ब्रह्मेति सोऽत्र
सुपदिष्टं भवति परस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातन इत्यत्राव्यक्तात्परमात्मा परत्वेनोत्कृष्टत्वं यदुक्तं स
र्वोत्कृष्टत्वमव्यक्तस्य तु निकृष्टत्वं तदेव पुनर्विस्पष्टयितुमव्यक्तस्य सकार्यस्य व्याप्यत्वेनाऽऽधेयत्वेन च निकृ
ष्टत्वं स्वस्य व्यापकत्वेनाधारत्वेन चोत्कृष्टत्वं च दर्शयित्वा इदानीमेवं व्याप्यव्यापकभावेनाधाराधेयभावेन च
भेदेऽङ्गीक्रियमाणे भेदस्य यथार्थत्वं भेददर्शिनां मुमुक्षूणां मोक्षाभावश्चाद्वैतश्रुतिविरोधश्च प्रसज्ये
त इति तं परिहर्तुं अथात आदेशो नेति नेति न सन्नासन्न सदसदित्यादिश्रुतिप्रसिद्धं सर्वद्वैतनिषेधं करो
ति ब्रह्मणोऽद्वितीयत्वसिद्ध्ये न चाहमित्यादिना च काऽवधारणार्थः तेष्वव्यक्तादिस्थूलांतेषु भूतेषु
ब्रह्मादिस्तंबांतेषु कूटस्थासंगचिद्रूपः परमात्माहमंतः प्रविश्यात्मरूपेण वा व्यापकत्वेन वा नैवावस्थितो
स्मि गृहे वा परिवबिले सर्प इव वाऽयःपिंडमग्निरिवाहं विकारीवत्तेषु भूतेषु प्रविश्य व्याप्य वा नैव तिष्ठामीत्य
र्थः विकारिणः खलु वाय्वग्न्यादेर्गृहाऽयःपिंडादौ प्रवेशो व्याप्तिश्चोपपद्यते न त्वविकारिणो निरवयव
स्याऽसंगस्याऽक्रियस्य सर्वपरिपूर्णस्योपपद्यते यथाऽऽकाशस्य तथा ननु घटाकाशस्याकाशस्य घटे
प्रविश्य स्थितिरुपपद्यते न हि भूतेषु तत्व्याप्यऽस्थितिर्वेत्यत्राकाशस्यापि घटांतः प्रवेशकल्पनाभ्रम एव निर

103

१२०

६

सर्वमिदं ततमिति तदिदानीं परस्य ब्रह्मणः स्वरूपं ज्ञानं विज्ञानं च प्रतिपादयति साहेन मया ततमिदं सर्वं जगदव्यक्तमूर्ति-
ना मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ४ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं ४ न केनापि प्र-
माणेन व्यज्यते बोध्यते इत्यव्यक्ताः प्रमेयाः मूर्तिः स्वरूपं यस्य सोऽव्यक्तमूर्तिः ननु न केनापि प्रमाणेन बोध्यत इ-
ति यदुक्तं तन्न तं त्वौपनिषदमिति श्रवणात् ब्रह्मणः श्रुतिबोध्यत्वमस्त्येवेति चेन्न श्रुतेरप्यऽगोचरत्वात् बो-
धकत्वानुपपत्ते श्रुतिः खल्वस्थूलमित्यादिना सर्वं दृश्यनिषेधं कृत्वा पत्निषेधाविषयं सर्वदृश्यविलक्ष-
णं तद्ब्रह्मेति बोधयति न तु साक्षादिदमिति ननु सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेति च श्रुतिः सत्यादिस्वरूपं ब्रह्मे-
ति बोधयत्येवेति चेन्न तस्याः श्रुतेर्ब्रह्मणस्त्वऽसदद्वैतलक्षणप्रतिपादनपरत्वात् जगतः सकारणस्यानृतजड-
दुःखात्मकस्य प्रत्यक्षत्वादर्थात्सिद्धं तद्वैलक्षण्यं ब्रह्मणः
तदेव श्रुत्याप्यसद्वैलक्षण्यमुपदेष्टुं सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेत्युक्तं न तु साक्षादिदमित्यपदिश्यते वाक्यत्वा-
च्छ्रोतस्त्वतेरविषयत्वात् ब्रह्मणस्ततः सिद्धं सर्वप्रमाणाऽव्यक्तत्वं तेनाव्यक्तमूर्तिना निर्विशेषेण मया ब्रह्मणा स-
र्वमिदं जगत्ततं व्याप्तं यथा रूपवद्द्रव्यजातं सर्वं सर्वत्र सूर्यालोकव्याप्तमेव सत् चक्षुषा ग्राह्यत्वमापद्यते न त्वऽव्याप्तं तद्व-
न्मया चिदेकस्वरूपेणावहिरंतः सर्वतो व्याप्तमेव सज्जगत्सर्वं सर्वकरणाव्यवहार्यत्वमापद्यते न त्वव्याप्तं स्वतोनि-
रात्मकत्वादप्रकाशत्वाच्च तस्य भासा सर्वमिदं विभातीति श्रुतेः ततः सर्वमिदं जगन्मया सर्वतो व्याप्य प्रकाशत इत्यर्थः
एतेन सर्वं जगत्प्रकाशकं परं ब्रह्मेति ज्ञानमुपदिष्टं भवति किंच सर्वभूतानि सर्वाण्यव्यक्तमहदादीनि स्थूलानि

३१

वा

110

रेब्रह्मणो निर्विशेषेऽस्तानि न संसेवऽस्तसद्भावेनन्हतपरिच्छिन्यापूर्णत्वाऽसंभवात् पूर्णमदः पूर्णमिदमिति श्रुत्याब्रह्मणः
पूर्णत्वमेवोच्यते नद्वैतहृत्याऽपूर्वमन परमनंतरमबाह्यमिति एकमेवाद्वितीयं ब्रह्मेति हि एक एव रुद्रो न द्वितीयोवतस्थ
इत्यादिश्रुतिशतैर्ब्रह्मणोऽद्वितीयत्वं निरूप्यते प्रतिपाद्यते यस्मान्मपि निष्कलं निष्क्रियं निःसंगं निरंतरं निराश्रयं निर्वि
शेषं पारदर्शी नेह नानास्ति किंचनेत्यादिश्रुतिप्रमाणकः प्रपंचाऽभावः प्रतिपादितस्तस्मात्त्वमेव पारमार्थिकमसाक्ष
त्वमेश्वरं ब्रह्म संयोगं युज्यते ज्ञानेन प्राप्यत इति योगं स्वरूपं सहृनं चिह्नं मानं दर्शनं अद्वितीयं परस्य इदमेवाहमिति स्वात्म
नापरस्य यत्सदिदं ब्रह्मैवाहमिति स्वं ब्रह्मैवमेव विद्धीत्यर्थः ननु नेति नेति सर्वदृश्यनिषेधे कृते तन्निषेधावधित्वेन जग
दभाव एवावशिष्यते तेन त्वं किमस्तीदं ब्रह्मैवाहमस्मीति विज्ञानमिति चेत् सत्यं प्रपंचाभावो न प्रतीयते तथापि निरूपिता प्र
तीयते दृश्यप्रपंचो येन भास्यमानोपदात्मना यत्र तिष्ठति तदभावोपि तेनैव भास्यमानस्तदात्मना तत्रैव तिष्ठति नान्यथा तं
तो जगत् तदभावयोः स्वरूपभूतं तत्तदवभासकं तदधिष्ठानं निर्विशेषं निर्विकल्पं यत् ब्रह्मेति सर्वमबुद्धिमर्पितिकुशलैरवबुध्यतां
तदिदं ब्रह्म स्वरूपं स्वापरोक्षं स्वेनैव वेद्यं स्वारोग्यवत् तत एव भगवानपि न त्वमस्थानि भूतानीति स्वस्मिन्नारोपितभूतजातं स
र्वं निषिध्य तदवधित्वेन स्वभावशेषयति यस्यमेयोगमैश्वरमिति सर्वदृश्यनिषेधावधिभूतं तदभावावभासकं स्वं परब्रह्म
सर्वे मुमुक्षवः पश्यन्त्वात्मानः स्वात्मना विजानंत्विति एतेन सर्वदृश्यनिषेधावधिलक्षणं सर्वाधिष्ठानं निर्विशेषं प्रज्ञानैकरसं
परात्परं ब्रह्म तदेवाहमिति वेदनमेव विज्ञानमिति सूचितं भवति ४ ननु सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति स
देवमतं निवासोऽसीति च ब्रह्मणः सर्वभूताधारत्वं श्रूयते स्मर्यते च कथं न च मत्स्थानि भूतानीत्युच्यत इति चेत् सत्यं श्रुत्यास

राम०

१८

ना२

वयवस्य चलनासंभवात् ननु तत्साक्षात् देवानुमेर्विशादित्यादिश्रुतिभिः ब्रह्मणोऽनन्तेष्वप्रवेश उच्यत इति
चेन्न मदादिरासविषयत्वान्न ब्रह्मविषयत्वोपपत्तेः निष्कलं निष्क्रियमिति श्रुतेः संगो न हि सज्जते आकाश
वत्सर्वगत इति श्रुतेः असंग इति च ब्रह्मणो निरवयवत्वनिष्क्रियत्वासंगत्वश्रवणात् प्रवेशक्रियावाव्या
पनक्रियावा संयोगो वाऽन्यो वा संभावयितुं न शक्यते तेन नन्तेष्वप्रविष्याहं नैव स्थित इति सिद्धं ननु क्रियासत्
र्वास्य न व्यस्य ब्रह्मणो भूतेष्ववस्थिति श्रोतिष्वमात्तु भूतानि तुत्वापितिष्टस्येवेत्याशंकायामाह न च म
त्स्थानीति मय्यव्यक्तमूर्तौ चिदेकरसे परिपूर्णे ब्रह्मणि भूतानि आकाशादिस्थूलान्तानि सकार्याणि स्थिता
नि च न भवंति भूतेषु च यथा नाहं तथा मयि च भूतानि न संतीत्यर्थः ननु सर्वभूतनिवासोऽसीति त्वमसर्वभूताऽ
श्रयत्वं स्मर्यते कथं न च मत्स्थानि भूतानीत्युच्यत इति चेत् भवानत्र प्रष्टव्यः निष्कले निराकारे निर्विशेषे प
रिपूर्णे ब्रह्मणि किं भूतानि संयोगसंबंधेन तिष्ठंति किं नु समवायसंबंधेन वा उत तादात्म्यसंबंधेन वा तिष्ठंति
आद्ये भूतानां ब्रह्मणश्च संयोगः सर्वतो वाऽनैकदेशेन वा नाद्यः परिच्छिन्नानामपरिच्छिन्नेन सर्वतः संयोगा
योगात् न द्वितीयः निरवयवस्य देशकल्पनाऽसंभवात् परमाणोर्द्व्यणुकवत् तिष्ठत्विति चेन्न निरवयवस्या
वयवत्वाः संयोगानुपपत्तेः नापि समवायः भूतानां ब्रह्मणश्चाऽयुतसिद्धत्वाऽभावात् समवायासिद्धेः
नापि तृतीयः जडाजडयोस्तादात्म्यासंभवात् न हि कः संबंध इति चेदध्यासः संबंध इति ब्रूमः ततो यत्र यदध्य
स्तं तत्र तन्नाममात्रमेव भवति न तु वस्तुतोऽस्ति शुक्तिकारजतादौ तद्दर्शनात् एवं ततो मयि परिपूर्णेप

तिखल्वाकाशादिभूतानितेषांमहतांसकार्याणांत्वव्यवस्थानैकमप्युपपद्यतेतस्यांशेकायां यदिवोऽस्यापार्नतरिक्षाज्य

३२

यानितिएतावानस्यमहिमाऽतोज्यायांश्चपूरुषः पादोऽस्यविश्वाभूतानित्रिपादस्यामृतंदिवीतिश्रवणात् बृहत्त्वेमपिच
रेब्रह्मणिचंद्रेनीलिमवदेकदेशएवाआकाशादीनिभूतानितिष्ठंतीतिसदृष्टांतमप्युपपादयति यथेत्यादिना सर्वत्रगत्वाकाश
मस्पृष्टश्चैवस्वयंसर्वत्रगच्छत्याविर्भावतिरोभावंचभजन्सर्वत्रश्लेष्यत इतिसर्वत्रगोमहान्महत्परिमाणवान्वायुराकाशेभूतानि
शेनित्यंसदायथास्थितोभवतितथासर्वाणिभूतानिमहदादिस्थलांतानिमत्स्थानिमयिपरिच्छिन्नानिचैवनिराकारेनिरं
तरेब्रह्मणीतितिष्ठंतीतिमत्स्थानीत्येवोपधारयावधारयेत्यर्थः एवंसर्वेषामपिभूतानामाकाशेवायुवत्स्वस्मिन्नेवस्थिति
मुक्त्वास्वस्मिन्नेवलयमप्युक्तवानित्याह [illegible] सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकां कल्पादौविसृजा
म्यहं ७ अव्यक्ताद्व्यक्तयइतिसूत्रस्वेमुक्तंभूतानांप्रलयादिकंतत्तुदैनंदिनं इदानींप्राकृतंलयाद्युच्यतेयानि
मत्स्थानितान्येवसर्वाणिभूतान्याकाशादीनिकल्पक्षयेकल्पोब्रह्मकल्पस्तत्क्षयेसतिब्रह्मप्रलयेप्राप्तेसतिमा
मिकांमदीयामपराख्यांप्रकृतिंत्रिगुणात्मिकांमायां मायांतुप्रकृतिंविद्यादितिश्रुतिप्रसिद्धांयांतिस्वोत्पत्तिस्थानके
मेणप्रकृतौप्रलीयंतइत्यर्थःप्रकृतौयानिलयंगतान्येवभूतानिकल्पादौब्रह्मकल्पादौपुनरप्यहंविसृजामिस्वप्र
कृतिद्वारायथाक्रमंपयालक्षणंचजगदुत्पादयामीत्यर्थः ७ सएकोवर्णोबहुधाशक्तियोगात्वर्णाननेकान्निहिता
र्थोदधाति विचैतिचांतेविश्वमादौसदेवःसनोबुद्ध्याशुभयासंयुनक्त्वितिश्रवणात् स्वंप्रकृतस्याःसंगच्छितयोपिपरमा
त्मास्वोपाधिवशेभूतस्थ्यादिकंस्वधर्मत्वेननिर्दिशतिस्वयमेवजगदुत्पत्तिस्थितिलयकर्तासर्वविन्मोक्षप्रदातावरेणमाराध्य

कल्पक्षये पुनस्तानि

राम०

३२

१८

111

त्या चोच्यते मम सर्वभूतात्मत्वं तथापि न तत्पारमार्थिकं किंतु मायाविलसितमात्रमित्युच्यते लोकदृष्टान्तमनुसृत्य व्यंगी
कृपत एवेत्याशयेनाह सार्धेन भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो
महान् तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ६ अर्जुनः स्वयमयमेव साक्षात्परमेश्वर इति मयीश्वरत्वबुद्धि
मतो दहमात्मेत्यज्ञो मद्देह एव परमात्मत्वबुद्धिं कुर्यादिति श्रीभगवानात्मशब्दार्थं स्वदेहादिभ्यो भिन्नत्वेन नि
र्दिशति ममात्मेति अयमात्मा सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वयानंदः परः प्रत्यगेकर
स इत्यादिश्रुत्युक्तो ममास्ये [illegible] श्वरत्वाभिमानिनश्चात्माऽव्यक्तमूर्तिः भूतग्लपरो भूतभावनः भूतान्याका
शादीनि पृथिव्यन्तानि सकार्याणि सर्वाणि भावयति स्वसत्तया स्वप्रकाशेन सत्तावंति प्रकाशवंति च करोतीति
भूतभावनः सन्नपि भूतभृत् स्वस्मिन्नारोपितानि भूतानि स्वसत्तया स्वमात्राणि बिभर्ति दधातीति भूतभृदेव भवति
चकारस्त्वर्थः ननु भूतस्थः भूतेष्वात्मरूपेणाभिमानतया न तिष्ठतीति न भूतस्थ इत्युच्यते त्वात्मनो भूत
स्थत्वे विशेषणनाशाद्विशिष्टस्यापि नाश इति न्यायेन भूतनाशात्स्वस्यापि नाशकथाप्रसंगात् तद्दी
पकर्तृत्वभोक्तृत्वादिधर्मानुषंगश्च स्यादत उच्यते न च भूतस्थ इति न त्वात्मनो भूतस्थत्वाभावे तैः परिच्छि
न्नः स्यादिति चेन्न नभसि नीलिमवन्मृगपि कल्पितत्वात्तेषां स्वतः सत्ताभावान्न परिच्छेदकत्वानुपपत्तेः प
हाश्रिषिष्ठानव्यतिरेकेण भूतानां पृथक् सत्त्वाभावात् स्वमात्रेषु तेषु न पुनः स्यात्प्रमित्युच्यते न च भू
तस्थ इति तेन सिद्धं भूतान्येव न पृथगपि मरौ जलमिव व्योम्नि नैल्यमिव सति इति ननु भूतेष्वहमिति ननु मदं

३२

नः स्थितं मां तानि कर्माणि न स्पृशंतीत्यर्थः एतेनोपाधिनः कर्मतत्कर्मसु समं तत्साक्षित्वेन स्थितमाकाशवदसंगमविक्रियमा
त्मानं यो विजानाति स सर्वविद्यातिः सकर्मभिरप्याधिकनैर्विहितप्रतिषिद्धैर्न निबध्यत इति सूचितं भवति ९ प्रकृतं स्वस्य प्र
कृतिकर्तृत्वे सर्वकर्मस्वसंगत्वमुदासीनत्वं च तदेव विस्पष्टयति मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौं
तेय जगद्विपरिवर्तते १० राजवद्भृत्यसन्निधिमात्रेण प्रधानादिप्रवृत्तिः सोऽध्यक्षस्तेनाध्यक्षेण साक्षिणा कूटस्था
संगचिद्रूपेण मया स्वप्रवृत्तिहेतुनोपहिता सती प्रकृतिरेव सचराचरं चरं जंगमम् अचरं स्थावरं चरं च अचरं च
राचरं तेन सह वर्तत इति सचराचरं जगत्सर्वं सूयते जनयति स्थापयति संहरते च अनेन हेतुनानेनाध्यक्षत्वेन साक्षिमात्रे
नेन साक्षिणो मम सान्निध्यमात्रेणैव हेतुना स्वप्रवृत्तिकारणेनाव्यक्तादिस्थूलांतं समष्टिव्यष्ट्यात्मकं जगत्स
र्वं परिवर्तते सर्वतः सर्वप्रकारैः वर्तते यथा सर्वसाक्षिणः सूर्यस्य सान्निध्यमात्रेण जनस्य कोशबलेन सर्वेषां प्राणिनां प्रवृ
त्तिनिवृत्ती प्रसिध्यतस्तथा सर्वसाक्षिणो मम सान्निध्यमात्रेण मत्प्रकाशबलेन देहेन्द्रियप्राणमनोबुद्ध्या
दीनां स्वस्वविषये प्रवृत्तिर्निवृत्तिश्चेष्टानिष्टसुखादिज्ञानं च सिध्यति एतावन्मात्रमेव मम कार्यं न तु कर्तृत्वं कारयितृत्वं
भोक्तृत्वं भोजयितृत्वं दातृत्वं दापयितृत्वं वास्ति कूटस्थासंगचिन्मात्रत्वादिति भावः १० एवं सर्वप्रकाशकं सर्वद्रष्टारं सर्वसा
क्षिणं मामात्मानं पापिष्ठतमाः पशुकल्पा अवमन्यंत इत्याह अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भावमजा
नंतो मम भूतमहेश्वरं ११ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः सा
क्षी चेता केवलो निर्गुणश्च श्रुतेरयमर्थः जगतो ब्रह्मादिभेदेन प्राप्तमीश्वरानेकत्वं [illegible] निरस्य एक एव हि

मू॰ टि॰

112

राम॰
३२

वपेक्षतायोः स्याम इति मुमुक्षवः सगुणं स्वस्वरूपासक्ता मिति सूचयितुं केचन [illegible] न्तरं निरस्यापि
तुं वा प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ मायाख्यां स्वां स्वो
पाधिभूतां प्रकृतिं सुहृत्सत्त्वात्मिकामवष्टभ्योपाधाय अहं परमेश्वरः प्रकृतेर्वशात् अविद्यास्मिताभिनिवेशरागा
द्वेषात्मिकायाः प्रकृतेः स्वभावादवशमस्वतंत्रमनादिसंसारवासनाग्रस्तमिमं परिदृश्यमानं देवतिर्यगादिलक्षणं भू
तग्रामं प्राणिजातं सर्वं संहृत्य संहृत्य पुनः पुनर्विसृजामि तदीयकर्मानुरूपेण नानायोनिषूत्पादयामीत्यर्थः एते
नु प्राणिनां कर्मनिमित्तमात्रमहमेव स्रष्टा भर्ता संहर्ता नेशा च न मत्तोऽन्यः कश्चिदस्तीति सूचितं भवति तथा च श्रु
तिः एष सर्वेश्वर एष भूताना[illegible]मिति ८ नन्वेवं भूतग्रामं नानायोनिषु जनयतः पुनः पुनः संहरतः स्वर्गनरकं च
गमयतस्तवापि पुण्यपापकर्मसंश्लेषः स्यादित्याशंकायां न भूतानां संहारः सृष्टिः सुखदुःखादिफलप्रापणं
च सर्वं प्रकृतेरेव कर्म नात्मनो मम माऽविक्रियस्यासंगस्याव्यक्तमूर्तेः तत्कर्मलेशसंबंधो वस्तुतः किंचिदस्तीति प्रकृति
कर्तृकेषु सृष्ट्यादिषु स्वस्यासंगोदासीनत्वमेव प्रतिपादयति न च मां तानि कर्माणि निबध्नन्ति धनंजय उदासी
नवदासीनमसक्तं तेषु कर्मसु ९ चकारस्त्वर्थः तानि भूतसृष्टिसंहारादीनि कर्माणि प्रकृतिकर्तृकाणि
मां तु परमात्मानमसंगमविक्रियं तटस्थं न निबध्नन्ति ममबंधापनमवंति मां न स्पृशंतीत्यर्थः स्वस्य तटस्थत्वमे
व प्रतिपादयति उदासीनवदिति तेषु प्रकृतिकर्तृकेषु सृष्ट्यादिकर्मस्वऽसक्तं सक्तिर्नाम संयोगसंबंधस्तद्रहित
मसंगमतएवोदासीनवत् उदासीनः तूष्णीमवस्थाता तटस्थः तद्वदुदासीनं प्रकृतितत्कार्याणां साक्षित्वेन दूर

तस्मिन्नु सर्वे मितिवाऽधिवासः रज्जौ रजतवत् दर्पणोदरवत् तस्मिन् कल्पितानां भूतानां परमात्माधिवासोऽधिष्ठानमेव भवति
ननु स्वयं तदधिकरणमित्यर्थः नैकेवलं कर्मणामेव ज्ञाताऽयं भवत्यात्मा किं तु भूतानां तद्धर्माणां तत्कर्मणां तत्फलानां तु भूती
नां तदवस्थानां च द्रष्टेत्याह साक्षीति बुद्धितद्विकाराणां सर्वेषां साक्षीत्यर्थः साक्षादीक्षितरि तिसाक्षात्मात्मनेईक्षणक्रिया
कर्तृत्वे प्राप्ते ऽप्याह चेतेति तत्वमविक्रियत्वं स्वयमन्येनासर्वं पश्यतीत्यर्थः अविक्रियत्वे हेतुमाह केवल इति केवलः निरव
यवः निरवयवत्वादविक्रियः स्वयमविक्रियः सन्नेव सर्वं पश्यतीत्यर्थः शब्दगुणकमाकाशमिति निरवयवस्याप्याकाश
स्य यथा गुणवत्त्वं तथा ब्रह्मणो निरवयवस्यापि सत्वचित्त्वादिगुणमस्त्वित्याशंक्य परिहरति श्रुतिर्निर्गुण इति आत्मन
आकाश इति आकाशस्य जनि श्रवणात् जन्यजनिमत्वेन सावयवत्वादाकाशस्य गुणवत्त्वं युक्तं निष्कलमिति ब्रह्मणो
निरवयवत्वश्रवणात् गुणवत्त्वमनुपपन्नमेव ततः सत्वचित्त्वादि स्वरूपमेव भवति ननु गुणा इत्यर्थः परस्य ब्रह्मणः
सर्वविशेषाभावप्रतिपादनार्थं च एवं श्रुतिनिरूपितलक्षणं भूतमहेश्वरं स्वसन्निधिमात्रेण प्रकृतिप्राकृतं च सर्व
मीष्टे चेष्टयतीतीश्वरः स्वयमविक्रियोप्यऽयस्कांत इव सर्वस्य प्रवृत्तिहेतुः महतो महीयानिति श्रवणात् महत्तम
त्वान्महान् महांश्चासावीश्वरश्च महेश्वरः भूतानामब्जजादिस्थूलान्तानां महेश्वरो भूतमहेश्वरः तं भूतमहेश्वरं सर्वस्य
चेष्टाकारणं सर्वमहत्तमं परं नित्यत्वकूटस्थत्वासंगत्वसत्वचित्त्वानंतत्वसर्वव्यापित्वसर्वज्ञत्वसर्वप्रकाशकत्वादिधर्मैः
सर्वदृश्यविलक्षणं मम परस्य ब्रह्मण आकाशकल्पं सच्चिदानंदैकरसं भावं स्वरूपमहं शरणार्थं भजानंतः शास्त्राचार्येभ्यः
किंचिदप्यविदन्तवंतो मूढाः पशुकल्पाः मानुषा ननु मितिसर्वप्राणिशरीरस्थानस्योपलक्षणं ... साक्षित्वं स्वदेहेषु

रुद्रो न द्वितीयो वतस्थ इति श्रुत्यन्तरप्रसिद्धेः एतेनास्य परमेश्वरस्य प्राकृतमनित्यं चाभासितं नेति सामान्येन एकत्वं कार
णत्वं चाव्याकृतपर्यवसितं निरस्यति देव इति कालत्रयेऽपीतरेणानपेक्षयाऽस्वतश्चिदात्मना स्वयमेव दीप्यते प्रकाशत इ
ति देवः अव्याकृतस्य जडत्वेन देवत्वाऽसंभवात् स्वतः कारणत्वानुपपत्ते एकत्वदेवत्वसंपत्त्यास्य स्वप्राप्तमीश्वरत्वं
निरस्यति सर्वभूतेषु गूढ इति सर्वभूतेषु चिदेकरसात्मना स्थित इत्यर्थः एतेनास्यैकत्वेऽपि चिदात्मना भूतेष्ववस्थितत्वाऽ
भावादीश्वरत्वाऽभावः सर्वभूतेषु सर्वदैकरूपेणाचिन्त्यकाशात्मना स्थितत्वे ब्रह्मणः प्राप्तं सर्ववेद्यत्वं निरस्यति गूढ इति
सर्वभूतेषु प्रकाशात्मना विद्यमानत्वेऽपि मेघैः सूर्यवदविद्यातत्कार्यैस्तिरोहितत्वात् परमात्मा न सर्वेषां वेद्यो भवती
त्यर्थः भूतेषु गूढत्वे सति ब्रह्मणः प्राप्तं कुड्यादिवत्परिच्छिन्नत्वं निरस्यति सर्वव्यापीति घटादिकं मृद्वदन्तरा
बहिरन्तश्च सर्वतः स्वसत्तया व्याप्नोतीति सर्वव्यापी बहिरन्तः पूर्णत्वात् ब्रह्मणः परिच्छिन्नत्वाऽभाव इति भावः
गगनात्मना सर्वव्यापकत्वमाकाशपर्यवसितं निरस्यति सर्वभूतान्तरात्मेति सर्वेषां भूतानामन्तर्बुद्धिगुहायामा
त्मरूपेणास्ति इतीत्यर्थः सर्वव्यापकत्वेऽप्याकाशस्य जडत्वेन सर्वभूतात्मत्वाऽसंभवात् ब्रह्मत्वं न संभवति
सर्वभूतात्मत्वे ब्रह्मणः कर्मकर्तृत्वं तत्फलभोक्तृत्वं संसारित्वं च प्राप्तं निरस्यति कर्माध्यक्ष इति उपाधिसंधि
ष्ठायतद्धर्मी नीलत इत्यध्यक्षः भूतानां नानाकर्मणां तत्फलभोगानां च साक्ष्येव भवत्यात्मा निरवयवत्वान्निष्क्रि
यत्वाच्च स्वयं कर्म किंचिन्न करोति नापि च भुंक्त इत्यर्थः ब्रह्मणः सर्वभूतान्तरात्मत्वे भूताश्रयत्वं तदधीनत्वं च प्रा
प्तं निरस्यति सर्वभूताधिवास इति वसत्यस्मिन्सर्वमिति वासः अधिकृतमवासो वासश्चेत्यधिवासः अधिवस

दे वत्वे

माह्रीर्दीनमित्यादिसद्ध्र्मस्मृत्योक्तौ येहिंसादंभदर्पादिदुष्टगुणैकप्रधानां राक्षसीं योनिं चाप्यासुरीं दंभदर्प[illegible]यालब्धमित्यादिनो
क्तलक्षणां वंतश्चासुराणां तेषां स्वभावं प्रकृतिमासुरीं च मोहिनीं मुष्पर्णोऽयरिपुः कृत्वा तिरोपसंपादिनोमेव प्रकृतिं योनिं श्रिताः आ
श्राभवंतीभयोऽप्यपःप्रनष्टेनरस्यर्थः यद्वा येत्वात्ममोक्षणोपपन्नमकृत्वा राक्षसीं वाऽसुरीं वा मोहिनीमेव प्रकृतिं प्रतिश्रिताभ
वंति ते जन्मनि मोघाशा मोघ[illegible]कर्माणो मोघज्ञाना विचेतस एव भवंतीत्यर्थः तत्कारएव एवमासुरसंपज्जिमतामविदु
षां गतिं प्रतिपा[illegible]द्याधुना दैवसंपज्जिमतां विदुषां स्थितिं प्रतिपादयितुं तत्रोत्तममध्यमाद्यधिकारिभेदेन ब्रह्मोपास्तेरपि
भेदमाह त्रिभिः तत्र दैवसंपन्नमुमुक्षुजनमानाह महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञा
त्वा भूतादिमव्ययं १३ तु शब्दो ब्रह्मविदां म[illegible] वैपरीत्यद्योतनार्थः महात्मानः बहुजन्माराधितपरमेश्वरप्रसादात्
प्राप्तसम्यक्त्वर्हृदितकषायत्वेन विषयेग्रहवैमुख्यं प्राप्य सर्वदा भगवच्छ्रवणशीलत्वान्महानुत्कृष्ट आत्मा चित्तं येषां
ते महात्मानः प्रसन्नचित्ताः केचिद्यतयो ब्रह्मविदः स्वपं दैवीं देवस्य परमात्मनः मामेतरंतरंगसाधनत्वात् दैवीं तां प्रकृ
तिं संपत्तिं तीव्रमोक्षेच्छावैराग्यशमदमतितिक्षोपरत्यादिसत्वगुणयोऽकस्य लक्षणामाश्रिताः संतो मां भूतादिमव्य
यं च ज्ञात्वा भूतादिर्भूतानामादिर्विभूतिकारणं भूतादिरित्युक्तिः तदनन्यत्वमितिन्यायात् कार्यस्य कारणमात्रत्वे
न भूतानां पृथक्सत्त्वरूपाभावात् ब्रह्मणोऽद्वितीयत्वज्ञापनार्था कटकुल्यादेः कार्यनाशेन कारणस्याविनाशदर्शनात्
तद्वत् भूतनाशात् ब्रह्मणोऽपि नाशप्रसक्तौ तां वारयत्यव्ययमिति ज्ञानेन वाऽज्ञानेन वा कारणनाशेन वा कार्यनाशे
न वा स्वतो वाऽन्यतो वा येन केनापि न व्येतीत्यव्ययं नित्यं सर्वात्मकमद्वितीयमखंडानंद[illegible]

हृदिगुहायांसर्वप्रकाशकतयासर्वसाक्षित्वेनविद्यमानंमांप्रत्यक्त्वेनात्मानमवजानंति [illegible] नंअहमर्थेस
त्मन्यानंदैकरसेमलमांसास्थिपिंडेदेहमारोप्यतद्धर्मानूकर्तृत्वभोक्तृत्वादीन्जरारोगादींश्चाध्यस्याऽवमन्यंते कर्ताहं
बालोहंस्थूलोहंयापिष्ठोहंबधिरोंधःकाणःखंजःपंगुःजीर्णोहंहतोहंमृतोहमित्येवंसर्वदाममवैपरीत्यमेवसंपादयंतीत्यर्थः
११ अस्यसूर्यानामनेल्लोकाइत्यादिश्रुत्यर्थंप्रकाशयन्नपितुमात्मज्ञानविमुखानामात्मनःसर्वदाविपरीतभावमेवसंपादयतां
मूढानांस्वभावंवर्णयित्वातेषामात्मज्ञानवैमुख्यस्यफलंस्फुटमेवप्रतिपादयति मोघाशामोघकर्माणोमोघज्ञाना
विचेतसः राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः १२ येतुमूढाःमन्तत्त्वमविज्ञायात्मानंमामवजानंतितेमोघाशाः
मोघावितथाआशाकामनायेषांतेमोघाशाः अस्मच्छरीरेहिचातुर्मास्ययाजिनःसुकृतंभवतीतिप्ररोचनंतयास्वर्गेश
तकोटिकल्पंवस्यामइतिचातुर्मास्यैकृतवन्तोकामिनामाशायाः प्रोभावात्मर्त्यस्यपदंनकेतदितिन्यायेनस्वल्पकालिकत्वा
त्तेषांवितथाशात्वंउक्तमेव किंचमोघकर्माणःमोघानिनिष्फलानिअग्निहोत्रादीनिकर्माणियेषांतेमोघकर्माणः
वक्ष्यमसंधारिणानांश्रौतादिउपासकर्मणांक्षणिकंतुतुच्छंजिह्वोपस्थसुखैकप्रयोजनत्वात्मोघकर्मत्वंउक्तं किंच मोघ
ज्ञानाःमोघमनर्थसाधकंमस्तकंज्ञानंसकलवेदशास्त्राध्ययनजन्यंयेषांतेमोघज्ञानाः ब्रह्मचारिवासोऽश्चत्वारिंशत्
वर्षाणीतिस्मरणात्बहुकालिकलेसकेबेदशास्त्राध्ययनमदर्थविचारजनितंज्ञानंस्वर्गेबुधायैवज्ञानंत्वनुमोसायातोउक्तं
मोघज्ञानत्वं यतोमोघज्ञानाअतएवविचेतसोविपरीतबुद्धयःसर्वदादेहमात्रात्मदर्शिनोमूढाराक्षसीं अग्निहोत्रत्रिवेदा
द्वराक्षसानांगृहेगृहे इयामन्यंचशौचंवराक्षसानांनविद्यतेइत्येवंलक्षणाराक्षसास्तेषांसंबंधिनींदयासत्वंशौचंस

३६

115

पृथक्त्वेन बहुधा विश्वतोमुखं १५ ज्ञानयज्ञेन ज्ञानं ब्रह्मात्मैकत्वविषयं तदेव ब्रह्मोपास्तेः साधनत्वात् यज्ञ इत्युच्यते इज्यतेऽनेनेति
यज्ञो ज्ञानमेव यज्ञो ज्ञानयज्ञस्तेन ज्ञानयज्ञेन चाप्यऽन्ये केचिदऽपक्रांतरात्मानो यजंतो ब्रह्मैवाहमहमेव ब्रह्मेति स्वं ब्रह्मत्वेन भाव
यंतः संतो मां प्रत्यगभिन्नं परं ब्रह्मोपासते विपरीतभावनाविच्छित्त्यै नित्यमनुसंदधते अपि शब्दः केचन कर्मिणाः कर्मयज्ञे
नोपासत इति सूचनार्थः ननु ज्ञानयज्ञेन कथं तेनोपास्तिर्भेदेनाभेदेना वा कर्त्रोपास्यापेक्षायां स्पष्टं ज्ञापयति अथवा
त्मा ब्रह्मेति अहं ब्रह्मास्मीत्यादिश्रुत्यर्थं ब्रह्मविदाऽचार्यमुखतः सरहस्यं सम्यगवगाह्य तमेवार्थं श्रुत्युक्तविधिभेदैः स्वा
त्मना सम्यगनुभूय भूयो भेदभ्रमनालंबनत्वात् देकत्वमेव सदा भावयितुं ये तु यज्ञास्ते रेकत्वेनोपासितुमशक्ते भेदेनेति
बोधयितुमाह एकत्वेन पृथक्त्वेनेति ज्ञानयज्ञेन येत्पासनं कुर्वंति मुख्याधिकारिणः परमहंसा यतयस्ते एकत्वेना
ऽभेदेन ब्रह्मैवाहमिति स्वाभिन्नं मामुपासते ये तु मध्यमाधिकारिणो हंसकुटीचकादयस्ते तु पृथक्त्वेन भेदेन विश्वतो
मुखं सर्वात्मकं मां बहुधाऽनेकप्रकारमादित्यो ब्रह्मेति मनो ब्रह्मेति ॐमित्येतेनैवाक्षरेणेत्यादिश्रुत्युक्तरीत्या बहु
धा भेदेनोपासते तत्राप्यऽनधिकारिणः केचन तु सर्वो वैदिकाः सोमेन यक्ष्य इत्यादिना कर्मयज्ञेन मामिंद्रादिरूप
मुपासते तत्रापि केचन शिवविष्णुब्रह्मादित्यादिरूपं मां तत्तैरावैदिकैनोपासते १५ ननु यजनद्रव्यमितिन रूप
मनामपं दिव्यो ह्यमूर्तः पुरुष इति परस्य ब्रह्मणो नामरूपाद्यभाव एव श्रूयते कथं नामरूपादिमन्त्वस्य नत्वद्रूपेषि
द्रादिषु शिवादिषु च ब्रह्मत्वबुद्ध्योपास्तिरूपयज्ञत इत्याकांक्षायां इंद्रो मायाभिः पुरुरूप ईयते मायां तु प्रकृतिं विद्या
न्मायिनं तु महेश्वरं तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् एकं सद्विप्रा बहुधा वदंति इंद्रं मित्रं वरुणमग्निमाहुरि

राम०
३६

वर्णादिभिः स्वात्मना सम्यग्विज्ञाय अनन्यमनसः अनन्यं मनो नाम बुद्धिवृत्तिः न विद्यते ऽन्य[illegible]तिरिक्तो ऽर्थो येषां ते
नुपेक्षा ते ऽनन्यमनसः वस्त्वंतरदर्शनरहिताः संतो मां भजंति सर्वमिदमहं च ब्रह्मैवेत्य ऽप्रतिबद्धं दृष्ट्वा सदा सर्वं ब्र
ह्मैव पश्यंतीत्यर्थः तत एव महात्मान इति विशेषणमर्थवत् १३ एवमुत्तमानामुपास्तिप्रकारमुक्त्वा ऽथ मध्यमानामु
पास्तिप्रकारमाह सततं कीर्तयंतो मां यतंतश्च दृढव्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते १४ केचन मुमुक्ष यु
वः स्वात्मतत्त्वजिज्ञासया तीव्रमोक्षेच्छावैराग्याभ्यां च सह साधनं कर्माखिलं संन्यस्य दृढव्रताः स्वजीवनादावप्य
पेक्षाराहित्येन ब्रह्मचर्याऽहिंसाद्युत्तमधर्मेण बहिरंतरिंद्रियनिग्रहेण च दृढं विच्छित्तिरहितं ज्ञानसंपादनपरत्वल
क्षणं व्रतं नियमो येषां ते दृढव्रताः भक्त्या सततं सर्वदा आसुप्तेरामृतेः कालं नयेद्वेदांतचिंतयेति स्मरणात् अज
स्रं मामेव प्रत्यक्स्वरूपमात्मानमुद्दिश्य मत्साक्षात्कारसिद्ध्यर्थं सद्गुरुसन्निधौ वेदांतान् कीर्तयंतः पठंतस्तदर्थमु
पपत्तिभिर्विचारयंतो ज्ञानं यथा सिध्येत्तथा यतंतो यत्नं कुर्वंतः नेह देहमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्र
पद्य इति श्रवणाच्छ्रद्धया भक्त्या च ज्ञानदातारमीश्वरं मां नमस्यंतः प्रार्थयंतश्च एवं नित्ययुक्ता निरंतरं नियमोपेताः मु
मुक्षवो मामुपासते यद्वा नित्यो मोक्षस्तत्सिद्धये युक्ता नियताः मामुपासते सततं कीर्तयंतो मामित्यनेन नामकी
र्तनं विवक्षितमिति मन्दबुद्धिभिर्न मंतव्यं उपक्रमविरोधात् प्रकरणविरोधाद्विशेषणविरोधाच्च तदर्थं न सिध्य
ति १४ एवमात्मतत्त्वजिज्ञासूनां यतीनां मुमुक्षूणां वेदांतश्रवणलक्षणामुपास्तिमुक्त्वा श्रवणमननाभ्यां सम्यग्विज्ञा
ततत्त्वानां यतीनां निदिध्यासादिलक्षणामात्मोपासनं दर्शयति ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते एकत्वेन

९७

मं०९

116

प्राप्यत इति गतिः कर्मफलं स्वर्गादिरहमेव भर्त्ता धर्त्ता जगतः कर्मादिरहमेव प्रभुर्नियन्ताहमेव प्राणिकृतकर्मणां साक्षी
आदित्यचन्द्रानलोऽनिलश्चेत्युक्तः सूर्यादिरहमेव सर्वप्राणिभूतानि यस्मिन्निवसन्ति स निवासोऽप्यत एवाश्रयोऽहमेव आर्त्ता
नां शरणमार्त्तिहन्ताऽहमेव सुहृत्प्रत्युपकारनिरपेक्ष एव प्राणिनामुपकर्त्ता चन्द्रः पर्जन्यो वायुः सोऽहमेव प्रभवः प्रभवत्यस्मात्सर्वमिति
प्रभवः सर्वजगत्सृष्टिकारणं यः सोऽहमेव सर्वस्य प्रलयो लयो यस्मात्स प्रलयः सर्वजगत्संहर्त्ता यः सोऽहमेव स्थानमिति
गमिनेति जंतं नाशादशायन्त्रं सर्वेषः स्थाप्यन्ति यस्मिन्स्थानं स्थितिकारणमहमेव निधीयते सर्वमस्मिन्निति निधानं का
र्यकारणप्रपंचाधिष्ठानमहमेव ज्ञानेन विनाऽन्येन न व्येतीति न नश्यतीत्यव्ययं नाशरहितं जगद्बीजमव्याकृतमव्यम
व्ययमहमेव १८ किंच तपाम्यहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९ आदित्य
रूपोऽहं वसंतग्रीष्मयोस्तपामि जगतः संतापं करोमि जगत्सर्वं तापयामीत्यर्थः कार्त्तिकाद्यष्टौ मासान्वर्षं निगृ
ह्णामि वर्षासु चतुरो मासान्वर्षमुत्सृजामि चकारादतिवृष्ट्यनावृष्टिभ्यां भूमिं संदुर्भिक्षं च करोमि न म्रियन्ते येन देवतास्त
दमृतमहमेव म्रियन्ते प्राणिनो येन स मृत्युरहमेव यदिदमस्तीति नामरूपेण च निर्दिश्यते तत्स्थूलं नामरूपात्मकं
कार्यं सदित्युच्यते तत्स्थूलस्य कारणमव्यक्तं नामरूपकारणमसदित्युच्यते तदुभयं सच्चासच्चाऽहमेव चकारस्तयोरुभयोः स
दसतोः अज्ञाऽव्यक्तयोर्निषेधकृते तन्निषेधावधित्वेन स्थितं कार्यकारणभावविकलं निर्विशेषं निर्विशेषं यत्परं वस्तु तद
हमिति सूचनार्थः एतेन कर्त्तुपदादेः सदसदन्तस्यैव वस्तुनः सर्वस्य ब्रह्मस्वरूपत्वात्सुमुक्षुभिर्ब्रह्मध्यायद्ध्येय त
या तेन तदात्मना रूपात्स्वस्य ब्रह्मत्वान्मुमुक्षोश्चित्तशुद्धिर्ज्ञानमोक्षसिद्धिश्च भवतीति सूचितं तस्य ब्रह्मणो ब्र

एम०

२७

२८

त्वादिश्रुतिभिः परस्य ब्रह्मणो ममैव मायया सविशेषत्वं सार्वात्म्यं च प्रतिपाद्यते [illegible]न्द्रादयः पित्रादयः क्रतु
यज्ञमंत्रादयश्च जगच्च सर्वमप्यहमेवेति तस्य विश्वतोमुखत्वं प्रतिपादयति चतुर्भिः अहं क्रतुरहं यज्ञः स्वधाह
महमौषधं मंत्रोहमहमेवाज्यमहमग्निरहं हुतं १६ यः क्रतुराधानाद्यश्वमेधान्तो यागः श्रुत्युक्तः सोहमेवाहि
तीयपादेरेवकारः सर्वत्रान्वेति यज्ञश्चौपासनादीशानबल्यन्तः स्मार्तोऽहमेव क्रतुयज्ञयोरंगिनो ब्रह्मत्वे
तदंगानां देवतायजमानादीनां ब्रह्मत्वमेववोद्धव्यं स्वधाशब्देन पितृभ्यो यत्क्रियते पार्वणश्राद्धादि तत्त
था स्वाहितमहमेव यत्प्राणिभिः भुज्यते व्रीहियवादि औषधीभ्यः समुत्पन्नमन्नं तदौषधमहमेव भोज्यस्य ब्रह्मत्वे
भोक्त्रादीनां ब्रह्मत्वमेव सिद्धं येन देवेभ्यः पितृभ्यश्च स्वाहा स्वधा तेन हविर्दीयते स मंत्रोऽहमेव आज्यं चरुपुरो
डाशाद्यहमेव अग्निरप्यहमेव हुतं हवनक्रियाप्यहमेव १६ पिताऽहमस्य जगतो माता धाता पितामहः वे
द्यं पवित्रमोंकार ऋक्साम यजुरेव च १७ मायाशबलं ब्रह्म ब्रह्मणोऽव्यक्तं अव्यक्तान्महत् महतोऽहंकारः
अहंकारात्पंचतन्मात्राणि तेभ्यश्च भूतानि अस्याकाशादिप्रपंचस्य पिता जनको भर्त्तादिरहमेव माताऽव्यक्त
मपरा प्रकृतिरहमेव पितामहोऽक्षरसंज्ञिको मायोपाधिरीश्वरोऽहमेव धाता पोषकोऽहं यद्वेद्यं शब्दस्प
र्शरूपादिलक्षणं वस्तु तत्सर्वमहमेव अन्यद्यत्पवित्रं शोधकं सत्याग्निवायादि तत्सर्वमहमेव ओंकारः
परावरयोर्ब्रह्मणोर्वाचकः सोहमेव ऋक्सामयजुरिति वेदत्रयं तथेतिहासपुराणादिकमहमेव १७ गति
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८ गतिर्गम्यते कर्मणा

२९

तिनिर्गतानि वऊ विधानि यामानि येषां ते ह्न यायाः संतो यज्ञैरग्निष्टोमादिभिः अनुक्षिः अष्टौ वसव एकादश रुद्रा
द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेत्यष्टत्रिंशद्देवतास्वरूपेमां परमेश्वरमिष्ट्वा सम्यगाराध्य स्वर्गतिं स्वर्गप्राप्तिं प्रार्थ
यंते स्वर्गे लोके न भयं किंचनास्ति स्वर्गलोको अमृतत्वं भजंत इति स्वर्गफलं श्रुत्वा स्वर्गो मे भूयादिति स्वर्गसुखमे
वकामयंते ते स्वर्गकामाः पुण्यमग्निष्टोमादि पुण्यफलमेव फलं सुरेंद्रलोकं स्वर्गस्थानमासाद्य प्राप्य दिवि स्वर्गे दिव्या
न् स्वर्गीयान् देवभोगान् देवानां ये भोगाः यच्छरीरं यद्योग्यं यत्सुखं तादृशानेव भोगान् सुखविशेषान् देवैः श
पिता न्वादेवभोगान श्रोति अनुभुंजते यावत्स्वपातमुषितेति न्यायेन यावत्पुण्यफलानुभवति निशेषपत्ता
वत्पर्यंतं स्वर्गभोगाननुभवंतीत्यर्थः २० किंच ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते २१ ते सोमपाः स्वर्गकामिनः स्वर्गं गताः संतः वि
शालं स्वपुण्यापेक्षया विस्तीर्णं बहुलं स्वर्गीयं सुखविशेषं भुक्त्वा अनुभूय पश्चात्तत्सुखभोगकारणे स्वपुण्ये
क्षीणे सति मर्त्यलोकं विशंति तं देहं त्यक्त्वा पुनरत्र जायंत इत्यर्थः एवं त्रयीधर्मं त्रयो वेदास्त्रयी कर्मकांड
स्तेनोक्तो धर्मस्त्रयीधर्मः त्रिकर्मकं जरति जन्म मृत्यु दक्षिणावंतो अमृतत्वं भजंत इत्याद्यर्थवाद एवं केवे
दे स्मृतं धर्मं कर्मैवानुप्रपन्नाः श्रुतस्मृत्युक्तकर्मैव निःश्रेयसाभ्युदयसिद्ध्योपरमकारणं न शमो न च दमो नापि च सं
न्यासो नैव ज्ञानं नैवेश्वरश्चेति निश्चयमनुसृत्य केवलकर्मैकनिष्ठाः कामकामाः काम्यंत इति कामाः भोग

117

गम० २९

नुष्ठा क्रियमाणोपास्तिः कथं फलाय भवति कथं वा दृश्यं ब्रह्म भविष्यतीति चेद्बाढं न ब्रह्म दृश्यं दृश्यं नाम यत्किंचित्
ऽस्ति वा न वेति नहि लोपः सर्वव्यवहारलोपप्रसंगात् अथोच्येत दृश्यं वस्तु सद्रूपेणाऽस्ति वा किमसद्रूपेणेति नहि लोपः प्र
मा विषयाणां कल्पस्याऽसतो वस्तुनोऽस्तीति निर्देष्टुमयोगात् नहि सद्रूपेणेति चेत्तथात्वे सर्वं ब्रह्मैव ब्रह्मातिरिक्तस्य
सत्त्वाभावात् ननु सर्वस्य ब्रह्मत्वे घटपटादेर्नाशे सति ब्रह्मणोऽपि नाशप्रसंगादिति चेन्न नाशस्य भ्रमकल्पितस्याप्यांश
घ विषयत्वात् यथा दंडादिना कल्पितकंबुग्रीवाद्याकारस्य नाशो घटस्यैव व्याप्यांशस्य नाशो दृश्यते न तु मृदो व्यापकांशस्य
तथा भ्रमकल्पितनामरूपादेरेव व्याप्यांशस्य नाशो न तु व्यापकांशस्य सतः तत्रापि दृश्याभावभानाभा
वप्रसंगात् ततो दृश्यं च दृश्याभावश्च सदात्मनैवेति अतः सर्वं ब्रह्मैवेति सिद्धं तेनैव वस्तुनि ब्रह्मबुध्याकृतोपास्तिः
फलायैव भवति भावनानुरूपत्वात्फलसिद्धेः १९ एवं मुमुक्षूणां मंदबुद्धीनामुपास्तिसिध्यै कृत्वाध्यासं सदंतं
सर्वमहमेवेति सर्वस्य स्वमात्रत्वं प्रतिपाद्य राजविद्येत्यत्र ब्रह्मविद्यातिरिक्तानां विद्यानां सकलवेदशास्त्राध्य
यनजनितानामपदुत्वं संसारबंधकत्वमेव न देवास्त्र दृष्टान्तः पुरुषा इत्यत्र निरूप्याधुनापि मुमुक्षूणां विवेकसि
ध्यै पुनः प्रतिपादयति द्वाभ्यां त्रैविद्याः मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ते पुण्यमासाद्य सुरेंद्रलो
कमश्नंति दिव्यान्दिवि देवभोगान् २० ऋग्यजुः सामरूपाः तिस्रः एवता विद्याः त्रिविद्यास्ता येऽधीयते ते त्रैविद्याः ऋ
ग्यजुः सामाध्ययनवंतस्तदर्थज्ञानवंतोपि ये कामिनः स्वपंतो सोमपाः सोमं पिबंतीति सोमपाः तत एव पूतपापाः पूता

नन्वहं क्रतुरित्यादिना क्रतुयज्ञमंत्रदेवतादिकं सर्वमहमेवेति नैव सार्वात्म्यं त्वयैव स्वस्य प्रतिपादितं तामनामाश्रपि इंद्रादि
देवतारूपं त्वामेव क्रतुभिरुपासते ते त्वदज्ञानां तेषां कथं मुख्यफलभ्रंशो जन्माद्यनर्थपातश्चेति चेदुच्यते सर्वं ह्येतद्ब्रह्म सर्वं ख
ल्विदं ब्रह्म इंद्रं मित्रं एकं सद्विप्रा बहुधा वदंतीत्यादिश्रुतिभिः भूतानि विष्णुरित्यादिस्मृतिभिः सर्वं ब्रह्मैवेति प्रतिपाद्यते अहं क्र
तुरिति अहमेव सर्वात्मत्वं मयाप्युक्तं सर्वदेवात्मक एवाहं मत्तोन्येपि मामेव क्रतुभिरुपासते तेन यथापि श्रुतौ स्मृतौ मद्भक्तौ च विवी
समकृत्वा अविद्याऽस्मितादिदोषेण सर्वं ब्रह्मैवेति मामज्ञात्वा स्वेष्टदेवेषु मंत्रादिषु भेदबुद्धिमंतश्चाज्ञाः मामुपासते ते न तत्त्वेन मद्भ
क्ता न भवंति किंतु देवयज एव भवंति नैव तेषां मुख्यफलभ्रंशोऽनर्थपातश्चेति सिंहावलोकनन्यायेन तत्स्वं श्लोकाद्येन
नुस्तत्प्रतिपादयति त्रिभिः येप्यन्यदेवता भक्ता यजंते श्रद्धयान्विताः तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं २३
येप्यैहिकामुष्मिकफलार्थिनो ब्राह्मणादयः स्वेष्टदेवतासु तदाराधनेषु च श्रद्धया एषैव परदेवतात्वेन स्याराधनेना
हं कृतार्थः स्यामित्यास्तिक्यबुध्द्याऽन्विताः समेताः संतः स्वयमन्यः देवतारूपं मम एतस्या आराधकोऽहमिति स्वभिन्नत्वे
नेगृहीताया इंद्रादिदेवतायास्त एव भक्तास्तदाराधने भक्तियुक्ता भूत्वा यजंते वैदिकेनैव तंत्रेणोपासत इत्यर्थः ते यी
द्रादिदेवता याजकाः यद्यपि मामेवेंद्रादिदेवतारूपं यजंते ब्राह्मणाः सर्वात्मकत्वादिंद्रादिदेवतारूपेणाहमेव तैराराध्य
नेतथापि ते मामविधिपूर्वकं यजंतेति न विद्यते विधिर्विधेयार्थज्ञानं च यत्र तदविधिअज्ञानं तत्पूर्वकं यजंतीत्यहं क्रतुरित्य
न्नप्रकारेण इज्यो याजको यजनं यागश्च सर्वं ब्रह्मैवेत्येवं ज्ञानाभावान्मामभूत्वा मां यजंत इत्यर्थः २३ ननु तुष्टा स्त

३९ ते ई 118 पा४ राम० २६ २६ नारायणः

दिव्यान्स्वविषयास्तानेव कामयंत इति कामकामा[illegible] विषयभोगलंपटा मीमांसकापेक्षिता अप्येवमुक्तप्रका
रेण गतागतं गतं चागतं च गतागतं गमनागमनमेव चतुर्परतं कर्मफलं लभंते न तु आगत्य जायंते जाताः उ
न मृत्वा स्वर्गं गच्छंत्येवं जननमरणप्रवाहे कामिनो मज्जंतीत्यर्थः २१ एवमनीश्वरवादिनां कर्मिणां परा
नां वार्धस्तानुक्त्वा कामिनो गतिं प्रतिपाद्याधुना निर्दुष्टानां नित्यसत्वस्थानां नियोगक्षेमाणामात्मवतां
निष्कामानां निरहंकारममकाराणां मदेकशरणानां ब्रह्मविदां योगक्षेममहमेव वहामीत्याह अ
नन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं २२ अनन्याः न वि
द्यते ऽन्यो मत्तोऽतिरिक्तो विषयत्वेऽहंबुद्धेरिदंबुद्धेश्च येषां ते अनन्याः सदा ऽहं तद्दर्शननिष्ठाः संतो येच
तयो मां निर्विशेषं नित्यानंदैकरसं परंब्रह्मैव चिंतयंतो बहिरंतश्चैक एवान्यो विषयोऽनवगाहित्वा सर्वमि
दमहं च ब्रह्मैवेति भावयंतः पर्युपासते स्वचं[illegible] सर्वदा ब्रह्मैव पश्यंतीत्यर्थः नित्याभियुक्तानां नित्यो निरं
तरोऽविच्छिन्नोऽभियोगः आभिमुख्येन बुद्धिवृत्तेर्वस्तुसंयोगः साक्षात्कारलक्षणः तद्युक्तो येते नित्या
भियुक्ता निरंतरसमाहितचित्तास्तेषां नित्याभियुक्तानां तेषां ब्रह्मविदां योगक्षेमं अप्राप्तस्याऽप्रेप्सित
स्य वस्तुनः प्रापणं योगः स्थितस्य परिपालनं क्षेमस्तदुभयमहमेव वहामि यद्वा तेषां नित्याभियुक्तानां योग
क्षेमं योगो निरंतरब्रह्मनिष्ठा तस्य क्षेमम् आध्यात्मिकाद्युपद्रवैर्विक्षेपराहित्यं तदहं स्वयं [illegible]मीत्यर्थः २२

सर्वं

साध्ये। जपहोमोपवासव्रतोत्रयात्रादिभिरतिदुष्करैः आद्दनियमैर्बहुर्यज्ञपैकप्रधानैर्देहात्पासाध्येऽत्रैकातु
पत्रदानादिभिर्लोकेऽनुनैः स्वनियमाविष्टोबेर्बहुश्रमम्लै रेभ्यः संपत्स्यतेन दस्सकालिकं स्वपि स्वसमनियोगि
कं पुनरावृत्तिकं स्वभवति यदितानामपि नित्रैवकामः संकल्पः प्रयत्नः प्रवृत्तिश्च इष्यते ननुज्ञानेज्ञानशक्ते स्व
त्यग्रमेनिस्यफले स्महेतो येवपाल्मेच्छारिमापौणमोहिनीनिवपमस्यामहे।।२५।। नत्वधिकारिणां महात्म
ध्यानिग्रह्य मच्चित्तः मयि वृद्धितः हृदि मत्वा सर्वं सिद्धिदेकरसेमन्यप्रकृपे ब्रह्मणि चित्तं यस्य समच्चित्तः बहिर्गंधुवृत्तं तमपि सम्य
क् स्थापयित्वेत्यर्थः मच्चित्ते तत्र सत्र्यास्मच्छब्दार्थस्य चित्तस्थापनादि करतां स्य ब्रह्मणः स्थापयितुं ब्रह्मेद्याने उदरंम
तरंकुर्वतो अथतत्स्य भर्पमवतीति प्रवणाद्वैतदर्शिनो मुक्तिर्न संभवतीति ततो ध्याता ब्रह्मैवाहमिति स्वब्रह्माभिन्नभावपेदि
ति बोधयितुमाह मत्परइति अहमेव परः परमात्मेति मत्परः ब्रह्मैवाहमिति स्वस्य ब्रह्मभाव ग्राहकभावेन तत्परं युक्तः सत्रात्मे
नस्वं ब्रह्मैव भावयन्नासनेनत्र्ध्यासुपविशेदित्यर्थः १४ योगमात्मविशुद्धये इति उक्तेनाद्योगानुष्ठानस्य फलमात्मवि
शुद्धिरात्मविशुद्धिस्तु फलमप्रतिबद्ध ज्ञानसिद्धिद्वारा ब्रह्मनिर्वाणमेवेति मत्वाच पितृयोगिनो ब्रह्मविदो जीवत एव यु
क्तिफलमाह युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ योगी योगनि

०तं०
११

148

हृद्दण्नाऽभ्यस्तु योगिनः उक्तलक्षणलक्षितो स्वभावबोधो यस्य तस्य योगिनो ब्रह्मनिष्ठस्य आहारविहारनिद्रादीना
मतिरेकत्वे रजस्तमोवृद्धिस्तया समाधेर्ज्ञानस्य च विच्छित्तिः स्तनस्तात्परिमितत्वाभिव्रतत्वं एवं लक्षणस्य यतेर्योगः
समाधिर्दुःखहा दुःखान्याध्यात्मिकादीनि जन्मादीनि वा सर्वाणि स्वानुष्ठानसमुत्थज्ञानप्रतिबन्धबोधेन हंतीति दुः
खहा भवनिर्विदे हेतुर्निःसंपादयतीत्यर्थः १७ यद्यपि यदा हि नेन्द्रियार्थेष्विति कूटस्थो विजितेन्द्रिय इति च यो
गिनो योगारूढत्वं संप्रपञ्चितं तथापि ब्रह्मविदं लक्षणयोगरीतो तेनुसु सुस्मित दोराध नंतदा त्रयेरोचक्रत्वान्नि
नं तु निश्चमानुष्ठानतः इति तदेव न पुनर्विस्मरयति यदा विनियतं चित्तमात्मन्येवावतिष्ठते निःस्पृहः सर्वकामे
भ्यो युक्त इत्युच्यते तदा १८ निरुक्तबहिरंगान्तरंगसाधनसंपत्त्यानीत्रमो सेच्छावैराग्याभ्यां च निःस्पृयो गमभ्य
स्यतो योगिनो यतेर्यदा यस्मिन्काले विनियतं विषयसंबंधोपधानस्यान्ये या निरंतराभ्यासबलेनैकाग्रमधिगमि
तं चित्तमात्मनि स्मितानंदैकरसे मनसग्रभिन्ने प्रत्यग्रूपे वा अवतिष्ठते सर्ववासनाक्षयात् सर्वकामविद्ध स्थावेस्वयं
सद्घासनावासितं सत्स्वेदा सरूपराज्ञि अष्ठतिप्रयत्नेनापि न बाह्यं प्रबलबलेनेत्यर्थः तदेव विस्पष्टयति निःस्पृ
ह इति काम्यंत इति कामाः शब्दादयस्तेभ्योपलादपलाद्वा ऐहिकपारलौकिकेभ्यः सर्वेभ्योऽपि दोषदर्शनान्निःस्पृहस्तृ १६०
ष्णाशून्यो भवति तेन्तु मिध्यानं तु ध्यारिद्रिपाशिमनुष्वनेभवतं यतितदा युक्तो योगारूढ इत्युच्यते युक्तैरिति शेषः यो
गमारूढ्यतिष्ठतो यते श्चित्तकं यतिष्ठतीत्याकाक्षायां तच्चित्तस्थितेरुपमानमाह तदनुष्ठितयोगस्यासंप्रज्ञा
तसमाधिनं सूचयितुं यथा दीपो निवातस्थो नेंगते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९

यन्निरोधो हा पक्ष्यमवति न हि निःसृत धातुवैषम्यं संयाद्य पुरुषं न हन्ति न पीडयति च यथा यत्नः स्वोदरपरिमाणादतिरिक्तं पद
मेभुज्यते तर्हि नास्ति मलादिकमुत्पाद्य पुरुषं हन्ति धर्मं च नाशयति यत्के नीचैः पत्के नीचोऽत्यल्पमेव भुज्यते ते
न तु पुरुषमवति सुस्थितं स्थैर्यं मनि नीहाय च क्षमं न भवति ततः परिमितमेव भोक्तव्यमिति सिद्धं इममेवार्थं श्री भगवान्निया
ह अत्यश्नतः स्वोदरपरिमाणमतिक्रम्य जरयितुमशक्यमन्नमश्नतो वहाऽशिनो योगिनो ध्याने योगो नास्ति योगनिष्ठ
नं सिध्यति अनश्नतोऽपरिमितेः अत्वरांमनेनं ब्रह्मचर्यं चेन सिध्यति एकांतेनियमेनानश्नतोऽत्यल्पमश्नतश्च यते
योगो नास्त्येव अत्वरां मननं चापि न सिध्यति किंतु स्वोदरपरिमितमनेदोहदिके रेचान्नमश्नतश्चयोगः अवरा
मननं ब्रह्मचर्यं च दिवास्वापादिदोषरहितस्यापि सिध्यतीत्यर्थः अथवा स्वरूपेदः मनेनाहं तन्नो यमुदके न तु वो
योः संचोरणार्थाय चतुर्थमवशेषयेदित्यादि शास्त्रपरिमाणमतीत्याश्नतोऽनश्नतश्च योगो न सिध्यति यथा न चाति
स्वप्नशीलस्यात्यन्तं निद्रालोरति जाग्रतश्च योगो न सिध्यतीत्यर्थः १६ तर्हि कीदृशस्य योगः सिध्यतीत्याह यु
क्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा १७ युक्ताहारविहारस्य यु
क्तः परिपदं स्वेनाह्निमिति नगच्छतः परंगच्छन्ने ग्रामे नगरे वसेदित्यादि शास्त्रनियमेन युक्तो आहारोऽन्नं विहा
रो विश्रांत्ये संचारो यस्य तस्य परिमिताहारविहारस्य युक्तचेष्टस्य कर्मसु अन्नादानविसर्गादिक्रियासु युक्ता
यावता कार्यसिद्धिस्तावत्परिमिता न तु विश्रंखला चेष्टा देहेंद्रियव्यापारो यस्य तस्य युक्तस्वप्नावबोधस्य
योनिद्राऽवबोधो जागरस्तावेतौ युक्तौ परिमितौ जागर्याद्यस्य स्वप्नो निद्रायुदशनाडिकाः पश्चाज्जागरणात

गी० टी०
१२

स्य तु साक्षादपरोक्षीकुर्वन्नु पश्यन्नात्मानं दशिमुक्तः कृतार्थोस्मीति मोदते समोदते मोदनीयं हि तल्लब्धेति कृतेः आत्म
नि तुष्यति योगारोहणक्रमेण तत्वतो महात्मन आत्मसंसारमोक्षणं तेन स्वरूपं वेग्रन्थसंयमनस्तनैः श्रवणादिना विज्ञा
तात्मतत्वस्य यते योगारोहणे नैवात्मोद्धरणं सिध्यति न दवरूपं कर्त्तव्यमित्यनेन सूचितं भवति २० किंच सुखमा
त्यंतिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः २१ यत्र यस्यां सुखं केवलं शुद्धं सत्वभा
वापत्तिदशायामयं योगनिष्ठो ब्रह्मविद्युतिः बुद्धिग्राह्यं स्वहृतैकगम्यमतएवातीन्द्रियं इंद्रियाविषयमिंद्रियावि
षयसंबंधरहितमजन्यमित्यर्थः नतरंवात्यंतिकमंतमतिक्रम्य वर्तमानमात्यंतिकमाद्यंतमंत्नमत एव एषोस्य पर
मानंदरूपोहिमसिद्धं यत्तत्सुखं वेत्ति सदानंदोहमस्मीति आत्मानंदमनुभवतीत्यर्थः यत्रायं योगी स्वयं चिदेकर
सात्मस्वस्वरूपे सच्चिदानंदैकरसब्रह्मणि तदात्मना स्थितः सन् तत्वतः परमार्थोस्वरूपान्नैव चलति प्राणबाधाद्यंत
रविक्षेपेऽपि शास्त्रेऽविच्छिन्नं किंविदप्यपरीतभावं भजतीत्यर्थः २१ किंच यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्
स्थितो न दुःखेन गुरुणापि विचाल्यते २२ आत्मसाक्षात्कारएवयं मो लाभस्तंलब्ध्वा साधारणकारणं योगसि
द्धिरपि परमलाभस्वेनिमित्तायमिति कार्यकारणयोरभेदेन निर्देशः सदानंदैकरसस्यात्मनउपलब्धेः परमकार
णं यं निर्विकल्पसमाधिं लब्ध्वा यं आत्मलाभं वा लब्ध्वा योगारूढो यतिः कंचिदात्मानमपरमनात्मविषयकं लाभं
ततः सर्वस्य ब्रह्ममात्रेत्वोपलंभकनिर्विकल्पकसमाधेस्तत्फलादात्मलाभादधिकमुत्कृष्टं न मन्यते आत्मव्यतिरि
क्तस्य सर्वस्यापि पदार्थस्य मायिकत्वेनासत्वात्तुच्छत्वात्तोपद्रवत्वाद्दुःखत्वात्तद्बीजत्वाच्च ध्यातानांचधर्मादेर्लाभं संतो न ला

149

२५

आत्मन इति कर्मणि षष्ठी आत्मन आत्मानं विषयीकृत्य प्रवर्तितं योगं यद्वा आत्मनः सर्वोपलब्धिसिद्धिसाधनं
योगं समाधिं युंजतः सादरं निरंतरं समनुतिष्ठतो योगिनो यतेः परमहंसस्य यतचित्तस्य यतं ब्रह्मण्येव प्रत्या
कारेण निश्चलतया सदा स्थापितं चित्तं येन तस्य यतचित्तस्य ब्रह्मरूपस्य रीत्यन्तमनसः सैवोपमा उपमीय
ते अनेनेत्युपमा स्मृता दृष्टांतः निवाते स्थाने स्थितः दीपो यथा नेंगते न चलति तथा ब्रह्मणि स्थापितं ब्रह्म
विच्चित्तं न चलति ब्रह्मरूपं च ब्रह्मात्मना निश्चलीभवति तत्स्वरूपमेवास्य जातः समाधिः तदुक्तं मनसो वृत्तिशू
न्यस्य निर्विकारात्मना स्थितिः असंप्रज्ञातनामासौ समाधिर्योगिनां प्रिय इति १९ एवं लक्षणसंपन्नोप
श्चितपरिपाकविशेषः स एव योगो ज्ञानस्य हेतुरिति वक्तुं तत्स्वरूपमाह त्रिभिः यत्रोपरमते चित्तं निरुद्धं योगसे
वया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २० बहिरंगान्तरंगसाधनसिद्धान्तो क्रमो यच्छया च विजृम्भितया
योगसेवया योगोपयोगांगं सविकल्पसमाधिविजातीयप्रत्ययोदयरहितेन केवलचित्तप्रत्ययमात्रोदयलक्षण
स्य सेवया निरंतरावृत्त्या निरुद्धं विपरीतवृत्तिर्यथा न स्यात्तथा चिरकालं ब्रह्मत्यप्रत्ययावृत्तावेव स्थापितं चित्तं यतेः
शेषविनष्टसर्वबाह्यवासनापटलं सत् यत्र यस्मिन्दशायां स्वस्य केवलमुद्बुद्धसत्त्वाशयमात्रावशेषरूपायां मायोपाधि
त्मा तु परमते उपरमं गच्छति वृत्तिनिरोधपरिणाममनुविधत्ते ... त्वा ध्यायात्मने वनिवातस्थ प्रदीपवल्लिङ्गं प्रतिष्ठ
तीत्यर्थः किंच यत्र यस्यां चित्तपरिपाकविशेषदशायामयं ब्रह्मविदुत्तम आत्मनि निर्मलांतःकरणे व्योम्नि र
काचे द्रविव बन्मका मामानं द्रष्टा ... चिदानंदैकरसमात्मानं परं ब्रह्मात्मनात्मना ब्रह्मैवाहमस्मीति स्वस्वरूपत्वेन पश्य

गी०अ० ६ वे 150

स्य साधनमयमुक्तलक्षणो योगः नैवात्मा समुत्पिपते एतद्यात्मसंसिद्धं विहस्य न सचेतेति निश्चयेन विनदा निर्वेदेनाप्यनि
र्विरणा चेतसा नाना साग्रदर्शनक्लिद्यनि ऐश्वर्यसाम्येन कापस्थापनं मनोनिग्रह श्लोकेशाप भवतिनाहं वक्तुं शक्नोमीति स
माधिकरणोपदलसतंतेनदोषेण उक्तं विजेनिर्विरणानीत्रमोक्षेषु यातदेहितमनिर्विरणांतेनानिर्विरणान चेत
सामुमुक्षोपेतैः सउक्तलक्षणोयोगः समाधियोक्तव्यः प्रयोक्तव्यो विदेहमुक्तेः सम्यक्कृतेऽयमित्यर्थः २३ समाधेः कर्त
व्यप्रकारमेवाह संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं विनियम्य समंततः २४ यदार्थेषु
समीचीनत्वकल्पनेनेसंकल्पस्तस्मात्प्रभवंतीति संकल्पप्रभवास्तान् कामान् विषयाभिलाषान् सर्वान् सर्वपदार्थवि
षयानशेषतः सबीजास्त्यक्त्वा परित्यज्य पिते लेलेपरूपेणापान्शेषास्तिष्ठति यथा तथा कामेषु त्यक्ते ष्वपि विषयेषु रंजनारूपे
णाकामशेषो यथानस्यात्तथा सर्वत्र कामत्यागः कर्तव्यः सतिकाम लेशेन दाक्षेप्मनः समाधौ नतिष्ठत्यतः सर्वत्र दे
हजीवनादावपि निरपेक्षो भवेद्योगीत्यर्थः योगसिद्धेरंतरंगं बलवत्साधनमुक्त्वा साधनांतरमाह मनसेति स
माधौ कृते सम्यक्ज्ञानं तेनैव मनसोनात्मस्थितस्यैवं निश्चयवता कामसंकल्पयोर्दोषदर्शिनैव मनसा इंद्रियग्राममेव सु
एदीनां वागादीनां च संघातं समंततः सर्वतो नियम्य तेषां महतिं निगृह्येत्यर्थः इंद्रियेभ्येन सः संयोगात्करणमेवे
द्रियनियमनमिति मनसैवेतिपदेन सूचिततेन इंद्रियाणां मनसश्च संयोगतो यथानस्यात्तथा स्यात्तथाभिन्नेमिना
यः २४ ब्रह्मविदुक्तलक्षणा आसने सम्यगासीत्वा शरीरं साम्येन स्थापयित्वा दिक्षोऽप्रपयत्ना साग्रहहृष्टिमुक्त्वा १५०
सर्वकामसंकल्पत्यागएवं कसर्वेंद्रियाणि नियम्यततः शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं
मनः कृत्वा न किंचिदपि चिंतयेत् २५ शनैः शनैः क्रमेण बाह्यात् विषयेभ्यस्तत इंद्रियेभ्यस्ततोन विपरीतमनसैवम्

भायममन्तंतइत्यर्थः ननुब्रह्मविष्ण्वादिलोकप्राप्तिस्तुविदुषोलाभएवेति नेत्र सत्यलोकवैकुंठादेरपिमायिकत्वेनोक्त
दोषवत्त्वपरिमेयत्वात्वाविशेषात्तुद्दाभस्तत्स्वमित्वलाभोप्यलाभएवभवति आत्मलाभान्नपरंविद्यतइतिस्मृतेर्वा
त्मलाभातिरिक्तलाभस्यलाभत्वनिषेधात्रितस्यनिरतिशयानंदरूपस्यात्मनएवलाभोलाभायभवतिः तस्मादुक्तं
विद्वान्सर्वसाक्षात्कारकारणत्वादमुमेवयोगंपरमंतासंमन्यतेनततोन्यंलाभमित्यर्थः किंचयस्मिन्वयस्यामतेः के
रणपरिपाकविशेषावस्थायांस्थितःबाह्यमाभ्यंतरंचविस्मृत्य शुद्धावापन्नयावृत्त्यापूर्णानंदैकरसब्रह्मरूपेण
संस्थितोब्रह्मविद्यतिदुस्सहरूपतातद्विजनितेनापिनवाऽध्यात्मिकेनमहतादुःखेननविचाल्यतेस्वरूपाच्चालयितुं
नशक्यतेबाह्याभ्यंतरविस्मरणात्तैःविपरीतभावंनापितुनप्राप्यतइत्यर्थः २२ योगस्यफलस्वरूपमुक्त्वाऽधुनातत्फल
स्वरूपंतंयोगंविजानीयादित्याह तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्ण
चेतसा २२ बाह्योपरतत्वादिनिःसत्परिपाकभेदोविशिष्टोयोगोऽन्तःकरणावस्थाविशेषस्तमेवयोगसंज्ञितंविद्यात्योगइ
तिसंज्ञितंसंज्ञायस्यसयोगसंज्ञितस्तमुक्तलक्षणमंतःकरणावस्थाविशेषमेवयोगंविजानीयात्इत्यर्थः यो
गस्योक्तलक्षणाविस्पष्टत्वार्थंपुनरप्याह दुःखसंयोगवियोगमिति अत्रदुःखशब्देनतदनुबंधिसुखमपिकेसुखे
बंधःदुःखेतेदुःखानामाध्यात्मिकादीनांसुखानांचसंयोगःसंसर्गस्तेनवियोगोयस्यसदुःखसंयोगवियोगःअ
प्रकाशितबाह्यसुखदुःखमन्ययोतःकरणावस्थितिविशेषस्तंयोगंविद्यादित्यर्थः एवंयोगलक्षणंयोगंचाभिनिर्दि
श्यनतुष्यतोनियोगफलमपिभवतियाद्यसंसारनिमग्नस्यात्मनःउद्धरणंयोगेनविनानान्येनसिध्यतीतिविशालात्म
नत्वस्ययतेःविदेहसुत्तेयेसमाधिस्थवंधकर्मभ्यइतिसिद्धेयतुंदुःखसमाधेःकर्तव्यतामाह सद्गति आत्मसमुद्धरोप

गी० टी०
१४

पापद्यमनः प्रवर्त्तते तदा विषयमिथ्यात्वबुद्ध्या ततो निवर्त्य स्वरूप एव स्थापनीयमित्याह यतो यतो निश्चरति म
नश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २६ वासनावेगाच्चंचलं चपलं रागादिदोषग्रस्तत्वादस्थि
रमव्यवस्थं मनः स्वविषयमात्मानं मनागप्यसमवाप्य नपापरागादिना वा हठाद्बहिर्जातमज्ञातं च सत् यतो यतो विषया
यमुद्दिश्य निश्चरति निर्गच्छति ततस्ततः स्वास्थ्याद्विषयान्नियम्य तत्र तत्र विषये मिथ्यात्वं दुःखमयत्वं बंधकत्व
मात्मव्यतिरेकेण सत्वं चोद्भाव्य वैरस्यमापाद्य वैराग्येणैतन्मनः पुनरात्मन्येव विज्ञानं गमयित्वा आत्मन्येव वशं नयेत्
आत्मनि नित्यत्वचिद्रूपत्वानंदैकरसत्वस्वरूपत्वादिगुणमेकाग्रेण निरुद्धं विसंवादि नियमेनात्मस्थमेव
कुर्यादित्यर्थः २६ एवं पुनः पुनर्विषयेभ्यस्तत्र दोषोद्भावनेन एवं कमात्मन्येव मन आत्मन्येव स्थापयित्वा स्मरत्
रूपाच्चिरकालं नित्यं निरंतरं चिन्तनस्य प्रावृत्तिमेव कुर्वतो योगिनो पत्वे बाह्यवासनानां तन्मयानीवृत्तिः शेषसं
क्षये सति यदा ब्रह्मणि मनः प्रशान्तिमेति तदा सुखं प्राप्नुतेमुतम्भाविमेवतीत्याह प्रशान्तमनसं ह्येनं योगिनं सु
खमुत्तमं उपैति शांतरजसं ब्रह्मभूतमकल्मषं २७ शांतरजसं नित्यनिरंतरसमाधिनिष्ठया प्रशान्ता विनष्टा रजो
रजोगुणः रज इति तमसोऽप्युपलक्षणं तमोगुणश्च स्वस्वकार्यैः कामक्रोधलोभमोहाहंकारममकारादिभिः सह यस्य सशां
तरजास्तं शांतरजसं केवलं शुद्धसत्वस्वभावं मनस्त्वात् अकल्मषं अंतःकरणस्य कल्मषं भेदवासनारूपरजस्तमसाः स
त्वमिश्रास्तद्भौतिकगोचरा यास्ताः सर्वा न विद्यंते यस्य विजेसो अकल्मषस्तं अत एव प्रशान्तमनसं विक्षेपविपरीत
भावहेतोः रजस्तमोगुणयोः स्वकार्ययोर्निःशेषविनाशाद् दृढमभ्यस्तया प्रशान्तं प्रकर्षेण शान्तं प्रशान्तं अविषया
कारतामेव समापन्नं मनो यस्य तं प्रशान्तमनसं मनसमतः स्वब्रह्मभूतं ब्रह्मैवाहमिति पाधिकं तेयारिच्छितिं पारितस्य एनं

151

राम०

स्वमंदं मंदं मनः करणमुपरमेदुपरतं कुर्यान्नमोक्षैककामनया विषयेभ्य इन्द्रियेभ्यश्चात्मन्येव स्वसंबंधो यथा न स्यात्त
था मनसो बहिः प्रवृत्तिमुपशमयेदित्यर्थः पश्चाद्धृत्या धैर्येण गृहीतया बुद्ध्या ज्ञानेन आत्मविज्ञानमात्मन्यात्मनि महति निप
क्षेपे तद्घटके च्यात्मनीत्येवमुक्तमन्तरीन्याद्योऽनुपलक्षिता निसर्वाणोच्छ्रियाशक्तिहेतुविषयैः सह मनसि प्रविला
पयेत् प्रपंचकारणं तन्मनो विज्ञाने आत्मनि अहमास्मिकापां बुद्धौ ज्ञाने महत्यात्मनि कौं बुद्धिं महत्यात्मनि महत्तत्त्वे
तन्महे तत्त्वे मेज्याकृते तेनद्याकृते शान्ते सर्वप्रपंचोपशमे निर्विशेषे परे ब्रह्मणि प्रविलापयेदेवं सर्वं ब्रह्मणि प्रविलाप्य
ब्रह्मैवेदं सर्वमित्यादिश्रुत्यर्थावष्टंभसमुत्पन्नात्स्वरूपवत्तो हृ धृतिर्धृतिः धैर्यं तया गृहीतया वशीकृतया बुद्ध्या सर्वो
गतेः विलापनेन सर्वं ब्रह्ममात्रावशेषत्वसंस्कारबलेन सर्वमात्मैवेत्युत्तरोत्तरदृढसंस्कारवत्या बुद्ध्या मन आत्म
संस्थं सम्यगात्मन्येव चैतन्यरूपे स्थितं निश्चलं कृत्वा सर्वमात्मानमेव पश्यन्नित्यर्थः एवमात्मसंस्थं मनः कृत्वा वि
हाय तत्ततः स्वयं किंचिदपि बाह्यमांतरं वा वस्तु न चिंतयेन्न भावयेत् किंतु सर्वं ब्रह्मैव भावयेदित्यर्थः एतेन ब्रह्माकार
वृत्त्या मनसो योऽन्यभावनाऽभावः स एव परमो योग इति सूचितं भवति २५ ननु विषयप्रवणस्य मनस आत्मनि संस्थि
तिर्न संभवति तद्धि विषयवासनाभिः रागादिभिश्च नियतविषयप्रवृत्त्यैकस्वभावत्वान्मनसः स्वभावाद्दुरतिक्रमत्वान्नाय
न स्वभावतः प्रवृत्तिनिरोधेन नियमितं दासिद्धो कुत आत्मनि संस्थितिरित्याशंक्याह विषयेषु सत्स्वेव सनी
चीन त्वेह स्वेच्छयैव केवलान्मनसः प्रवृत्तिस्तद्धेतवो रागादयश्च विकल्पा नहि वस्तु मायामात्रमिदं हि तत्र प्रमाणं
स्वप्नस्वप्नमायामात्रमित्यादिश्रुतिभिरिदं सर्वं मिथ्याकल्पितत्वाच्छुक्तिरजतवदित्यादियुक्तिभिश्च विषयाः आरोप
तत्त्वात्मसिद्धे विषयसत्त्वस्य मोचनेन तत्त्वबुद्धिर्न स्यात् रागादयश्च तत्त्वमनसश्च प्रवृत्तिर्न संभवति कौचि

मात्मैकत्वदर्शनं सर्वसंसारदुःखनिर्मूलनकारणं प्रतिपादयति सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते यो-
गयुक्तात्मा सर्वत्र समदर्शनः २९ पुरुषं परमपुरुषार्थेन योजयति संघट्टयतीति योगः बुद्धियोगस्तेन युक्त उपयुक्तः प-
रिपाकजन्मसम्यग्दर्शने यस्मिंश्च समत्वेनावस्थितिबंधेन पुरुषस्य मोक्षेन योगेन सम्यग्दर्शनेनैव युक्तः संयुक्तः आ-
त्मा मनो यस्य स योगयुक्तात्मा ब्रह्माकाराकारितान्तःकरणस्तत एव समदर्शनः समं समभावापन्नं विशेषग्रहरहि-
तं मुक्तं चिरकालयोगाभ्यासवशात्सर्वत्र समन्तात्र ग्रहणपूर्वं दर्शनं यस्य स समदर्शनो ब्रह्मवित्तमः स्वयं सर्वभूतस्थ-
भवंतीति भूतानि अधिष्ठानाग्रहणादोषेणानंतः स्वप्नवत्स्रजावंतो वप्रतीयमानान्याकाशादीनि ब्रह्मादिस्तंबांतानि च
पानि तेषु सर्वेषु भूतेषु ब्रह्मांडेषु सर्पवत्रज्जुहेतुमदीपवत् घटादिष्वाकाशवद्विकारेष्वन्वेनानुतिष्ठतीति सर्वभूतस्थ-
मात्मानं यथाऽस्मिन्कार्यकरणसंघाते देहेंद्रियप्राणमनोबुद्ध्यादीनां द्रष्टृत्वेन तद्वैस्यानां तु साक्षित्वेन स-
र्वप्रकाशकत्वेन अहमर्थतया निरभिमानेनाहमिति तिष्ठामि तथैव सर्वभूतेष्वपि भूतानि तद्वैस्यानां द्रष्टृत्वेन प्राणादीनां सा-
क्षित्वेन प्रकाशकत्वेनाहमर्थत्वेनाविकारात्मनाहमेवैकरूपेणावेतनमात्मना तिष्ठामीत्येवं भूतात्माऽनुभूतात्मा स्वस्मि-
व सर्वत्र तथा स्थिति मनुभाविकपाल्वसद्भावं सर्वतो विनिश्चित्य सर्वभूतेषु स्वस्वरूपेणावर्तमानमात्मानं स्वमेके-
मेव समीक्षते सम्यगनुभवति एवं सर्वभूतेष्वात्मैकत्वं विज्ञाय बाह्यनिर्विकल्पसमाधिनिष्ठानिष्पन्नाः विष्ठा
न या यथात्मविज्ञानबलेनात्मन्येव परिपूर्णे सच्चिदानंदैकरसे निर्विकल्पे निराकारे निर्विशेषे स्वस्वरूपे सर्वभूतान्या-
काशादीनि स्थूलानि तानि सकार्याणि अपास्य आत्ममात्राणि पश्यमीक्षते यथाधिष्ठाने विवेकविज्ञानेन घटशरावादीनि मृ-

गी० टी०
१५
152
१५०

त्मनैव स्थितमेनं योगिनं ब्रह्मविदं यतिमनुगमं यस्मादुत्तमं नास्ति तदनुगममनुपमं नित्यं निरतिशयं साधनानपेक्ष
मयत्नसिद्धमसंप्रयमात्मस्थमतमात्मैकवेद्यं ब्राह्मं सुखमुपैति तदा प्राप्नोतीत्यर्थः साधननिरपेक्षात्पारसुखाविर्भावः
सुखमेतत्सर्वमत्पसः एषोऽस्य परमानंदस्याविर्भाव इति प्रसिद्धमेवेति प्रसिद्धिद्योतनार्थो हि शब्दः २७ योगमनुष्ठायैव
यतिः कृतार्थो भवति सदा सुखं ब्राह्ममसंप्रयमेवमाप्नोतीत्युक्तं विद्वत्सु खलु विभक्तमेव सुखलाभं योगजं योगिनः
प्रशंसति मुक्तसुखस्वरूपं योगः करणी योगमुक्तिसुखसिद्धय इति सूचयितुं युंजन्नेवं सदात्मानं योगी विगतकल्मषः
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते २८ दृश्यं सर्वं मिथ्यैवेति दृश्यमिथ्यात्वं हृदं निश्चित्य सर्वत्र कामसंकल्पप
रित्याग एवं के सर्वेन्द्रियाणि नियम्य बहिरंगांतरंगसाधनसंपन्नो भूत्वा योगी समाधिनिष्ठापाम हत्तो यतिरेवं यथा शा
स्त्रं यथालक्षणं सदा नित्यमात्मानं चिदानंदैकरसं परिपूर्णं महितीयं परं ब्रह्म युंजन्ननुसंदधानः सर्वमिदमहं च ब्र
ह्मैवेत्येवं ध्यात्वा सर्वं ब्रह्मैव पश्यन् विगतकल्मषः विनिष्क्रांतं विगतं निःशेषविनष्टकल्मषं वासनाकृतभेददर्श
नलक्षणं यस्य स विगतकल्मषः सन् सुखेनाऽप्रयत्नेन सिद्धं साधननिरपेक्षमकृत्रिमं ब्रह्मसंस्पर्शं ब्रह्मणा ब्रह्मा
त्मना संस्पृश्यते अवगम्यत इति ब्रह्मसंस्पर्शं ब्रह्मात्मनि वृत्तिदेकरसमित्यर्थः यद्वा संस्पृश्यतेऽगृह्यतेऽनेनेति संस्प
र्शः स्वरूपं ब्रह्मैव संस्पर्शो यस्य तद् ब्रह्मसंस्पर्शं ब्रह्मात्मकमत एवात्यंतमनंतमपारमापरममतीत्य तिष्ठतीत्यत्यंतमपार
मसंप्रयं नित्यं शाश्वतं ब्राह्मं सुखमश्नुते जीवन्नेव मुक्तः सन् मुक्तिसुखमनुभुंक्त इत्यर्थः २८ योगस्य फलमभिमति
बुद्धमात्मैकत्वदर्शनमात्मानं दानुभवसिद्धत्वेन कर्मफलमिति स्तिनाहृयोरवैक्यात्मानं दानुभवे दर्शितस्तावधुनाऽद्वितीय

गी०सु० ९६

श्रुतिप्रसिद्धिबलात् स्वस्वरूपे रोकत्वमेव सदेवं पश्यतो ब्रह्मविन्नमस्याहं सच्चिदानन्दैकरसं परं ब्रह्म न मत्तः पृथगस्मीति प्र
णाशोऽदर्शनं चैवं नैवविषयत्वं न गच्छामि किन्तु नित्यमेव गच्छन आसीनस्य वा शयानस्य वा सुप्तस्य वा निमिषतो मिषतो भु
ञ्जतो पिबतो वा यत्र यत्र प्रपातिष्ठते तत्र तत्र द्विविधे सदा सर्वत्र वस्तुशो रूपवत्परमानन्दमात्रमहं नित्यविषयो भवामीत्य
र्थः यथा घटः स्वरूपतः स्वयं मित्रत्वेन वस्तुत्वात् विषयो भवति तथा ब्रह्मापि सर्वत्र स्वं पश्यतो ब्रह्मविदः स्वभिन्न
मेव सद्विषयो भवति तथात्वेऽदृश्यत्वं रक्षत्येव सत्तेऽप्यत्र नस्य मप्यं भवतीति भगवतादेवं मे देहेन्द्रियैः सह मिथ्यात्मभाव
प्रसंगाद्देहादिपरिहर्तुमाह सर्वेति सर्वब्रह्मविदपि मे मम विदेकरसस्य निर्विशेषस्य ब्रह्मरूपेण मत्तः प्रणश्यतीति प्र
णाशो नाम नाशः नात्मतो दात्म्यापत्तिरेव विदुषः यथा वेधर्म्यापत्तिः पुरुषस्य नरकादिप्रयोजनहेतुस्तथा ब्रह्मविदोऽपि
परीतभावापत्तिरेव जन्मादिप्रयोजनं न हेतुर्यत्र ततोऽयं मुक्तिर्विदुपनात्म्यात्मभावं नकरोति किन्तु देवदत्तः स्वदेहं
वब्रह्मैवाहमिति स्वात्मना विषयीकृते निर्विशेषपरब्रह्मरूपे वस्तुदेहेहमित्यात्मानं तिष्ठतीत्यर्थः ३० एवं योगानुष्ठा
नसंभावितसम्यग्दर्शनस्य सर्वस्य ब्रह्ममात्रत्वावगाहिनः फलं सदा सर्वत्र ब्रह्मदर्शनं ब्रह्मरूपतया तत्त्वदर्श
नं सर्वदा ब्रह्मानन्दोऽनुभवतीत्युक्तं तिसृत्यपि तावद्वुनात्वेवं सर्वगो ब्रह्मवित्तमः स्वमारब्धानुरूपैरादेहेनानां
धर्मेवन्मोऽपि सति स्वयं स्वनिष्ठेयेव वर्तमानः स तु मुक्तिं प्राप्नोतीत्याह सर्वभूतस्थितं यो मां भजत्येकत्वमास्थि
तः सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ३१ एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचन सर्वं ह्येतद्ब्रह्म
अयमात्मा ब्रह्म अहं ब्रह्मास्मीत्यादिश्रुत्यर्थविचारसमुत्थज्ञानबलेन योगानुष्ठानसमुत्पन्नस्वानुभवे ति

153

जल

एमात्रारोपयथाजलतरंगफेनबुद्बुदादीनांजलमात्रारोपयथासर्पधारादण्डादीनांरज्जुमात्रारो
समीक्षतेविवेकीपुरुषस्तथाब्रह्मविदपियोगानुष्ठानसमुत्पन्नाप्रतिबद्धबोधेनात्मविज्ञानबलेनसर्वाण्
यपिभूतान्यधिष्ठानाऽसत्तानतःप्रतीतान्याऽऽत्ममात्रारोपेणसमीक्षते अहमेवेदंसर्वमस्मीतिसर्वमात्मानमेव
साक्षादनुभवतिननुतस्मात्तेषांरूपयसत्तांपश्यत्येवमोक्षाराधेयोभयात्मना प्रतीतमात्मानंनित्यशुद्धबुद्धमु
क्तस्वभावमेकमेवाद्वितीयंनिष्कलंनिष्क्रियंशांतमनंतमपारमनुत्तरंपश्यतिसर्वसंसारदुःखविनिर्मुक्तमजरमेवंदर्श
नमुनेःपरमकारणमितिस्मृतिर्भवतिननुयोगःसांख्यंकर्मचतीर्थमंत्रजपादिष्व तयावेक्षितिः सर्वभूतेषु
चात्मानंसर्वभूतानिचात्मनिसंपश्यन्ब्रह्मपरमंयातिनान्येनहेतुना इत्येनेनसंसारसागरनिमग्नात्मोद्धर
णायमुमुक्षोर्विदेहकैवल्यार्थिनःसमाधिरवश्यंकर्तव्यइतिसिद्धं ॥२९॥ उक्तरीत्यात्वात्मनःसर्वभूतस्थत्वंस
र्वभूतानामात्मत्वंचपश्यतोब्रह्मविदःस्वस्यचस्वरूपेणैकत्वबोधेऽपितुस्वस्यापिसर्वभूतेष्वस्थत्वंसर्वभूतानामपिवा
त्मत्वंचसत्त्वंचपश्यतःएवमीश्वरस्यस्वस्यचस्वरूपेणैकत्वमेवाप्रतिबद्धंहेत्वापश्यतोब्रह्मविद्याविद्यतेतदुद्देशेनास्यफलमा
ह योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥३०॥ एतेनसाधनसंपत्त्या
योगारूढोब्रह्मविद्यातिमात्रसच्चिदानंदैकरसंपरंब्रह्मसर्वत्रब्रह्मादिस्तंबपर्यंतेषुभूतेष्वेकमात्मस्वरू
पेणास्थितंपश्यतितथैवयोऽखिलस्यापिमयिपरेब्रह्मण्यारोपःआब्रह्मणादिस्थूलांतंजगच्चसर्वंव्योम्निगंधर्वनगरे
वदाभासमात्रंनिःसत्ताकंपश्यतितस्यैवंसम्यग्दर्शिनस्तत्त्वतःसर्वमायाधारत्वलक्षणाभ्यांनियताभ्यां

गी० टी०
६

154

एवंलक्षणः स योगी प्रतिः परम उक्तः शोभनः संमतः यद्वा आत्मौपम्येन नित्यमुक्तस्वरूपत्वेन यथाहं देहतद्धर्म
तत्कर्मसुखदुःखादिसंबंधरहितस्तथा सर्वे पि च देहिनो देहतद्धर्मतत्कर्मसुखदुःखादिसंबंधरहिता एवेत्यात्मौ
पम्येन यः पश्यति सर्वेषां तु नित्यमुक्तत्वं स महात्मा विजानाति तथापि बाह्यदृष्ट्या सुखं वा दुःखं वा समं सर्वस्य सर्व
त्र सर्वभूतेषु योऽब्रह्मवित् पश्यति कीदृश ब्रह्मविदो न्यहीमित्यादिस्मृतिप्रामाण्यान्मुक्तत्वान्न मे पापलेशोऽस्तीत्य
भिमानमुत्सृज्य सर्वत्रात्मबुद्ध्या मानापमानस्य विक्षेपं यो न करोतीत्यर्थः एवं सर्वमात्मबुद्ध्या अनु
कूलवर्ती स योगी योगाभिनिष्ठो ब्रह्मविद्याप्तिः परमः ज्ञानिनां सर्वेषामुत्तम इति मम अभिमत इत्यर्थः ३२ आ
त्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेदिति यथा दीपो निवातस्थाने गते सोपमा स्मृतेत्यादिना मनस आ
त्मसंस्थत्वं निवातस्थप्रदीपवन्निश्चलत्वं च योगिभिर्योगसिद्धये यमादिनोपमिति कृतान्तःकरणस्य आत्म
संस्थितत्वस्थिरत्वासिद्धेरुपायजिज्ञासया अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न
पश्यामि चंचलत्वात् स्थितिं स्थिरां ३३ योगी युंजीत सततमित्यादिना मुमुक्षोर्यतेः कैवल्यार्थिनः कर्तव्यत्वेन
योऽयं ध्यानयोगः साम्येन साधारण्येन त्वया प्रोक्तः न तु मनोनिरोधनसाधननिरूपणं स्वीकृत्य वैशेष्येणोक्त
इत्यर्थः ततो मनसश्चंचलत्वादेतस्य प्रतिपादितस्य योगस्य स्थिरां निश्चलां स्थितिं निष्ठामहं न पश्यामि प्रत्य
गपतः करणस्थिरीभावस्य साधनमहं न जानामीत्यर्थः ३३ यदुक्तं तदेव सविशेषं विस्पष्टयति चंचलं हि
मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं ३४ कृषिर्भूवाचकः शब्दो णश्च निर्वृति

बलेनैवैकत्वमास्थितः सर्वमिदमहं च ब्रह्मैवेति सदैकत्वमेवास्थितः सर्वं ब्रह्मैवेति हृढनिश्चयपुरुषोऽमत्वायो
ब्रह्मविद्यतिः सर्वभूतस्थं महदादिस्थूलपर्यन्तं सर्वभूतजातं बहिरन्तः सदैकरूपेणाऽयं पिण्डमध्येऽपि सर्वतो
व्याप्य तिष्ठतीति सर्वभूतस्थं मां निर्विशेषं परं ब्रह्म भजति ब्रह्मैवाहमिति प्रत्यग्दृष्ट्या स्वात्मानमेव साक्षाद्विज्ञाय मद्रू
पेयो भजतीत्यर्थः स योगी मद्भावापन्नो ब्रह्मवित् सर्वथा वर्तमानः स्वप्रारब्धानुरूपेण विविधचेष्टाः देहचे
ष्टयालोकदृष्ट्या बालवन्मत्तवदुन्मत्तवत् पिशाचवज्जडवदुन्मत्तोपमानोऽपि स्वदृष्ट्या निर्विकारब्रह्मात्मनैवावस्थि
तो ब्रह्मवित्तमः पतितेऽस्मिन् देहे मय्यपवर्जते मदात्मनापतिष्ठति पद्धाममयोतितत्त्वोपापश्येस नमी मया ब्रह्म
त्मना तिष्ठति विदेहमुक्तिं प्राप्नोतीत्यर्थः ३१ सर्वभूतसुहृच्छान्त इति ज्ञानमुक्तं द्युतेऽपि सोऽस्य पात्रायस्य क
र्मण इति स्मरणात् सर्वभूतसुहृत्तया मनोवाक्कायकर्मभिः प्राणिपीडामकुर्वन् रवं अनुष्ठानमनेन तज्ज्ञम
ज्ञानं चेन्तःफलं मोक्षः सिध्यति नान्यथाऽतो मुमुक्षोपेतः सर्वप्राणिहिताय स्वसाम्येन सर्वभूतानां सु
खं दुःखं च परिज्ञायते पाम्रुपद्रवः कथंचिदपि न कर्तव्य इति बोधयितुमिदमाह आत्मौपम्येन सर्वत्र समं पश्य
ति योऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः ३२ आत्मौपम्येन सर्वप्राणिषु सुखदुःखवेदनकर्मणा
ऽऽत्मा स्वयमेवोपमा दृष्टान्तो यस्य स आत्मोपमस्तस्य भाव आत्मौपम्यं तेन तत्सादृश्येन सर्वप्राणिषु वा स
द्वोचा यो यदि शब्दोऽप्यर्थः सर्वत्र सुखं च दुःखं चापि यः समं पश्यति यथा स्वस्य सुखमिष्टं दुःखमनिष्टं भवति
तथैव सर्वप्राणिनामपीति विज्ञाय वाङ्मनःक्रियाभिः परेषां कदाचिदपि किंचिदपि क्लेशं न करोतीत्य

०टी०
१८

चलं च भवतीत्यर्थः ननु रागद्वेषादिदोषग्रस्ते बालादिवन्मनस्वी वीतस्पृहे वद्यते यः रागद्वेषादिरहितो नैव श्रयमा
त्रेणाव मनसो निश्चलत्वं सिध्यतीत्याशंक्याह न तेषां पदार्थेषु आत्मत्वतां न रागाद्यभावत्वं न से भवति मनो नैश्चल्यं च
तथाप्युपायाभावे सत्संगमात्रेणाकार्येन सिध्यतीति न भवितव्यमित्याशयेनाह अभ्यासेनेति विजातीयप्रत्ययतिरस्
कारपूर्वकसजातीयप्रत्ययावृत्तिरभ्यासस्तेन तीव्रमोक्षेच्छातीव्रवैराग्येक साधनेन चिरकालनित्यनिरंतरमावृत्तिना
त्रेण प्रत्ययाभ्यासेन विजातीयप्रत्ययानां निःशेषविनाशेन निरंतरक्षयस्तनां नानिःशेषसमूपाशुमिति ताया ये नै मि
तिके सत्यप्युपायरनिरूपायेन चलेन नैमित्तिनां बाह्यवासनानामपाये मनः स्वयमेव निश्चलं भवत्यतः तीव्रमोक्षे
155 च्छावैराग्यसंवलितसत्संगाभ्यासस्य मनोनिग्रहहेतुत्वे चलेऽपि चलं कारणं नैव सम्यगनुष्ठिते न मनो निश्चलं भव
तीत्यर्थः ३५ किंच असंयतात्मना योगो दुष्प्राप इति मे मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६
तीव्रमोक्षेच्छावैराग्याऽभावदुष्कृतेनाऽसंयतात्मना अभ्यासेन ज्ञातेऽप्यात्मनि तत्त्वे हासनया बहिरेव प्रवृत्ति तात
चिरकालं नित्यं निरंतरमत्यंतास्वयात्मत्वसंस्पर्शाऽऽस्यापि तत् आत्मा मनो यस्येते नासंयतात्मना समाधिमकुर्वता य
ति नायो योगो ज्ञानयोगः सदा सर्वत्र ब्रह्ममात्रदर्शनलक्षणोऽप्रतिबद्धः मुक्तिको सद्दर्शनेन मुक्ति [illegible] वदधि
ष्ठानब्रह्मदर्शनसमुत्पन्नः संततो योऽब्रह्मप्रत्ययः स दुष्प्रापः नित्यनिरंतराभ्यासाक्रमदुःखेन विनाप्तुमशक्योऽदुष्प्रापः
इति मे मम स्वस्य मतिः निश्चयः कृतास्वऽपि श्रवणादौ दृश्यते समाधिना विना सम्यग्दर्शनं न सिध्यतीत्यर्थः मुमु १५५०
क्षापेतेः समाधिनैव सम्यक्तत्त्वं मोक्षश्च सिध्यत्यऽतः समाधिरेव कर्तव्य इति स्वपितुमाह वश्यात्मनेति इत्थं
मादस्यवेत्वसाराण्यध्योगत्यर्थोऽनुष्ठेयः वश्यात्मना वश्यः स्वायत्तः तीव्रमोक्षेच्छातीव्रवैराग्याभ्यां सुतरां विषयेष

वाचकः तयोरैक्यं परंब्रह्म कृष्ण इत्यभिधीयते रमति सदानंदस्वरूपत्वान्न रमात्मा कृष्णस्तत्संबुद्धिः हे
कृष्ण मनश्चंचलं चपलं यद्यपि पवनस्य चंचलत्वमस्ति तथापि तत्कृतोऽनर्थः कश्चिदपि नास्ति नत्वेवं किंतु प्र
माथि चित्तं हि पुरुषं प्रमथ्नाति रागद्वेषलोभादिदोषैः स्ववशं रमपि पुरुषं मम ध्यातिविसो भवतीति प्रमाथि प्र
यत्नशीलं पुरुषमपि परवशं करोतीत्यर्थः यद्यपि विषादेः प्रयत्नशीलत्वमस्ति तथापि मंत्रादिना तन्निग्रहो तु
शक्यते नत्वेवं किंतु बलवत्सारवन्महाजववत्त्वं शजत्वात् बलवत्त्वात्तन्मंत्रादिसाधनैः निरोद्धुं शक्यतमित्यर्थः यथा
महार्णवे गतवतां वारणानां साधनानि रेणुच्छेदः सिध्यति तु न यत्तस्य छेदः संभवतीति तत्र यमिति चेत्तर्हि दृढं वज्रसारं सर्वं
वेच्छेदस्याविषयो न भवति यत एवं लक्षणं मनस्तत एतस्य मनसो वायोरिव निग्रहं सुदुष्करं मन्ये उपायकोटि
भिः सुतरां निरोद्धुमशक्यं मन्ये इत्यर्थः अप्राप्तिया नाम हतः समेरु तुलनादपि अपिव ह्युमनाला
योति यम चित्तनिग्रह इत्यादि प्रसिद्धि द्योतनार्थो हिशब्दः ३४ मनसो दुर्निग्रहत्वं यत्तत्त्वोक्तं तत्त्वशास्त्र
प्रसिद्धमेवेत्यंगीकृत्य तदेवानुवदन्मुमुक्षोस्तन्निग्रहसाधनं च प्रतिपादयति द्वाभ्यां श्रीभगवानुवाच अ
संशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ३५ यद्यपि चंचलत्वात्प्रमाथित्वा
द्बलवत्त्वाद्दृढत्वाच्च मनसो दुर्निग्रहत्वेऽसंशयः संशयो नास्ति तथापि तन्निग्रहोपायस्त्वयैवमेवोच्यते नं
गुवैराग्येणाभ्यासेन तु युक्तिभिस्तत्त्वतो रीत्या सर्वस्यापि वा विषयस्य मिथ्यात्वमेव सम्यक् त्यजतो विद्रवः विष
येषु सत्सु तुच्छत्वबोधकत्वबुद्धिः तम्यगुहेति तपा च तीव्रमोक्षेच्छया च समभुपत्वे च परिहृषयवैरस्याते दवैराग्यं ततो वैराग्ये
ण ग ह्यते मनो निगृह्यते परा धीमि ध्यात्वत्ता नेन एग हृषादिदोषा त्सहगृहे तवोविनिवर्तितेतन्निहतामनोव सतिनि

पापाचरणाभावाद्दुर्योनिदुर्गतिप्राप्त्यभावश्चेतनोऽप्राप्तयोगसंसिद्धेर्यतेः कां वा गतिमभिलष्यसि तां वदेत्यभिप्रायः न
नत्र कां गतिं कृष्ण गच्छतीत्यर्जुनस्य प्रश्नोऽनुपपन्न एवं भवति योगसंसिद्धेरप्राप्तत्वेऽपि पतितेरनस्यप्राप्ते न पुण्यकर्म
संभवात्तदनुरूपस्वर्गादिलोकप्राप्त्युपपत्तेरिति चेन्न तेषां चित्तशुद्धावेवोपक्षीणत्वात् ज्ञानोत्तरसहसेतुपपत्ते
द्वानुत्पन्नपोद्घरेः नरकाणां क्षीणपापानां कृष्णे भक्तिः मनापत्ते स्ववर्णाश्रमधर्मेणानयस्माहरिनोपराणां साध
नेषु यत्नेनुसंसारे वैराग्यादिचतुष्टयं नित्यनैमित्तिकैरेव नियमेन स्ववर्णार्पितैः बहुजन्मकृतैर्दिशः सत्त्वशुद्धिस्यैष्टु
ते स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति वचनानामीश्वरार्पितानां उरपकर्मणां चित्तशुद्ध्येकप्र
योजनत्वस्मरणात् ननु तर्हि संन्यासाद्ध्वाराः स्यानमित्यादिस्मृतिप्रसिद्धसंन्यासक्रियामात्रत्वस्यापि ब्रह्मलो
कगतिर्विद्यत एवेति चेन्न तत्संन्यासस्यान्यथासिद्धत्वात् एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति संन्यस्य
श्रवणादिं कुर्यादित्यादिश्रुतिस्मृतिविहितसंन्यासस्य ज्ञानांगत्वेन श्रवणाद्यर्थं सिद्धावेवोपक्षीणत्वात् प्राक्
कृताद्ब्रह्मलोकप्रापकत्वानुपपत्तेः यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेति विहितज्योतिष्टोमस्य यागस्य स्वर्गप्रा
पकत्वं एवं उपन्यस्तसंकल्पत्वात् स्वर्गप्रापकत्व एवं साफल्यं ननु ब्रह्मलोकादिलोकप्रापकत्वं तथा श्रवणाद्यर्थं सिद्धावे
वोपक्षीणस्य विविदिषासंन्यासस्य श्रवणाद्यर्थमायत्तस्यैव साफल्यं ननु फलान्तरप्रापणे सपथा कामो
भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यत इति श्रुतेर्नियमात् एवं०
श्रवणाद्यंगत्वेनकृतस्य विविदिषासंन्यासस्य श्रवणादावेवोपक्षीणत्वाद्यतेस्तदतिरिक्तपुण्यकर्मा
ऽनुपलंभाच्च पतत एवार्जुनस्य प्रश्न इति सिद्धं ननु हि संन्यासो हृद्गताः स्यात् स्यानमित्यादिस्मृतिवाक्यानामानर्थ

ऽवश्यजित आत्मा मन इंद्रियग्राम स्वरूपेन तेन वश्यात्मना यतता ऽयं तत्र उपायथा ... योगसिद्धे
यत्नं कुर्वतैव यतिना योगः उक्तलक्षणो ऽनेनैवोपायेन अवाप्तुं प्राप्तुं शक्यो भवति नान्येनेत्यर्थः ३६ एवं योग
मार्गमुपायं ज्ञात्वा पुनरिदानीमिहामुत्र सुखकारणानि श्रौतानि दैनिककर्माणि सर्वाणि च त्यक्त्वा योगनिष्ठ
यामेव यत्नस्य यते योगसिद्ध्यसंभवकाले एवं तस्य स्वर्गापवर्गसाधनविधुरस्य का वा गतिर्भविष्यतीति शं
कमानो गतीः ज्ञातुकामोऽर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमानसः अप्राप्य योगसंसिद्धिं कां
गतिं कृष्ण गच्छति ३७ योगानुष्ठाने नैव सम्यग्यत्नं ते नैव मोक्षं इति निश्चय ... स्तिकबुद्ध्योपेतः
संपन्नोऽप्ययतिः यत्नेन योगसिद्ध्यै यत्नं करोतीति यतिः समाध्यनुष्ठाने प्रयत्नवान् स न भवतीत्ययतिः अपि
सि बहुविघ्नानि भवंति महतामपीति न्यायेन प्रतिबंधकमेव प्राप्त समाप्ति विचित्रं ... विशेषः समाधिप्रस
ने रतते एव योगाच्चलितमानसः बुद्धेनाहमिति ब्रह्मरूपेवान्नतो न धीने ... तस्माद्योगादंतकाले
ऽप्यथावा चलितं वा अथवा समनया दुःकर्मणा ... परीतमना वा ... चलितमानसोऽपि ... स्मृ
तिरेवं लक्षणो योगो यतियोगसंसिद्धिं विदेहमुक्त्वा ... योजयतीति योगः सम्यक्कृता ... संसिद्धिर्नि
रतरं समाध्यनुष्ठितस्यामतिबद्धता सर्वमिदमहं च ब्रह्मैवेत्यप्रतिबद्धसम्यग्दर्शनं योगसंसिद्धिस्तां समा
धिफलमप्राप्य स्वयं मत्वा कां गतिं गच्छति अनेकानित्यविज्ञानपदार्थेषु ... नार्थकः किंतु शब्दो ... सप
द्यर्थकः गम्यत इति गतिस्तेन प्राप्तव्यो ऽर्थः ... स्वर्गसंपादककर्मानुष्ठानाभावात् स्वर्गप्राप्त्यभावः
विष्ण्वादिदेवतोपास्त्यभावात् ... नाभावान्मुक्तिप्राप्त्यभावः

गी॰टी॰
२०

तःक्षीणो किंस्विदं चित्तये हि नियोगिनोपपतेः सर्वकर्मोपरमस्मरणात् ध्यानयोगपरोनित्यमित्यत्र निदिध्यासोः क्रियांत
रानवकाशार्थे नित्यपदमिति श्रीमत्भाष्यकृद्भिर्व्याख्यानत्वाच्च निरंतरयोगनिष्ठायस्यपि तेर्भ्रंजयादिकृत्य
कर्मानुष्ठानाऽनुपपत्तौ तत्फलमप्यनरूपलोकगतिर्नसंभवत्येवातएवार्जुनः एष्टानि कां गतिं कृष्ण गच्छती
ति ३७ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि
३८ ब्रह्मणः पथि ब्रह्ममार्गे योगनिष्ठायां विमूढः विशिष्यमूढो वि [illegible] मूढः नैतिबंधकप्र
मदोषेण विपरीतभावेभ्यांतः समाधिनिष्ठाप्रच्युत इत्यर्थः ततएवाप्रतिष्ठः प्रतितिष्ठत्यनेनेति प्रतिष्ठा आ
धारस्तद्रहितोऽप्रतिष्ठः ज्ञानकर्मान्यतरालंबरहितोयतिः स्वधर्मभ्रष्टः योगनिष्ठाप्रच्युतत्वान्नैसानक्र
तप्रष्टः सर्वकर्मसंन्यासात्कर्मफलभ्रष्टश्चैवमुभयविभ्रष्टः सन् छिन्नाभ्रमिव मारुताच्छिन्नमेघमंडल
संबंधरहितं पश्चादागच्छन्मेघमंडलसंबंधरहितं चपन्मध्यवर्ति स्वल्पमभ्रं तद्यथा पुनाच्छिन्नं सद्यथाऽन्तरालेन श्यति
स्वरूपनाशं प्राप्नोति तथाऽयमपि नश्यति कच्चित्किंतु स्वरूपनाशं प्राप्नोति वा किमित्यर्थः ३८ एतन्मे संशयं कृष्ण छे
त्तुमर्हस्यशेषतः त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ हे कृष्ण मज्जनं सदानंदस्वरूपपरमात्मन त्वमेव सर्व
ज्ञः परमेश्वरः मेममैतं संशयमशेषतो निःशेषं यथा नस्यात्तथा छेत्तुमर्हति त्वत्तः तिस्मृति निर्मूलयितुं त्वमर्हे   २५०
सि समर्थोसीत्यर्थः प्रष्मिन्नच्छिन्ने सुमुमुक्षवो निर्भयाः संतः सर्वकर्माणि संन्यस्य योगनिष्ठायां प्रवर्तेरन् त
त्तु देवादयो वा सर्वज्ञा महांतस्तेभ्यः संशयं छेत्स्यंतीति प्रष्टव्या इत्याशंक्याह त्वदन्य इति अहमादिर्हि दे

157

कुतोऽस्यादिति चेदुच्यते संन्यासाद्ब्रह्मणः स्थानमिति संन्यासस्य ब्रह्मस्थानफलं समर्पितेन हि हि तत्संन्यासस्य वाक्येति
दिशा संन्यासस्य वा उतोऽपसंन्यासस्य वा नाद्यः नेतस्य मारणाऽउत्क्रामतीति विरुद्धः श्रोतोत्क्रमणाभावश्रव
णात्तेनोक्तं कसंन्यासफलत्वानुपपत्तेः न द्वितीयः विविदिषासंन्यासस्य श्रवणाद्यर्थसिद्ध्यैकफलत्वात्तु नः
फलांतरकल्पनायोगात् पारिशेष्यादापत्संन्यासस्यैव ब्रह्मलोकफलकमिति स्वीकार्यते नैतत्समर्पिते आप
द्यपि चकुर्वीत संन्यासं प्राप्ते मरणोत्तमः पदेतु छोन मात्रेण मप्राप्तिब्रह्मणः पदमिति अतः संन्यासाद्ब्रह्मणः स्था
नमित्यादि स्मृतिवाक्यानामापत्संन्यासविषयत्वेन सार्थकता नैकदाचिदप्यनुपपत्तिः ननु आपदि संन्यस्यापि
पुनर्जीवितो विवेकी श्रवणादिना ज्ञानं संपाद्य मुक्तो भवति किं यमापत्संन्यासस्य ब्रह्मलोकेकफलत्वमिति चे
दुच्यते जन्मांतरेषु सेकृपासंन्यस्य श्रवणं कृतवतोऽस्य प्रतिबंधवशान्न ज्ञानानुत्पत्तौ पुनरत्रापि जन्मना
पद्युपदेशेन पूर्वसंस्कारवशात् संन्यस्य कृत्वा मत्वा च ज्ञानेनाप्युक्तो भवती समेवार्थं श्रीभगवानपि वृ
ष्णोति शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इत्यादिना ततो नैकश्चिद्दत्र विरोधः ननु मात्ययोगसंसि
द्धेरपि योगिनोपतेः संन्यासस्य श्रवणाद्युपकारकत्वेऽपि भिक्षाटनं जपः शौचं स्नानं ध्यानं सुरार्चनं कर्तव्यानि
षडेतानि यतीनां नृपदंडवत् तथा शास्त्रोपनिषदो नामित्यादि स्मृत्युक्तमंत्रजपस्नानसुरार्चनादि कर्तव्यकर्म
णः स्वर्गादिहेतोः संभवात्तस्य वक्तव्यात्पुण्यलोकइति चेन्न स्नानमंत्रजपादेर्भेदस्यापघटितत्वेन विपरीतभाव
हेतुत्वात् ब्रह्मविविदिषयपरतानुपपत्तेः नैताहशं प्राप्तस्य साक्षिविज्ञउपरमः क्रियाभ्यः नैव धर्मी न चाधर्मी

श्री०टी० २१

तेः कश्चिद्दुष्कर्मेव कर्म्ब्योगभ्रंशे सत्यपि ब्रह्मविदरहाप्यमुत्रापि न कश्चिदनर्थोऽस्तीति बोधयन्तु श्रीभगवानुवाच पा
र्थ नैवेह नामुत्र विनाशस्तस्य विद्यते न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ४० स्वदत्तो ब्रह्मविद्यार्थी शिष्य
प्रशिष्यपद्मापत्नतोनि विसारयतीति तातेत्यस्य संबुद्धिर्हे तात स पार्थ तस्य समाधिनिष्ठापीमत्तयत्नेस्य संन्यासकृ
तसत्यस्यामदृष्टदमाद्युत्तमतपोविशिष्टस्य ब्रह्मचर्याऽहिंसादिविशिष्टधर्मेवतोपायिनोपतेर्ह्युक्तमेवशाट्
स्यमार्गेषुमुतलोपिर्हास्मिंल्लोके विनाशोहानिः शिष्टगर्हामात्रं प्रतिष्ठाभंगलक्षणो नैवास्ति ब्रह्मनिष्ठापात्र
ह्याबलादिविशिष्टगुणवत्त्वाद्ब्रह्मचर्याद्युत्तमधर्मवत्त्वाच्छिष्टनिंदाऽप्रसक्तेर्नहि दुष्कर्मणापि तैरधास्ति क
श्चिदुपद्रवो विघ्नतः स्वधर्मनिष्ठस्य एषं शिष्टानिंदितुमर्हंतीयथा विधिनापाकस्य एवकेस्मालोप्रविश्याग्निसोमी
पानकृतस्य यज्ञकर्मणो देवास्सति विघ्नपगमानमास्यावं तं श्रोत्रियानानिंद्रितुमर्हंतीति हृदत्तो नैवास्यामुष्यान्न
प्रतिष्ठाभंगलक्षणो नाशस्तथैवामुत्र परस्मिन्नपि लोके पितृश्राद्धयोनिदुर्गतिनास्तिलक्षणो नास्ति कल्याणकृ
त्त्वादमुष्यपतेः न हि कल्याणकृच्छुभकृत्कश्चिन्नरकपोद्वगति निरगच्छति किंतु स्वर्गतिमेव गच्छति तथाच
स्मृतिः तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रियोनिं वा
वैश्ययोनिं वेति पद्माअतिकल्याणरूपत्वान्नित्यकल्याणसंपन्नयात स्मनेगत्वमवस्तत्त्वाद् ब्रह्मणस्तेन मंगलं वि
दुरिति मंगलानां च मंगलमिति पवित्रं मंगलं परमिति कस्य ब्रह्मणो मंगलस्वरूपत्वस्मरणात्कल्याणां
मंगलस्वरूपब्रह्मतरोति स्वात्मनासाक्षाद्विज्ञानातीति कल्याणकृत्ब्रह्मवित्कश्चिद्ब्राह्मणो वा क्षत्रियो वा
ऽन्यो वा योगभ्रंशमाप्य दुर्गतिं निरयं नरकं तिर्यग्भ्रमणं वा शिष्टमितिप्रसिद्धिद्योतनार्थो हि शब्दः नतु

158

वाचांमहर्षीणांच सर्वेश इतिवचनात्तमेवदेवानांऋषीणांचादिः सर्वज्ञस्तत्तोन्यस्तद्दन्योदेवोवाऋषिर्वायःकश्चिद्
प्यस्यसंशयस्यछेत्तानिवर्जकोनोपपद्यतेनसंभवतीत्यर्थः मेधावीछिन्नसंशयइतिसर्वसंशयछेत्तत्वंतेनवशा
स्त्रप्रसिद्धमितिप्रसिद्धिद्योतनार्थोहिशब्दः ॥ ३१ ॥ न्यासइतिब्रह्मा ब्रह्माहिपरःपरोहिब्रह्मातानिवाएतान्यवराणि
तपांसिन्यासएवात्यरेचयदिति संन्यासस्यब्रह्मरूपत्वंसर्वतपोभ्यश्चवरिष्ठत्वंश्रूयते तथैव वेदांतविज्ञानसु
निश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्वाइतिसंन्यासयोगवतांयतीनांशुद्धसत्वत्वेदांतार्थविज्ञानत्वंचश्रूय
ते ऋतंतपःसत्यंतपःश्रुतंतपःशांतंतपति शमेनशांताःशिवमाचरंति शमेननाकंमुनयोन्वविंदन्नन्तस्माच्छमं
परमंवदंति दमेनदांताःकिल्बिषमवधून्वंतिदमेनब्रह्मचारिणःसुवरगच्छन् दमोभूतानांदुराधर्षंसत्यंपरंप
रंसत्यंसत्येननसुवर्गाल्लोकाच्यवंतेकदाचन सतांहिसत्यमित्यादिनावाक्यजातेनऋतसत्यश्रुतशांतादी
नांमुमुक्षुधर्माणांश्रेष्ठत्वात्तपस्त्वमुच्यते मानसंवैप्राजापत्यमिति मनसश्चेंद्रियाणांचैकाग्र्यंपरमंतपइति
अश्वमेधसहस्राणिवाजपेयशतानिच एकेनध्यानयोगेनकलांनार्हतिषोडशीमितिसमाधेःपरमतपस्त्व
श्रूयतेस्मर्यतेच अथयद्यज्ञइत्याचक्षतेब्रह्मचर्यमेवब्रह्मलोकंनिगच्छंतिब्रह्मचर्येकनिष्ठा अहिंसा
परमोधर्मोयपापात्त्रिविष्टपमिति तपसामपिसर्वेषांवैराग्यंपरमंतपइति सत्यंतीर्थंक्षमातीर्थंतीर्थमि
द्रियनिग्रहः सर्वभूतदयातीर्थंतीर्थमार्जवमेवचेति ब्रह्मचर्यादीनांमुमुक्षुधर्माणांपरमतपस्त्वश्रूयतेस्मर्य
तेच विघ्ननिहंतयोगानांजरामरणवीतहव्यादीनांजन्मांतरयोगप्रारंभतत्वविच्छिन्नरागादिभिःसिद्ध
एवंनिस्तत्वलक्षणोः संन्यासऋतंतपइत्यादिमंत्रोक्ततपोभ्योब्रह्मचर्यादितपोभ्यश्चअधिकइतिविशिष्टसपोगिनोय

प्रज्ञां कुर्वीत ब्राह्मण इति तमेवैकं विजानथ आत्मानमन्या वाचो विमुंचथेत्यन्याभिः श्रुतिभिरात्मानं विज्ञाय वेत्ता
मेव ओमित्येवं ध्यायथ आत्मानमिति चात्मध्यानं विदधाति श्रुतिः न चात्मविदः किमर्थं ध्यानं समाधिर्वेति न मंतव्यं
ध्यानसमाध्योरात्मतत्त्वज्ञानाऽप्रतिबंधत्वहेतुत्वात्सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्मत्वमात्रं न विज्ञानं ब्र
ह्मरूपेणात्मतत्त्वज्ञानं चाप्रतिबद्धं श्रुतिमात्रेण न सिध्यति विना ध्यानसमाधिभ्यां समाहितो भूत्वात्मन्येवात्मा
नं पश्यति सर्वमात्मानं पश्यतीति श्रुतिर्ब्रह्मविदो ब्रह्मरूपेणात्मतत्त्वविज्ञानस्याप्रतिबद्धत्वसिद्धये सा वा न्या सिद्धये
च समाधिं विदधाति श्रुतिरतो ब्रह्मविदोऽप्रतिबद्धज्ञानसिद्धये निदिध्यासादिरवश्यं कर्तव्य इति सिद्धं ॥ ४० ॥ उ
क्तरीत्या समाधिं कृतवतोऽब्रह्मविदो दुष्कृतमेव नास्ति समाधिविभ्रमतिमतस्य पतने दुर्गतिर्नास्ति किंतु सद्गतिरेवेत्याह
प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥ योगमार्गे प्रवृत्तो
ब्रह्मविद्योतिरमानयोगसंसिद्धिः सन्मृत्वा वाजिमेधसहस्राणि राजसूयशतानि च वाजपेयसहस्राणि अश्वमे
धशतानि च एकेन ध्यानयोगेन तुलां नार्हंतीति श्रुतिः मनसश्चेंद्रियाणां चाप्येकाग्र्यं परमं तप इत्यश्वमेधा
दिक्रतुकोटिभ्यो ध्यानयोगस्य श्रेष्ठत्वात्तस्य महत्पुण्यकर्मत्वमत एव तत्त्वतश्चतुःपुण्यकर्ममहिम्ने
वस्य पुण्यकृतामश्वमेधादिमहाक्रतुकारिणां महोत्सवलोकान्प्राप्य तत्र शाश्वतीः बह्वीः समाः संवत्सरा
नुषित्वा तत्र सुखभोगाननुभूयेत्यर्थः तद्भोगसमयेषु नरेहलोके शुचीनां योनिबीजकर्मादिशुद्धिमतां श्रीमतां भा
ग्यवतां च महात्मनां गेहे वंशे योगभ्रष्टोऽभिजायते समुत्पन्नो भवति ननु कर्मभ्रष्टः कस्मिन् सुतिकर्मभ्रंशे पुण्यलोक

गी०टी०
२२

159

श्रम०

ध्यानयोगादौ प्रवृत्तो यो यतिः स ब्रह्मविदेव न भवतीति तस्य ब्रह्मवित्त्वे ध्यानाभ्यासक्लिप्तायोगात् ध्यानयोगाभ्या
सोपि स्वाध्यायाभ्यासवत् क्लिप्येव न भवतीति तस्य कार्यं न विद्यत इति नैवास्ति किं चित्कर्तव्यमिति च ब्रह्मविदः कर्त
व्याभावस्मरणादिति चेन्न तत् नास्त्येव कर्तव्यं ब्रह्मविदः कृतकृत्यस्य पुरुषस्य तु रूपवदिह रतो ब्रह्मोपल
ब्धिस्तथापि भवान् प्रष्टव्यः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति मुमुक्षोः केनोप
लेन निदिध्यासाः स्वरूपेण साक्षात्कृतश्रवणस्य किं स्वकृतश्रवणस्य वा नाद्वितीयः वेदान्तार्थविचारस्य स्वात्मा
नात्मविवेकविभागज्ञानाभावात् निदिध्यासानुपपत्तेः आद्यः श्रवणादिना विज्ञातात्मतत्त्वस्य वा उत अविज्ञा
तात्मतत्त्वस्येति नाद्वितीयः अविज्ञातात्मतत्त्वस्य निदिध्यासायोगात् निदिध्यासो नाम विजातीयप्रत्ययति
रस्कारपूर्वकः सजातीयप्रत्ययावृत्तिः स खलु सैषा संप्रतिपादितात्मतत्त्वस्यैव सिध्यति नेतरस्य यथा तत्त्वम
स्य पस्य विजातीयः पटस्तस्य पट इति ज्ञानं घटस्य स्ययोः स्वस्वलक्षणं विजानत एव सिध्यति हि ज्ञातं चैतयोः
सदृशं नैकतन्त्वेन एवं सिध्यति नान्यस्य न हि देहात्मप्रत्ययानां म नात्मप्रत्यया विजातीया इति ज्ञानमात्मानात्म
नोः स्वरूपलक्षणं विज्ञातवत एव सिध्यतीति तादृक् विज्ञानं तु तस्य साक्षात्कारवत एव सिध्यति नेतरस्य न हि
कश्चिद् दृष्टपूर्वदृष्टगजादि [illegible] पितुः शक्नोति यथा पितृतेषाम् पितामहं वा तद्वदविज्ञातात्मत
त्वस्तदनुभवस्य [illegible] नहि कश्चिद् दृष्टात्मवदानात्मानं भावयितुं न शक्नोति स्वानुभवाभावात् ततो नात्मवत्त्वदिति सि
तत्त्वेन आत्मस्वरूपं सम्यगिति निदिध्यासनमात्रविश्वं केनोपयोगो भवति तमेव धीरो विज्ञा

एकदेशिपक्षः=१

गी० हि०
२३

ति नन्वेवं योगिनामेव ज्ञानिनां गृहे धीमतां कुले भवतीति पदद्वयमुक्तं तन्नोपपद्यते गृहीणां प्रत्यवेदनाः संभवात् ज्ञानो
त्पत्तेः शमदमवैराग्यसंन्यासाद्यसाधनसम्पन्नानां विविदिषूणां तेषां श्रवणादिना ज्ञानमपरोक्षं संन्यासे भवति
विनाश्यति तत्रापि परमहंसात् तदुक्तं श्रुत्यात्मैकत्वविज्ञानं वेदान्तश्रवणादिना जायते परमहंसस्य यतेर्मु
ख्याधिकारिणः नाश्रमान्तरनिष्ठस्येति तस्मात् योगिनां ज्ञानाभावे कुतो योगानिष्ठेति चेत् हि धीमतां कर्मशा
स्त्रार्थज्ञानवतां योगिनां कर्मयोगिनां कुले भवतीति भ्रम इति चेन्न तथात्वे जन्मनो दुर्लभतरत्वाऽभा
वप्रसंगात् श्रोत्रियकुलाभिजननस्य सुलभत्वाभावसापातेऽपि सुलभत्वं तत्तैः श्रोत्रियकुलस्याभि
जायते रमणीयचरणा रमणीयां योनिमापद्येरन्निति श्रुतेः ततो जन्मनो दुर्लभतरत्वानुपपत्तिरिति मन्तव्यम् अथो
पेक्ष्य गृहीणामपि केषांचिदाश्रमसादवतां मुमुक्षूणां ज्ञाने ज्ञानयोगित्वं चाभ्युपगन्तव्यम् अन्यथा वसिष्ठ
गस्त्यादीनां जनकाश्वपत्यादीनां च ब्राह्मणक्षत्रियाणां चाधुनिकानां च वाचस्पतिखण्डनकारादीनामनात्मज्ञत्वप्रसंगात्
तद्धेयात इति सर्वव्याख्यातृसंमतस्ववित्तश्रवणसाधनवैधुर्येऽपि श्रवणादिना ज्ञाने सिद्धे वैयर्थ्यं स्यान्न चे
कं स्यादिति चेन्न तेषामपि जन्मान्तरे शमदमसंन्यासादिसाधनवत्त्वस्यान्यत्र ज्ञानेनानुमीयमानत्वाद् यथा शुक
स्यार्थवत्त्वोपपत्तेः न च शमदमसंन्यासाद्युत्तमसाधनं विना श्रवणादिजन्यज्ञानेन न तेषां तत्त्वैव मुक्तिसिद्धेः इति न
जैनिकथा कुत इति वाच्यं तादृक्साधनसंपन्नानामपि तेषां शरीरं बुद्ध्वा प्रारब्धस्य कृत्ता ज्ञानानुत्पत्तेर्मोक्षासंभवाज्ज
न्मान्तरेऽनुगम्यते तत्रासम्यक् ज्ञाने योगनिष्ठा च परमोपशान्तिरपि संभवति क्रमात्तेषामपि जायत इति स्मृतिवा

मुख्यपूर्वपक्षः

सिद्धान्तः

160

रामं०

प्राप्तिः शुचिनां श्रीमतां गृहे गेहे ऽभिजननं च न संभवति नैष पाक कल्पांतं तथैव कस्मै राः फलाक्ष स्वं भावितानि यमानं नतयो
योगस्य तत्स्य देवता दर्शने वद्यो वद्याव द्योगानुष्ठानं तावत्तावत्फल वेद्य वतितेतस्य वयोग भ्रंशो दिवो नि नः पुण्यकृतां लो
कान्प्राप्तिः शुचिनां श्रीमतां सकलसंपत्तिश्रीमतः ॥ ४१ मनोहराणां भोज्यानां युवतीनां च वासं सा चित्तस्यापि च सा
न्निध्यात्सवलचित्ततामपि तत्स्मात्त्वयि अंततः त्यक्तामुमुक्षुर्दत्तो वसेदिति न्यायेन नदि यवमात्रानि ध्वस्येव विक्षेपक
त्वेभ्रीमत् गेहे समुत्पन्नस्य तस्योत्तमं भक्तस्य योगिनो विषयभोगानुष्ठानेऽनागगहे पादिमि मेनः सौ से विनाश नेति
वेत् वैराग्यादि विज्ञानयोगमूत्सिंधनेस्य सतीतियोगभ्रष्टः कालव्यवधानमसहमानः सन्नाह अथवा योगि
नामेव कुले भवति धीमतां एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ४२ अथवा श्रीमद्गृहे लक्षणानां दारिद्र्याणां शु
चीनां धीमतामेव योगिनां कुले भवति जायते यद्वा योगी ब्राह्मविन्न तिकालेपादेमानंतमेवयथा ध्यंदयोवि व
यभोगेच्छा वेगवाहनदा पुण्यकृतां लोकान् अनुभूय पश्चादानुरूप्ये श्रीमतां गेहे अभिजायते यदि हृदये चित्तशोधक
सकलमेवि शेषवशात्तीव्रमोक्षेच्छा वैराग्यवेगस्तदा सयोगी अथवा अथ शब्द आनंतर्यार्थः वा शब्दो ऽवधारणा
र्थः अयं च वदेहपातानंतरमेव धीमतां तानि नानित्रापि योगिनां तानपोगनिष्ठानामेव कुले भवति संभवतीत्यर्थः
ईदृशं तद्धे राग्य मोक्षेच्छा वेगानुरूपं ब्रह्मनिष्ठानामेव तानि नां कुले सम नंतरमाविर्भवज्जन्मतदेतद्दुर्लभतरं
हि एतत्स्यैत दुर्लभं खलु गृहीणां त्वानित्वं कुले भंनत्रापितांह स्यानां ब्रह्मनिष्ठानामेव कुले लोकान्तरं योऽन्यतस्मग
तो कालव्यवधानं विना प्रज्ञे न नेदृशं भवतस्मे वमहत्तरेण तपसा लभ्यं भवति न लसे नातत एवोच्यते दुर्लभतरमि

गी०टी०
२४

देवसमीचीनो योगो मुक्तिसिद्धौ परमोपायः तं बुद्धिसंयोगं ज्ञानयोगं लभते प्राक्तन अन्ये वा तु बद्धतास्तस्य सोऽयं देहे
नैवास्मकाले न प्राप्तोऽतीतस्यार्थः एतावन्मात्रेण उपमानकृतार्थो न भवति ज्ञानस्य संभवस्य संपादने न विनाततो मुमु
क्षोः स्वयं दवश्यं संपादनीयमिति सूचयितुमाह यततेऽति ततः पित्रादेः ज्ञानयोगं लब्ध्वानंतरं संसिद्धौ ज्ञानस्य सम्य
क्संसिद्धिनिमित्तं भूयः पुनरस्मिन् जन्मनि पिपतते च भूयस्त्वमपि करोति यहात तस्माद्देवसंस्कारवेगादेव
यो अधिकतरं यतते तेन ज्ञानस्याप्तिर्बहुत्वसिद्धये एवं वन्निपमेनगुरूपदिष्टरीत्या नित्यं निरंतरं च समाधिकरो
तीत्यर्थः ४३ निःसंगस्य साधनेऽनुष्ठाने कारणमाह पूर्वाभ्यासेनेति वहि पते ह्यवशोऽपि सः जिज्ञासुरपि यो
गस्य शब्दब्रह्मातिवर्तते ४४ हिंसात्मकारणमाह वाभ्यासेन एवंस्मिन् जन्मनि प्रयतते प्रेमेक्षेच्छुया अ
नंतवैराग्येण चिरकालं नित्यं निरंतरं च नियमेन कृतो योऽभ्यासः संततसमाध्याह जितस्तेनैव संस्कारात्म नाबु
द्धिस्थेनाभ्यासवेगेन सर्वाणि कर्माणि विधिनात्याजयित्वा सपोगस्थो यतिः स्वयमेव योग्यनिष्ठत्वं विहि प
तेबलात्कारेण योगनिष्ठायामेव स्थाप्यते न तु कर्मनिष्ठायां नेव विषयभोगनिष्ठायां च तस्माद्देवसंसिद्धिनिमि
त्तं भूयः एवं स्मादधिकतरं यततेवेति एवं राग्यव्ययः न त्वहरहः संध्यामुपासीत उदिते सूर्ये प्रातर्जुहोति द
र्शपौर्णमासाभ्यां यजेत पावज्जीवमग्निहोत्रं जुहोति श्रौतेचोपितथा स्मार्तकर्मालयं वसंतद्विजः तेहिहि रा०म०
नः पतत्येव ह्यालंबरहितां धवदित्यादिश्रुतिस्मृतिपदे शमनाहस्यैव ब्राह्मणः सनुश्रौतस्मार्तचकर्मसर्वसंन्य
स्यायं कष्टं योगनिष्ठायामेव प्रवर्ततेऽतस्तपांकापां जन्मांतरसहस्रेषु बुद्धियाभाविता परा तामेवभजते जेतुरूपदे

|6|

त्सरे पात्रे मातापित्रमन्नमाहाजन्मक्रमाहाचित्तपरियाकृक्रमाहाजस्याप्याश्रमां नरवतोपितानेजापतन इत्यर्थः
तर्हि तेषां मुस्योनभ्रसंगादितितत्राह विषयानुभावक कर्मरागमुयानिरोधसंभवात्रिरंतरब्रह्मनिष्ठानांनि
त्सानेदाम्नतरसयापि नांतेषां मेन्नासभाध्याभावाच्च तर्हि विषयानुभवते ब्रह्मानुभवते श्वपरस्परविरोधादेकापि
करणत्वानुपपत्तिरितित्तत्राह तद्व्यासविषयानुभवे रागाभावेनसत्पात्रैर्वनिद्ध्यानेत्वोपपत्तेस्तर्हि अवहारलो
पप्रसंगइतिचेन्न केचिद्धिपतेक्कचिद्धक्षिपतेनेनतेषां सर्वेसिध्यानत्वदर्शिनोभन्नवापाद्यनयोभावात् शौचमा
चमनस्नानेनतुचोदनयाचरेत् अन्यांश्चनियमानुगतानिपयाहेलीलपेस्वरतिज्ञानिनामीश्वरवद्धि तत्रिप
ममंगदोषाद्यभावस्मरणात् शिलोञ्छवृत्त्यापरितुष्टचित्तो धर्मं महांतं विरजं जुषाणः मय्यर्पितात्मा गृह एव
तिष्ठन्नातिप्रसक्तः समुपैति शांतिमित्यादिवचनप्रामाण्यात् तस्मात्कोऽस्मिन्र्याकेज्ञानिहि विषयः कृष्णदी
रप्रसादपात्रीभूतो गृहस्थो पितानीतानपांगीन संभवति यतस्ततो तानिनामेव योगिनां गृहे तां गृहे योगभ्र
ष्टस्य मुमुक्षुयोगसिद्धये जन्मांगीकर्तव्यमित्येवार्थस्पष्टमितुमाह तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च
ततो भूयः संसिद्धौ कुरुनंदन ४३ तत्र ज्ञानवतां योगिनां कुले जन्म लब्ध्वा स योगी पौर्वदेहिकं पूर्वस्मिन्देहे भवं यो
वेदे हिकं पूर्वजन्मनि अनुष्ठितश्रवणादिसंभवतानिनायो गवताच पित्रादिनोपदिष्टं तं बुद्धिसंयोगं पदुमेवान्
पिताभवतितमेवधमंपुत्राणोपदिशति आपेरातनादितलोकप्रसिद्धं पश्चाद्देहजन्मन्यनुष्ठितत्वाद्गृहीतेदेवलीना
त्मना स्थितः प्रत्यविदापित्रोवदांतवाक्येर्षं मोह्येन तां तुद्धिं तं योगं बुद्धिसंयोगं तेजान्रावृत्तकालमेवदनतेसाना

शेषचितसुखवासनया नानान्यार्थकामकर्मफलः अनेकजन्मसंसिद्धः अनेकेषु जन्मसु उपचितज्ञानाधिकरणत्वाये
१०९० नबहुवचनस्य त्रित्वपर्यवसानादेकाह्नि त्रिचतुर्जन्मसु संसिद्धः संसिद्धिः सम्यग्दर्शनं तद्वान् संसिद्धः अभिवृद्धविज्ञानो निःशेष
२५ वृजिनमेदम्नाद्ययोग्यत्वात्ततस्तेन सम्यग्दर्शनेनैव परां परमपुरुषार्थभूतां गतिं सात्म्यनाऽस्मि मत इति गतिः स्वस्वरू
पभूता परमात्मस्थाता विदेहमुक्तिप्राप्ति निर्विशेषनित्यप्रबुद्धबुद्धमुक्तसत्यपरमानन्ददातृत्वात् ब्रह्मात्मना स्वेन रू
पेणावतिष्ठतीत्यर्थः एतेन तीव्रमोक्षेच्छोर्यतेः श्रवणमनननिदिध्यासनसमाधिपरिपाकेण नैव काशेनाधिकान्तरप्र
पत्तेन भवितव्यमत्यल्पयत्नस्यनुविरतेरेणौ वकालेन मुक्तिरिति सूचितं भवति ४५ यतः शमदमसंन्यासाद्युत्तम
162 साधनसंपत्तिमतः पितृत्वरूपत्वसमनुष्ठितसमाधिनिष्ठासंभावितत्वादेव विज्ञानवतैव योगिनामभ्यासो भवति
मोक्षस्ततः तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६
तपस्विनस्तापसाः कृच्छ्रचान्द्रायणादिपञ्चाग्निमध्यस्थानादिनियो निरतास्तेभ्यो योगी उक्तलक्षणो
ब्रह्मविद्यातिरधिको भवति तपसा केवलस्य देहेन्द्रियशोधनमात्रं ते तपसः पापनिवृत्त्येकप्रयोजनवत्त्वेनाल्पफल
त्वात्तेभ्योऽल्पप्रयोजनवद्भ्यः प्राजापत्यादिलोकगामिभ्यो ज्ञाननिष्ठापादनद्वारेण तिनिमुक्तविदेहमुक्तिप्रय
णामी ब्रह्मविद्धि तस्मोऽधिको भवतीत्यर्थः ज्ञानिभ्यो मीमांसादिशास्त्रार्थविद्भ्योऽधिकज्ञानो मतः ते शा रम०
शास्त्रार्थज्ञानस्य धर्मानुष्ठानानुष्ठापनैकप्रयोजनत्वेनाल्पफलकत्वात् यद्यपि पक्षतुल्याकुतेन वा
वेपक्षतुमीमांसते गिरं नानुष्ठापयति कर्मणो यत्तद्धि पावनं पावनानीति तेषां पुनरप्येक कर्मत्वं पावकत्वं च विद्यते

योभ्रिरर्थक इति न्याये नजन्मांतरे कर्मी चेत्कर्मरतो धर्मी चेद्धर्मरतः पापी चेत्पापरतो भक्तो भक्तिरतो ज्ञानी चे
ज्ज्ञानरतो योगी चेद्योगरतो भवति स्वस्य संस्कारानुरूपेण नैवोपदेशनमपेक्षते विना संस्कारेणाजन्मतः
ऐवापमपि वेदशास्त्रादिकं सर्वमधीत्य तदर्थं च विचार्य न कर्माणि भजे ये तादृक्षतिवा क्षेत्रः कर्मणो मो
क्षः सा धनत्वेन निश्चित्य प्राक्तनज्ञानयोगाभ्याससंस्कारवेगात्कर्मवैदिकं च सर्वं संन्यस्य ब्रह्मनिष्ठायामेव तिष्ठ
तीति किमु वक्तव्यं मुमुक्षुरपि सर्वं कर्म संन्यस्य श्रवणादावेव वर्त्तत इत्याह जिज्ञासुरपि योगस्य श्रवणा
दिसंजातविज्ञानवानेव योगिनः स्वभावं ब्रह्मभावं योजयति गमयतीति योगो निर्विशेषः परमात्मा यद्ब्रह्म तस्य
योगस्य जिज्ञासुस्तत्स्वरूपं ज्ञातुमिच्छुर्जिज्ञासुर्मुमुक्षुरपि मोक्षकामनया शब्दब्रह्म वेदमतिवर्तते वेदोक्तं
त्प्रतिपाद्यं कर्म चातिवर्तते एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति वेदानिमं लोकममुं च परित्यज्यात्मा
नमन्विच्छेदित्यादिश्रुतिभ्यस्त्रिबलाज्जिज्ञासुरपि वेदवेदोक्तकर्म च सर्वं संन्यस्य श्रवणादावेव प्रवर्तत
इत्यर्थः ४४ योगनिष्ठस्य तीव्रमोक्षेच्छावैराग्याभ्यां कृताधिकतरप्रयत्नस्य यतेः फलमाह प्रयत्नाद्यतमान
स्तु योगी संशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिं ४५ प्रयत्नात्समाधौ प्रकृष्टो यत्नः प्रयत्न
स्तस्मात्तं सिद्धेर्यतमानः सत्वरं तपांसि निरंतरं च नियमेन समाधिनिष्ठां कुर्वाणस्तु कालांतरफलासिद्धे
र्मंदप्रयत्नाद्धि सोऽपि नैव स्यात् वर्त्तेपि तु तु प्रारब्धः प्रकृष्टप्रयत्नतीव्रमोक्षेच्छु योगी ब्रह्मविद्याग्निः संशुद्धकिल्बिषः नि
रंतरसमाधिनिष्ठया सम्य [illegible] शोधितनिर्यापितं किल्बिषं ज्ञानेन [illegible] मलं येन सः संशुद्धकिल्बिषः निः

शेषनिवृत्तिरक्षिवानवेत्यादिलक्षणं संदेहं ज्ञानासिना ज्ञानं ब्रह्मैवाहमिति तस्यानिर्विकारे द्वितीयपरे ब्रह्म
रोपवात्मप्रत्ययोऽप्रतिबद्धं तदेवासिस्तेनैनं निरुक्तलक्षणं संशयमात्मना पराकं छित्त्वोत्तिष्ठ स्यायपयोगं क
र्मयोगमातिष्ठ समाचरस्तु ध्यस्वेत्यर्थः ४२ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशंकरानंदसरस्वतिकृ
तो गीतातात्पर्यबोधिन्यां चतुर्थोऽध्यायः ४ श्री संवत् १८ ७० आषाढ [illegible] ॥ ॥

128.

रा०म०
८५

धनुर्ष पत्र २०

गी० टी०
२

179

श्रेवास्तत्कथं श्रेवेति संशयापन्नोस्त्वां शरणं गतस्य मम श्रमापनयाय भवान् दयया मह्यं ज्ञानं तु मोहनायेत्यापि विवेक
विकलस्याज्ञानात्मनो मम भवद्वचनं व्यामिश्रमिवभातीति तेन व्यामिश्रवाक्येन मम बुद्धिं मोहयसीव प्रतीयते तदपि म
म बुद्धिदोषएवेति भावः तर्हीदानीं किं कर्तव्यमित्यत आह तदेकमिति ज्ञानकर्मणोः क्रियाकारकफलभेदेन वि
परीतयोरेककर्तृकत्वाऽसंभवात्तयोरेकं ज्ञानं वा कर्म वा मदधिकारानुरूपं तत्र मम योग्यत्वमयोग्यत्वं च विचार्य इद
मेवास्याहमिति निश्चित्य वद येन ज्ञानेन वा कर्मणा वा तयोरेकतरेणाऽहं साक्षात्परंपरया वा श्रेयः परमपुरु
षार्थमाप्नुयां इत्यपायपद्धतेस्तत्त्वं नैवायं बुद्धिदोषस्तदा यदुक्तं तत्त्वयाने ज्ञातं विद्याबुद्धिस [illegible] वस्यादौ विना
येमारोलत्वकर्मण्येवाधिकारो न तु संन्यासे तत्र एवोक्तं मया कर्मण्येवाधिकारस्ते इति तथापि चित्तशुद्धिद्वारा ज्ञा
नेपि छेकर्म कुरु न तु फलायेति सर्वयितुं बुद्धौ शरणमन्विच्छ कृपणाः फलहेतव इत्युक्तं न तु कर्मस्वरूपबुद्धिमा
श्रयेत्युक्तं नाप्युभयं च कुर्विति ज्ञानकर्मणोरेनस्य स्वरूपेण स्यात्समवायविरुद्धत्वेन कर्तृत्वे नैकपुरुषानुष्ठेयत्वायो
गात् इदं पूर्वमेव स्पष्टितं एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणुवित्ति तदेवं पुनरुच्यते स्पष्टतामिति शय्येन श्री
भगवानुवाच लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ३
अस्मिन् लोके ब्राह्मणादीनां स्वधर्मपराणां मुमुक्षूणां पुरा पूर्वकाले मया वेदरूपिणा सर्वज्ञेन सर्वधर्मोप
देष्टा द्विविधा द्विप्रकारा निष्ठा शास्त्रीयस्यानुष्ठेयस्य धर्मस्य सांकर्येण यातयाति यमेन स्थितिः प्रोक्ता प्रतिपादिताऽनने
[illegible]

तः

रा०म०
४८

रिणामन्य या कृत्वा पतिष्यंतीति ज्ञानकर्मयोगयोरधिकारिभेदेन भेद एवेति तयोर्विभागं दर्शयितुं चान
धिकारिणां कर्मैव चित्तशुद्धिद्वारेण मोक्षसाधनं तदेवावश्यं कर्तव्यमिति बोधयितुं च तृतीयाध्याय आरभ्य
ते तत्रादौ कर्मण्येवाधिकारस्ते मा फलेषु कदाचनेति न च कर्मण्येवाधिकारो नान्यत्रेत्यवधारणं एवं कर्मेति
धाय दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छेति ज्ञानयोगात्कर्मयोगो निकृष्ट उक्तो ज्ञा
नयोग एवाश्रयेति ज्ञानयोगविधानाच्चोभयेनाकुलीभूतांतःकरणः सन्नर्जुनः स्वयं दूरेण ह्यवरं कर्मे
ति वचनात् धर्मेकस्मिन्निति धापककर्मयोगात् ज्ञानयोगस्य साक्षान्मोक्षसाधनत्वेन विशिष्टत्वं म
न्यमान इदमुवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केश
व १ जनं जननं तत्कारणमज्ञानं च स्वसाक्षात्कारेणार्दयति हिनस्तीति जनार्दनस्तस्य संबुद्धिर्हे जनार्द
न कर्मणः कर्मयोगात् बुद्धिर्ज्ञानयोग एव ज्यायसी श्रेष्ठेति ते मताऽभिमता चेत्तर्हि किमर्थं कर्मण्येवाधि
कारस्ते इति मां कर्मणि ज्ञानान्निकृष्टे नियोजयसि तत्रापि घोरे हिंसात्मके तस्माद्युध्यस्व भारतेति
चोदयसि भवानीव्यक्तवचनमत्यंतं प्रेमां भक्तमनुरक्तं च योग्यमेवार्थं त्याजयित्वाऽयोग्यार्थे प्रवर्तय
सीत्यर्थः किं च व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयां २ कर्मण्ये
वाधिकारस्ते इति बुद्धौ शरणमन्विच्छेति चैवं लक्षणेन व्यामिश्रेणेव क्षीरनीरयोरिव द्वयोर्मेलनं व्यामि
श्रं तेनेव वाक्येन कर्मणोः समुच्चयवदेव वाक्येन बुद्धिं मोहयसीव मेऽतःकरणमिति नियोजयसि यद्यपि दुर्ज्ञा

त्त्वशुद्धिं विना ज्ञानं नोदेतीति सत्त्वशुद्धिश्च प्रागलरागा विविदिषन्ति यज्ञेन दानेनेति श्रवणाद्यज्ञदानादिसत्कर्मानुष्ठि
तेर्विना न सिध्यत्यतो मुमुक्षोरनुसन्धानात्मज्ञानस्यापि स्वयं चित्तशुध्यर्थं कर्म कर्तव्यमन्यथा मोक्षो न सिध्यती
त्याह न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति ४ नित्यानां कर्मणामग्नि
होत्रादीनामनारंभादकरणाद्रागान्नैष्कर्म्यं नायं कर्मेतत्त्रिक्षमेवायं निष्फलं निष्क्रियमिति श्रुतेः तस्य भावो नैष्कर्म्यं नि
ष्क्रियं ब्रह्मात्मनावस्थानलक्षणं मुक्तिं पुरुषो नाश्नुते उपायाभावात् तस्य सेवोपायापेक्षितत्वात् यत उपायभूतानां
कर्मणामननुष्ठानादुपेयभूतं ज्ञानं न स्फलं च नैष्कर्म्यं पुरुषस्य न सिध्यत्यतो मुमुक्षोरीश्वरार्पणबुध्या नित्यनैमि
त्तिकं च कर्मावश्यमनुष्ठातव्यं तेन ज्ञानं मोक्षश्च सिध्यतीत्यर्थः ननु न कर्मणा न प्रजया धनेनेति श्रुत्या सर्वकर्मणां मोक्ष
साधनत्वनिषेधात्संन्यासपोषणादिति संन्यासस्यैव मुक्तिहेतुत्वश्रवणाच्च सर्वकर्मणां संन्यासमेव कृत्वा
हं न कर्मणां मुख्यमासे न कदापि चक्रुर्वैरकेऽपि पुण्ये इति च कर्मत्यागेऽपि च हि साधनमिसाशंकां यामाह न चेति क
र्मणि शेषभूतमेषितत्वबुध्या पूर्वलक्षणेनेन वाप्यापातवैराग्यात्क्षिप्रत्यागादौ वीतरागमात्रादेव सिद्धिं नैष्कर्म्यसिद्धिं वि
देहमुक्तिं प्राप्नोति मुमुक्षुर्न समधिगच्छति विनैव वेदान्तश्रवणाजन्मना नेन तानादेव तत्कैवल्यमिति श्रुतेर्मोक्ष
हेतुः ननु संन्यासमुक्तार्थं देहरोपापत्तिर्वा वेश्वानरो वोपाप्तिर्शिवस्य स्मरणस्य वा श्रेयं नाम कीर्तनं वा कुर्यादिति चेन्नाद्यः
सत्यकामः सत्यसंकल्प इति देहरोपासनस्य सत्यकामत्वादिगुणावत्त्वश्रवणात् तुरावद्वपास्मातद्भावापत्तिश्रवणात्
न द्वितीयः समस्तैर्वेदभूतेः श्वन्नमजीति श्रवणात् द्वैश्वानरोपास्त्या सर्वभूतात्मनाः श्रादन्नमात्रफलश्रवणात् न तृतीयः दे

१४०
४९

सेव स्यामो काङ्क्षते सर्थः तत्कथमिति चेदुच्यते वेदांतैः सर्वैः सम्यक् स्थापनेनान्यथैव प्रतिपाद्यत इति सांख्यं
निर्विशेषं परं ब्रह्म तदेव स्वात्मत्वेन ये विदुस्ते सांख्याः ब्रह्मविदस्तेषां सांख्यानां यतीनां ब्रह्मज्ञानां ज्ञानयोगेन
ब्रह्मवित् ब्रह्मणि स्थित एकोऽद्वितीय इत्यादिनेति योगः ज्ञानमेव योगो ज्ञानयोगस्तेन सर्वमिदमहं च ब्रह्मैवेति ब्रह्मा
कारवृत्त्या निष्ठानैरन्तर्येण स्थितिः प्रोक्ता सदैकरीत्याके जैव्यत्वेन विहिता तमेवैकं विजानथ आत्मानमन्या वाचो वि
मुञ्चथ ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् वेदान्तविज्ञानसुनिश्चितार्थाः सर्वं खल्विदं ब्र
ह्म तज्जलानिति शान्त उपासीत तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्ला
पनं हि तत् इत्यादिवाक्यैरनन्यवृत्तिनिदिध्यासनेषां ब्रह्मनिष्ठत्वेन कर्तव्यत्वेन मोक्ष इत्यर्थः योगिनां कर्मयोगिनां गृहि
णां कर्मयोगेन युज्यते अभ्युदयोऽनेनेति योगः कर्मैव योगः कर्मयोगस्तेन निष्ठा नियमस्थितिः प्रोक्ता अहर
हः संध्यामुपासीत उदिते सूर्ये प्रातर्जुहोति वसन्ते ब्राह्मणोऽग्नीनादधीत कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
तस्मात्स्वाध्यायोऽध्येतव्यः ऋतं च स्वाध्यायप्रवचने च सत्यं च स्वाध्यायप्रवचने च अप्रमत्तः स्वाध्यायप्रवचनेन
गृहो नेन स्वाध्यायप्रवचने च नैव सत्यं वद धर्मं चर नातिक्रान्तो योपास्यानीति श्रोतस्मार्तकर्मनिष्ठेव कर्मिणां कर्तव्यत्वेन
प्रोक्ता विहिता एवं निष्ठाद्वयं कर्मिणां गृहस्थानामकर्मिणां संन्यासिनां च असंकीर्णं विभज्य मद्दर्शितमित्य
र्थः ३ नन्वेवं सति ज्ञानकर्मणोरुभयोरपीतरेतरानपेक्षयैव साक्षान्मोक्षहेतुत्वं प्राप्तमिति चेत् न कर्मणामज
ये ... त्यादिश्रुतिभिः कर्मणां मोक्षसाधनत्वनिषेधात् ज्ञानादेव मुक्तेर्वक्ष्यमाणत्वात् तथाहि एवं ज्ञानस्यैव साक्षा

नेनेहो होतव्य ...ब्रह्म ...ण मते ध्यापने।

आधात आः ६ सएवया यापास धमान

गी० टी०
४
181

दाचिदपि कश्चित्योगी वाऽयोगी वापि प्राणी स्वल्पं क्षणमप्यकर्मकृत् न किमपि कर्म कुर्वन्न तिष्ठति किंतु सुषुप्तिं विना
जाग्रत्स्वप्नयोः सर्वदा कायेन वा मनसा वा वाचा वा चक्षुरादिभिर्वा यत्किंचित्कर्म कुर्वन्नेव तिष्ठति न कश्चिदपि
तूष्णीं तिष्ठत्यर्थः इदं सर्वेषां स्थितिहि: असिद्धि योगिनार्थेः कस्मात्तूष्णीं स्थातुं न शक्नोतीत्याकांक्षाया
माह कार्यत इति हि यस्मात्कारणात्सर्वोपि प्राणिवर्गः प्रकृतिजैः सत्वरजस्तमोगुणात्मिका मूलप्रकृतिस्त
स्याः सकाशाज्जाताः प्रकृतिजाः तैर्गुणैः गुणाः इत्यत्र वासना गुणा वासनाः कर्मवासना जातिवासना एग हे
षादयस्तैः प्रकृतिगुणैरेतैर्नियमाणोऽवशोऽस्वतंत्रः सन्नेव बहिरंतः कर्म नानाव्यापाररूपं कार्यते वास
नात्मिकायाः प्रकृतेर्गुणक्षोभकत्वान्न कोपि तूष्णीं स्थातुं शक्नोति विना ब्रह्मविदं यत्र ब्रह्मविद्वैयं स्तु निर्विकल्पस
माधौऽज्ञाननिर्मूलितप्रकृतिगुणत्वात् येन तल्लयं गतत्वाद्यगुणामेरुरिव स्वयं गुणैर्नैव विचाल्यते किंतु निष्क्रि
यब्रह्मात्मना तूष्णीमेव तिष्ठति उदासीनवदासीनो गुणैर्यो न विचाल्यत इति स्मरणात् ततो ब्रह्मविद्वर्ज
एक एव न तूष्णीं स्थातुं शक्नोति न ततोन्य इत्यर्थः ॥ ५ ॥ यस्तु सर्वकर्मसंन्यस्य करपादादीन्द्रियग्रामं रुध्वा बहिस्त
ष्णीं स्थातुमुपक्रमते स्वल्पेन स्थातुं शक्नोति एवं सा शंकायां तु बंधमोक्षयोर्नैतिस्वाधिकारं ज्ञात्वा विज्ञाय किंके
मणां निष्फलत्वं ज्ञात्वा पिष्टेन निदुरहंकारेण मुक्तिसाधनं वैदिकं कर्म सर्वं संन्यस्य परं तूष्णीं तिष्ठति स दंभा
चार इत्याह कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥ वि
मूढात्मा विमूढः कार्याकार्यविवेकरहितः आत्मा मनो यस्य स विमूढात्मा सन् स्वस्य कर्तव्यं वैदिकं कर्म मुक्तिसाध

एम०
५०

वोध्यत्वादेवान्यथेतीति श्रवणगतलोकमात्रिसंगात्नापिचतुर्थः नास्तिपातकमहो कलिकाले नामकीर्तनयरेषु
नरेषु पुरेय श्रवणकीर्तनमित्यादिवचनान्नायक्षयमात्रप्रयोजनसिद्धेः यदृश्यंतदसदित्यव्याह्तनादेः स्वतातस्यसगुणा
स्यसर्वस्यदृश्यत्वेनासत्वावगमानंतु यो स्यस्य सर्वस्यापि सगुणत्वेनाऽसत्वाद्व्यभिचारादसेदुपास्त्यान्वःस्तुष्टावरणफलंसि
ध्यतिन कचिदपि सद्भाव उपासनानुरूपत्वात्फलसिद्धेः यं यथा यथोपासते तदेव भवति असन्नेव स भवति असद्ब्रह्मेति वे
दचेदित्यादिश्रुतेः ये यथा मां प्रपद्यन्ते च मितं असुर्या नामते लोकाशनिनचेदिहावेदीन्महतीविनष्टिरित्यात्मनत्वाऽज्ञानि
नआसुरलोकगामित्वमहाऽनर्थश्रवणात् अरूपमुखादयतीनृमालोहकेभ्युःसायकामिति वेदांतविद्गुणलांनायतीना
मिद्रभवपरश्रवणाच्च भवस्ततत्वविवेकापसंन्यासः सर्वकर्मणां कृत्याविधीयतेतस्मात्तन्यागीपतितोभवेदिति यतः
स्वरूपविवेकाभावे पतितत्वस्मरणात्संन्यासस्यापि कर्मत्वाविशेषाज्ञानमात्रेण मोक्षासंभवाच्च तस्माद्यतेर्मुमुक्षोः
सर्वथा वेदांतश्रवणे नज्ञाने नपन्ने नसंपादनीयमितिसूचितंभगवता नचतस्य सत्रादेवसिद्धिंसमधिगच्छतीतिवको

तपः५

रस्त्वर्थः संन्यासयोगादित्यत्रब्रह्मविदांयतीनां ब्रह्मरूपारोपितनामरूपग्रहणत्यागः संन्यासशब्देनोच्यते नत्तुक
र्मसंन्यासः यतेयरतिपतिपदेनैवसंन्यासस्य सिद्धत्वाद्न्यथापुनरुक्तिप्रसंगात्तस्माद्यतेः संन्यासस्य फलं वेदांत
श्रवणजन्यज्ञानमेवेति सिद्धं ४ यदुक्तं सर्वकर्मसंन्यासं कृत्वा अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामीति तत्संस्कारजप्रवृत्तेः
क्षिपापात्तिःपोयत्यागायोगान्दृत्तेरफलत्वेनाभावाच्चतत्पाणी मासनेष्ट्वलिनिष्ठविनानकस्यापिघटनात्स्वास्थ्येना
ह नहिकश्चित्क्षणमपि जातुतिष्ठत्यकर्मकृत् कार्यतेह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५ अन्नलोके जानुके

गी०टी०
५

तीश्वरार्पणात्तु ध्यानिरभिमानिनां मुमुक्षूणां किं च नारण्यात्कर्मेत्याघर्षरूपचर्येते ननु संन्यासोऽपुष्यते किं तु विद्वत्संन्यासाद्विविदि
षासंन्यासाद्विलक्षणः संन्यासः स्वस्येननकर्तव्यरूपश्चते तत्रैविध्यमावाध्यत आत्मतत्त्वमज्ञात्वैव केवलेच्छेनाऽविविदि
षुणा कर्मसंन्यासः कृतश्चेत्तेन भवत्यवाय एकोऽनर्थः नरकपातो द्वितीयः दुर्योनिस्तृतीयः मोक्षाभावश्चतुर्थः कृते तु क
र्मणि प्रत्यवायाभावः ईश्वरप्रसादश्चित्तशुद्धिर्ज्ञानं मोक्षश्चेति ध्रुवतः फलमप्यत्वात्कर्मणां त्वं नियतं विधुनेकर्म
नित्यं वा नैमित्तिकं चेश्वरप्रीत्यर्थं चित्तशुद्ध्यर्थं च कुर्वित्यर्थः न केवलमामुष्मिकार्थमेव कर्मकर्तव्यं भवति किं त्वैहिका
र्थमपि कर्तव्यमित्याह शरीरेति निश्चलात्मना स्थाणुवत्स्थानमवस्थानं केवलकर्मसंन्यासस्तस्मादकर्मणो निःशे
षकर्मपरित्यागात्ते शरीरयात्रापि न प्रसिध्येत् सुखेन न सिध्यतीत्यर्थः नहि देहश्छिलावत्क्षुधापाकं देवात्तु ...तिष्ठ
तः शरीरयात्रा सिध्यति यत्किंचित्तदनुकूलव्यापारं विना ततस्तदर्थमपि कर्मकर्तव्यमेव नेनुया वृत्तो कर्मणा शरीरय
त्राणं सिध्येत्तावत्कर्मकुर्यान्न ततोऽतिरिक्तमिति चेत्तत एव भवानेति मूढः संन्यासानर्हश्च भवति यतः स्वेतरस्येवा
नात्मनो देहस्य रक्षणं कर्तुमिच्छति न त्वात्मनस्तवायमात्मा जननमरणप्रवाहे पतित्वा मुहुर्मुहुः निमज्जोन्मज्जनं निर
तरदुःखे तोऽत्र पुनाति त्वमात्मनस्त्राणमकृत्वा अनात्मनः शत्रोरेव त्राणं पश्यतस्ते इतोऽपि बाढं प्रमादो नैष्कर्म्ये कर्मणा
शरीरत्राणमस्य ता स्यथापयाकरोविनथा विहितानि कर्माण्यनुष्ठाय तेनैमा पवित्तशुद्ध्याऽऽत्मस्ता न प्रपोसत्वण
संपाद्यात्मानं दुःखसागरादुद्धारय उद्धरेदात्मनात्मानमिति वचनादात्मनो मोक्षार्थमेव कर्मकुरु न केवलं देहयात्रार्थमि
त्यर्थः ८ ननु कर्मणा बध्यते जंतुर्विद्यया च विमुच्यत इति कर्मणां बंधहेतुत्वस्मरणात्कथं बंधकं कर्मकं तु प्रवृत्तस्या संकापो

182

एम०
५१

नेपरित्यज्य बाह्यैः कर्मेंद्रियाणि संयम्य निरुध्य चक्षुर्वीजनीमीलनादिरिंद्रियार्थान् स्मरच्छरीरी न स्मरन् चिंतयन् य आस्ते
मूढात्मा विदेहमदे कर्मसंन्यासेन कृतार्थोऽस्मीति स मिथ्याचारः सदाचारः कपटचारित्र आत्मवंचक इति स मूढे प्रत्यवायित
इत्यर्थः एतेन मन्दवैराग्यवतां स्वधर्मं संन्यस्य स्वधर्मवैराग्यादिकं मत्कृत्वा विवेकाज्जीवन्मुक्तेन संन्यासेनैव कृतार्थोऽहमि
ति योऽपतितमन्यते सोऽपि मिथ्याचारश्चेति सूचितं भवति ६ अनात्मज्ञस्य मुमुक्षोः कर्मसंन्यासापेक्षया कर्मयोगस्य
वैशिष्ट्यमाह यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७ मु
मुक्षुः पूर्वस्मादस्य श्रेष्ठत्वद्योतनार्थः यस्त्वनात्मज्ञो मुमुक्षुर्विवेकी स रागाः कर्मसंन्यासमकृत्वैव चक्षुरादी
नींद्रियाणि एतानि हेषादिदोषाणां गोचराणि न भवेयुः यथा नयानि यम्य स्वधर्मसक्तः फलाभिसंधिरहितो
भूत्वेश्वरार्पणबुद्ध्या कर्मेंद्रियैर्वागादिभिः कर्मयोगं श्रौतं स्मार्तं वारभते स्वरूपचित्तशुद्ध्ये करोति स विशिष्य
ते मोक्षसाधनीभूतकर्मयोगनिष्ठत्वात् कर्मयोगी पूर्वोक्तदांभिककर्मसंन्यासापेक्षया श्रेष्ठ इत्यर्थः ७ मुमुक्षो
र्नैष्कर्म्यसिद्धये मिथ्याचारत्वदोषनिवृत्तये चावश्यकं कर्म कर्तव्यमिति सूचयितुमाह नियतं कुरु कर्म त्वं कर्म ज्या
यो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ८ हि यस्मात्कारणादकर्मणः पेन न संभाव्यते कर्मबंधः
पुरुषस्य कर्मसंन्यासस्तस्मादकर्मणो मन्दकृतेः काद्विवेकवतो मोक्षसाधनत्वेन क्रियमाणं कर्म ज्यायः श्रेष्ठं
हि विसंन्यासस्तु एवात्परे चपदिति संन्यासस्यैव सर्वोत्कृष्टत्वं श्रूयते तथापि योग्यमुखकं साधनं कार्यं साधकमि
ति न्यायेनना हे कर्मकर्मी सन्संभावनवेत्र तत्कृतत्वात् संन्यासस्य तदपेक्षया परमेश्वराराधनबुद्ध्याहं नरिष्यामी

गी०२०
६

नुभावयताऽनेनतेदेवाभावयंतुवः परस्परंभावयंतः श्रेयः परमवाप्स्यथ ११ अनेनयज्ञेनश्रौतेनस्मार्तेनच स्वयंदेवानिंद्रादीनुभा
वयतसंभावयतवृष्ट्युपरोडाशादिभिः संतुष्टान्कुरुतेत्यर्थः अनेनसंभाविता संतुष्टाः संतस्तेदेवाइंद्रादयो वः युष्मान्भावयंतु
इष्टार्थप्रदानेन संभावयंतु एवं परस्परंभावयंतः संतो यूयंदेवानांप्रसादेन निःशेषविनष्टप्रतिबंधाः संतस्तत्वबुद्धाः सम्यक्ज्ञा
नेनाप्यपरंनिरतिशयानंदलक्षणंश्रेयोविदेहकैवल्यमवाप्स्यथ परप्युत्रपरस्परंभावयंतः श्रेयः परमवाप्स्यथेत्यत्रभवेयाप
रश्रेयःप्राप्तिविधिः प्रतीयतेतत्पापविचार्यमाणोप्रजानामेवधर्मोपदेशविषयत्वेनोक्तधर्मानुष्ठानलभ्यपरमश्रेयःप्राप्ति
विधिर्नतुतदनुग्राहकाणांदेवानांतेषामुपदेशाविषयत्वात्स्वयंप्रभानविज्ञानत्वाज्जीवन्मुक्तत्वाच्च न श्रेयोविधिरुपपद्यु
ज्यतेतेनतः संभावनायामेवपरस्परपदस्यसंबंधोनतुपरमश्रेयःप्राप्तिविधाविति तत्त्वं ११ यज्ञसंभाविता देवामुमुक्षूणां
नकेवलमामुष्मिकमेवसुखंप्रयच्छंति किंतुऐहिकसंपत्सुखमप्यनेकेषांप्रीत्यैयज्ञाद्यनुष्ठानपंचकंतेअपिमन्यथाप्रत्यवायीभ
वतीतिस्वयमेवाह इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२ यज्ञैः
श्रौतैः स्मार्तैश्च भाविताः संभाविताः देवावो युष्मभ्यमिष्टानिष्टान्विषयभूतान्भोगानपशुपुत्रकलत्रधनधान्यादी
न्दास्यंते वितरिष्यंते एवंतैर्देवैर्दत्तान्पदार्थान्पुनश्चचरुपुरोडाशादिरूपेणैभ्योदेवेभ्योऽप्रदायाऽदत्वादेवानाम
भीष्टांपितॄणांचयज्ञेनबलिवैश्वदेवादिपाकयज्ञादिपाचान्नरायमहत्वा यः स्वशरीरस्यैवपोषणंभुंक्ते सतेनोदेवादीनांचोरए
वभवतिहिष्टानांनिग्रहश्चदेवब्रह्मस्वहारिणांतस्करस्यपापगतिस्तांदग छतीत्यर्थः १२ येतुपंचमहायज्ञान्कृ
त्वाऽवशिष्टान्नाशिनो भवंतिते सर्वपापैर्मुक्ता भवंति येतुदेवतातिथ्यादीननुद्दिश्यस्वार्थमेवपचंतितेपापाश्रिनेर

183

रम०
५२

विस्तरिष्यंते ७

न काम्यस्यैव कर्मणो बंधकत्वं न त्वीश्वरार्पणबुध्या क्रियमाणस्येत्याह यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः । त
दर्थं कर्म कौंतेय मुक्तसंगः समाचर ९ यज्ञो वै विष्णुरिति श्रुतेर्यज्ञ इह परमेश्वरो विष्णोः यत्स्वेश्वरस्यार्थं संतुष्टिनिमित्तं य
त्कर्म क्रियते वैदिकं तद्यज्ञार्थमित्युच्यते तस्माद्यज्ञार्थात्कर्मणोऽन्यत्र सादीश्वरप्रीतिहेतोरन्यत्र काम्यादौ कर्मणि यः प्रवृत्तो लोकोऽ
धिकारी ब्राह्मणादिः कर्मबंधनः कर्मैव बंधनं जन्मादेर्निबंधनं हेतुर्यस्य स कर्मबंधनो भवति विहिताकरणेन वा काम्ये
न निषिद्धेन वाकृतेन कर्मणा नरो बंधवान्भवति नेश्वरप्रीत्यै क्रियमाणेन कर्मणा तत्कर्मैव न बंधायेति स्तरणा
दीश्वराराधनात्मकमेव कर्मोऽबंधकं तदन्यत्तु बंधकमित्यर्थः । तत तदर्थमपीश्वरप्रीत्यर्थं चावश्यकं त्वं मुक्तसंगः फलाभि
संधिरहितो भूत्वा विहितं कर्म समाचर सम्यगनुतिष्ठ ततो नतु ईश्वरप्रसादात् मुमुक्षुत्वा सत्त्वेन ज्ञानमाप्य मुक्तो भविष्यसीत्यर्थः
९ एवं नैष्कर्म्यसिद्ध्येपि श्वाचारत्वनिवृत्तये शरीरयात्रासिद्ध्यै चावश्यकं कर्म कर्तव्यमित्युक्त्वा इदानीं धर्मकृत्सन्मयः प्रमाणा
पितिसृष्टोक्ते एत्याधर्मरतो मेन ब्रह्मणास्यो क्तः मामानिकोपयपरमो धर्मो मुमुक्षुरणामवश्यंकर्तव्यं इन्द्रादिदेवताप्र
सादसिद्धये रसाहहाभ्यां सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् १० पु
रा सृष्ट्यादौ प्रजापतिः ब्रह्मा श्रुतस्मृत्योर्यज्ञैः सह प्रजा ब्राह्मणादिवर्णान्सृष्ट्वा ताः प्रजा उवाच उक्तवान् अनेन यज्ञेन श्रौते
न स्मार्तेन च प्रसविष्यध्वं वेरुअ वृद्धिमाप्नुत दिष्टयैवैर्देवानां प्रीतिमुत्पादयध्वं एषदेवानुहिष्टयज्ञ द्वापाकतोय यतो पिवः
छानिछापाः विषयप्रभृत्या तत्कामसेतर कामाः फलविशेषास्तान्दोग्धीति इष्टकामधुक् भवति निष्कामानां तान्प्रति बं
धकत्वेन स्पृहापरकामानामेव मुक्ताय भवेदित्यभिप्रायः १० कथं यज्ञस्तोऽस्मत्कामनिष्टदायी भवतीत्यत आह देवा

वति अन्नात् स्त्रीपुंसाभ्यां भुक्तान्नस्य शुक्रशोणितरूपेण परिणताद्भूतानि प्राणिनो भवंति जायंते जाता अन्नेनैव जीवंति च एवं हि अन्नस्य हा
गी०टी० राजन्जीवनहेतुर्यो यज्ञः स तु केन समुद्भवः ऋत्विग्यजमानादिभिः क्रियमाणाद्धोममंत्रतंत्रादिक्रियावैदिकी कर्म तस्मात्तेन सा
७ स्तस्य समुद्भवो यस्य स कर्मसमुद्भवः एवं लक्षणो यज्ञः १४ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे
प्रतिष्ठितं १५ यज्ञकारणभूतं यत्कर्म तत्तु ब्रह्मोद्भवं ब्रह्म वेदः ऋग्वादिस्तस्मादुत्पन्नं विद्धि तच्च ब्रह्म साक्षरसमुद्भवं विद्धि अ
स्य महतो भूतस्य निश्वसितमेवैतदृग्वेदो यजुर्वेद इति श्रवणात्सर्वजगत्कारणभूतादक्षरात्परमात्मनः सकाशा
न्निश्वासरूपेण स्वयमेवाविर्भूतमत एव नस्वमपौरुषेयं ब्रह्म वेदं विजानीहीत्यर्थः यस्मादेतैकमूलाज्जगदुत्पत्तिः
184 स्थितिश्च तस्मात्सर्वप्रसर्वगतं सर्वार्थप्रकाशकत्वेन सर्वलोकस्थानां ततइमे नित्यमपि व्यापकत्वेन च सर्वत्र स्थि
तमपि ब्रह्म वेदो यतो ब्राह्मणादिभिरनुष्ठापितयज्ञे औपासनाद्युपमेधांते कर्मण्येव तात्पर्येण विधानेन प्रयोजनत्वात्प्रतिष्ठितं नि
त्यनियमेन स्थितं भवति ब्राह्मणानां कर्तव्यत्वेन कर्माणि वेद एव विदधातीत्यर्थः १५ एवं प्रवर्तितं चक्रं नानुवर्तयतीह
यः अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६ ईश्वरः श्रुतिमुखेन यज्ञसंततिं विधाय यज्ञाद्वृष्टिं चान्नं च संभाव्य
भूतसृष्टिं तत्स्थितिं च निर्वोढुमिच्छया स्वयमेव चक्रं प्रवर्तितवान् तदिदमीश्वरप्रवर्तितं चक्रं यस्त्विह लोके कर्माधि
कारी ब्राह्मणादिर्नानुवर्तयति परमेश्वरेण प्रसारविधापितं कर्मयोगेनानुतिष्ठति एतदीश्वरशासनमकृत्वा स्वप्रसिद्धि एम०
पारामः इंद्रियैरिंद्रियार्थेष्वेव अजस्रमारमतीतींद्रियारामो विषयभोगलंपटः स च तत एवाघायुः कलुषमयमेव पुरुषसो ५३
ऽघायुः सत्वाकाशकवच्छाल्मलिवन्मोघं व्यर्थं निष्फलमेव जीवति तेनावन्मात्रमेव भवति किं तो श्वरशासनोल्लंघनदोषेणापि

श्रीवल्लवद्धुर्य
जिसको बड़ी कहते है जोसमके

चेति पंचमहायज्ञानुष्ठानाऽननुष्ठानयोः फलं प्रतिपादयति पंचमहायज्ञानां दैनंदिनत्वेनावश्यकर्तव्यत्वदार्ढ्यमाह
यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३ यज्ञशिष्टाशि
नः संतो देवयज्ञः पितृयज्ञ इत्यादयः पंचमहायज्ञाननुष्ठाय तच्छेषान्नभोजिनो भूत्वा सर्वकिल्बिषैः कंडनी पेषणी
चुल्ली उदकुंभी उपमार्जनी पंचसूना गृहस्थस्य पंचयज्ञात्मकरणप्यनीतिस्मृत्युक्तानि यानि बुद्धिपूर्वकं प्राणिपादया
तात्मकानि पापान्यबुद्धेन प्रमादानि तैरेतैः सर्वैः किल्बिषैर्मुच्यंते ते पापमोक्षाच्चित्तशुद्धिस्तया ज्ञानं मुक्तिं च विंदतीत्यर्थः
पंचमहायज्ञाननुकुर्वाणाः पापाः पेत्यार्थं भ्रमणात्मकारणात्स्वोदरभर्तिहेतोरेव पचंति न तु देवाद्यर्थं न वैश्वदेवायो
पचंति देवेभ्यः पितृभ्यो ब्राह्मणेभ्यश्चाऽदत्वा स्वयमेव भुंजते च ते त्वघं पापमेवान्नरूपेण स्थितं भुंजते ते न त्वन्नं स्वदेहधा
तदन्नमिव भाति शास्त्रदृष्ट्या देवतादृष्ट्या च पापमेव भवति तदेव याचिष्ठ तन्मात्यर्थः तथा च स्मृतिः मोघमन्नं
विंदते अप्रचेताः केवलाघो भवति केवलादीति १३ एकां क्रियाप्राधान्यर्थं करोति अन्नाद्भवंतीत्यादिना मुमुक्षुणा स्वोचिते
ण क्रियमाणं कर्म सत्वशुद्धिद्वारा स्वस्य मोक्षहेतुर्भवति दृष्टादिद्वारा जगत्स्थितिहेतुश्च भवति अत उभयथापि
कर्म कर्तव्यमेव मुच्यते सर्वकिल्बिषैरिति नैष्कर्म्यं पुरुषोऽश्नुत इति कर्मणो मोक्षहेतुत्वं प्रतिपादितं जगत्स्थिति
हेतुत्वमिदानीं निरूप्यते त्रयेण अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमु
द्भवः १४ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मृत्युक्तप्र
क्रियया यज्ञाच्छ्रौतविधेराय थाशास्त्रं निर्वर्तिताद्यज्ञाद्वृष्टिर्भवति पर्जन्याद्वृष्टिप्रवादित्यपरस्मादन्नसंभव उत्पत्तिर्भ

गी० टी०
८

रूपवत्तद्बहिरंतः सर्वत्र दृष्टेर्विषयभूतेऽपि विद्वान्दैकरसे ब्रह्मण्येव संतुष्टः यथा कामी स्त्र्यर्थे संतुष्टो भवति तथायमात्मन्येव
संतुष्टश्च स्यात्तस्य महात्मन आत्मारामस्य कृतकृत्यस्य यतेः कार्यं कर्तव्यं कर्म न विद्यते नास्ति यथा मुकामत्वेनमा म
त्यभावात् ननु श्रुतिकृतत्वादविद्वषोपि हि दुर्योधिक कर्तव्यमेव वैदिकं कर्म विधेः सर्वसामान्यात्कर्मशास्त्रं तदर्थज्ञ
निर्णयपरिज्ञानात्त्वाद्विदुषः विद्वान् यजतेऽरतिविशेषविधानाद्धविषि विविलादिदुषाप्यवश्यं कर्म कर्तव्यमेवेति चेद्वान्
त्वमर्थ्यः यथावैकत्वविज्ञानवांहि निर्मलितद्वैतभ्रमस्य सर्वं ब्रह्मेव यश्यतो जीवन्मुक्तस्य ब्रह्मविदः कर्मकरणं स्वार्थं
वा किं परार्थं वा आद्ये कमैहिकार्थं वा किमामुष्मिकार्थं वा आद्ये शरीररक्षार्थं वा किं परिग्रहरक्षार्थं वा प्रत्युत विलासा
र्थं नाद्यः सिद्धेः यथा येनयत्नेन तत्र यारन्धमपवसमी झुमाराइति वचनात् शरीरस्थितेः प्रारब्धाधीनत्वात्तदुद्दि
श्यविदुषः कर्मोऽनुपपत्तेः न द्वितीयः एनं वै तमात्मानं विदित्वेति श्रुते निःशेषनिवृत्तमिथ्याज्ञानानां ब्रह्मवि
दां पुत्राद्येषणाभ्यो व्युत्थानश्रवणात्ताभ्य उत्थितवतो विदुषः परिग्रहाभावात्तद्रक्षानिमित्तककर्मानुपपत्ते
: न तृतीयः सर्वमात्मानमेव पश्यत आत्मरतेर्विदुषोऽन्यत्र रसमप्रसक्तौ विलासाऽसंभवात्तद्यामुष्मिकार्थमपीति
चेत्तत्रापि किं स्वर्गार्थं वा किमपवर्गार्थं वा किमात्मसुखार्थं वा नाद्यः यथा निःकामस्य कृतात्मन स्वरूपं हे व सर्वे अवि
लीयंते कामा इति सर्वकामप्रविलयश्रवणाद्विदुषः स्वर्गकामाऽसंभवात्तदर्थककर्मानुष्ठानानुपपत्तेः न द्विती
यः न कर्मणा न प्रजयेति श्रुत्या कर्मणो मोक्षसाधनत्वनिषेधाज्जीवन्मुक्तत्वाच्च विदुषस्तदर्थककर्मासि
द्धेः न तृतीये किं शरीरसुखार्थं वा किं चित्तसुखार्थं वा किमात्मसुखार्थं वा कर्म कर्तव्यं नाद्यः कलेवरं रक्तपूरितमा

185

१८०
२५

हिताकरणमस्यवापेन नित्यकृतपापसंघातेन चानेककल्पं नरकं चाधिगच्छतीत्यर्थः ततो विवेकिनो ब्राह्मणस्य मुमु
क्षोरनात्मज्ञस्य नरराणं लोकहितार्थं चावश्यं वेदोक्तं कर्म कर्तव्यमेवेति सिद्धं १६ अत्र श्रीभगवानतानयोगेन सां
ख्यानां कर्मयोगेन योगिनामिति संख्यानां संन्यासिनामसांख्यानां योगिनां गृहिणां चोत्तरदक्षिणायनवेदसंकीर्णो नि
ष्ठाद्वयं विभज्य दर्शयित्वा तदेकं वदन्निश्चितेति तस्य कर्तव्यं दृष्टवतोऽर्जुनस्य कर्मानधिकारिणः स्वविहितत्वात्तद्धितमु
परेद्धुं न कर्मणामनारंभादिति कर्मयोगमुपक्रम्य नियतं कुरु कर्म त्वमित्यस्मै कर्मयोगमेवोपदिश्य यज्ञार्थादिस्मा
न्मादरेवं प्रवर्तितं चक्रमित्यन्तेन ग्रंथेनानात्मज्ञस्य मुमुक्षोरवश्यं सत्त्वशुद्ध्यर्थं कर्म कर्तव्यमेवेत्युक्त्वा कर्मणा देवता
गणितोषविनानान्यत्किंचिदपि फलं कर्तव्यमस्तीति सूचयितुमाह यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आ
त्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७ तुशब्दोऽनात्मरतिभ्यो व्यावृत्त्यर्थः यस्तु मानवः बहिरंतश्च सर्वत्र ब्रह्मैव सा
तिय आह प्रतीतिमान मनुष्यरूपेण तदेव सर्वदा वा तिभजतीति मानवो ब्रह्मविद्यानिरात्मरतिः अहं ब्रह्मास्मीति कृत्स्नकेरात्मा
स्वात्मेनासा साक्षात्कृतेन निरस्तानंदैकरसेऽद्वितीये परे ब्रह्मरूपे रतिरतः करणस्य रमणं क्रीडा सर्वदा विहारो यस्य स आत्म
रतिरेव भवेत् आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानंद इति श्रवणाद्यो ब्रह्मवित्सर्वदात्मन्येव विहरति न कृवि
षयेनात्मनीत्यर्थः किं चात्मतृप्तश्च आत्मनैवानंदैकरसेन तृप्तोऽन्यत्किंचिन्नाकांक्षते तृप्तः आत्मलाभान्न परं विद्यत
इति स्मरणात् अतः सामर्थ्यात् रागभावादात्मसाक्षात्कारमात्रेण स्वालं बुद्धिर्यस्य स आत्मतृप्तश्च भवेत् आत्मन्येव च संतुष्टो

त्वविज्ञानेन विधूतं न स पुनः संसारपंके स्पृश्यते न हि ब्रह्मैवाहमिति विज्ञानं शोको रागो हं ममेदमिति तु बुद्धिस्तु तं जन्तिमिरवस्तुरस्य रवि रु
द्धमेव तत्त्ववस्तु निष्कोतितमो ब्रह्मतत्त्वविज्ञानरवज्ञानेन भिन्नहृदयग्रंथेर्विदुषो भ्रमः संसरणं न संभवत्यतः संसारद्धीर्न छत्येव व
र्त्तमानोऽपि विद्वान् प्रयत्नपि न स्पृशति एतमदःस्थानमेव ज्ञापयन्नज्ञानतत्कार्यनिर्गहीनत्वं विदुषः ननु तर्हि तु कर्मारब्धमात्मनः देही
ब्रह्मभावापन्नोऽपि नो निष्ठतीति चेन्न अजडभरतस्य हृदयेन न त्वहं ममेदमिति संसरति मिथ्यात्वज्ञानस्य संसारस्य वस्मियो विरो
धान्न हि मरुमरीचिजलं दृष्ट्वा पुनर्दूरस्थतीमानां जलमादातुं पातुं वा विवेकी गच्छति स्वयं वलवत्ताप्रेप्सुमानोऽपि विवेकी न हि
र्षेणा नु न गच्छति किंतु हा कष्टमिति रुदन्न मेदं मे दंगच्छति नाप्यस्य चोदयति हृत्यमिति तत्र मारब्धवानपि विद्वान् त
त्सर्वं मिथ्यात्वदर्शी संसरतुं न हि स्पृशति नाप्यन्यं प्रेषयति च किंतु भग्नक इव सर्पवन्मेदं गतिर्भविष्यति प्रवृत्तिहेतोरनात्म
न्यहंभावस्याभावात् ब्रह्मैवाहमिति ब्रह्मात्मना ब्रह्मण्येव तिष्ठतो ब्रह्मविदो ब्राह्मणस्य चांडालमिव तत्तु स्पृष्टुं न
रोचते देहादितादात्म्यं विनाऽहं ममेति व्यवहर्तुं च न शक्नुते ब्रह्मविदां देहादितादात्म्यमतीव दुःखं गतादात्म्ये नाहं ममे
ति प्रवृत्तिस्ततो निर्दुःखं न त्वात्यिकर्मकरणप्रसंगे दुःखमेवेति विज्ञाय गृहस्थोऽपि विद्वान् सर्वं संन्यस्येव न स्वा
र्थं न परार्थं वा कर्म कर्तुं शक्नोऽस्यतः परोक्षज्ञान्येव वक्तुं योग्यो ध्यायेवात्रचरस्य मारारीत्या लोकसंग्रहं करिष्यतीति
न केचिदप्य परोक्षज्ञानी निःशेषाविनष्टाऽनात्माहंभावः ननु योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् इत्यादिवाक्यार्थपर्यालोचनया लो
ऽपरोक्षज्ञानिनोऽपि लोकसंग्रहार्थं कर्मकर्तृत्वमेवेति प्रतीयते कथं परोक्षज्ञान्येव लोकसंग्रहं करिष्यतीति नियमः

जनमिति स्मरणान्नसक्तत्वाच्च मलमांसास्थिमतः वपुषः कर्मणामपुण्यसम्भवात् न द्वितीयः यतस्यः शुद्धसत्त्वादिति श्रव
णान्न शुद्धं चिन्तनाद्देवसम्यग्गुणसत्त्वान्तत्वान्न द्वितीयः न चैष शुद्धाद्वये स्यादिति हेतुः न तृतीयः अस्माविरुद्धं शुद्धं न या
विद्धमिति श्रवणान्निरवयवत्वेनाऽविषयत्वाच्च कर्मणाऽऽत्मनः शुद्धिकल्पनाः योगात्प्रज्ञानबलेन विशुद्धादयो
कार्ये यत्नकोटिमपि कृत्वा स्वयं शुद्धं पश्यमानपि च शोधयं पितमात्मानं कः केन शोधयेत् स्वत एव सतः शुद्धिर्नास्ति
तायेनकेनचिदिप्यात्मनः स्वत एव शुद्धत्वात् न हि विद्यमानस्य चरणं पदार्थमेवास्त्विति चेत् तत्र चतुर्थः लोकार्थ
पः कर्म करोतिस किमपरो ज्ञातानीऽतपरोऽस्तज्ञानीवेति आद्ये सपतितो गृहस्थो वा नाद्यः न स्थानिरभिमानत्वात् सं
न्तस्य कर्मन्त्साधनत्वाच्च कर्मणाऽऽत्मप्रसक्तेः देहवर्णाश्रमादिष्वहं ममेत्यभिमानः प्रपञ्चस्य सत्यत्वबुद्धिरर्थितं कर्म
यतो बुद्धिरकर्तृणोऽस्य वा पभपं योऽत्र भयं च खलु मर्हजेवी जंतदेतन्सर्वं यापि समग्रं परावरैकत्वविज्ञानमहाग्नि
नानिर्दग्धं स्वयं निक्षिपत्यात्मनो निष्ठतो निर्दग्धानात्मतादात्म्यग्रन्थेः सर्वात्मभावापन्नस्य स्वात्मारामस्य
पतेरनिर्वेदनमेव न संभवति किमुत कर्मेति प्रवृत्तिरिति तथा च श्रुतिः मा रागो द्वेष सर्वस्मिन्ने विभाति विज्ञानवि
द्वारम्भवत्वेनातिवादी तितनो ब्रह्मनिष्ठस्यात्मरतेः स्वार्थं वा परार्थं वा कर्मेति प्रवृत्तिर्न संभवति नापि द्वितीयः जन्मा
नेकसहस्रकेन पुण्यपकर्मपुञ्जपरिपाकेन श्वरप्रसादेन च सर्वं दृश्यमिथ्यात्वनिश्चितः एवं कं ब्रह्मैवाहमिति ब्रह्मात्मैकत्व
वित्तानमप्रतिबद्धं यदा समुत्पन्नं स्यात्तदैव गृहस्थोऽपि पाशवल्कादिविदेपरान्ध्यो ह्युपास्यति नत्वहं ममेति संसृतं मह
तितत्वारणात्संभवान्संसारकारणं तत्त्वः नात्मनि देहादावहंभावे तद्यत्र मम भाव ब्रुतदेतनद्ययस्य ब्रह्मात्मैक

गी० २०
१०
107

तस्यैव स्याद्धेतोरदर्शिनो महात्मनः। सिद्धस्य मुमुक्षोः स्थितवत्स्वातिरिक्तमपश्यतः दर्शनवृत्ते श्रेयोविधुरिष्टस्य लोकविधिविधानवि
धेयादेरभावो नेडे इहैव न कर्मणाभिप्रवृत्तिः संभवति कुर्वन्नपि न लिप्यत इति प्रवृत्तिद्योतकं वा क्वापि विद्यते तत्कथमिति चेत्तदर्थं लो
कव्याख्यानावसर एव स्थापितः विद्वानूपजनत इत्यत्र विदितवेदार्थो ब्राह्मणो विद्वच्छब्दार्थो न तु ब्रह्मविद्यानिष्ठः सर्वकर्म
संन्यासित्वाद्विधेरपि लोकवत्निष्प्रयोजकोऽर्थतः पातित्वात्तु कर्मविध्यनुपपत्तेः तद्द्वितीयः साधकस्य मुमुक्षोर्यतेः कर्मवि
ध्यदर्शनात् नहि मुमुक्षोर्यतेर्निदिध्यासोर्लोकसंग्रहार्थं कर्मकर्तव्यमिति विधिरस्ति विना समाधि तन्मे वा श्रियो विज्ञा
पयन्तामिति परंब्रह्मानुसंदध्यादिति पञ्चदशाध्याये नमस्याः [illegible] ब्राह्मणाः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति
ज्ञाननिष्ठैव कर्तव्यत्वेन रूपते स्म यतेश्च मनेः संयम्यमयि जितेति ध्यानयोगपरो नित्यमिति वा चैवं पञ्चमनो यत्रेति
यातः साधकस्यात्मवेदिनो यतेर्न कर्तव्यः समाधिरेव नैष्ठीतं नस्माज्जैवस्वार्थं वा परार्थं वा शोचमावृतमनेत्वा न न
मुमोदनपावरेदिनिश्चितानुनिष्ठस्य विध्यभावस्मरणात्स्यात्मेवमप्राजिनो लोकसिद्धेः तः प्रवृत्तिरिति रूपत्याजितो
स्मया संन्यस्तसर्वकर्मणा रोपते विविदिषोरेव जिज्ञासा पांसं प्रवृत्तो नाद्विपत्कमेचोदनामिति प्रवराद्दिज्ञानसाधनेवि
नानास्यत्कर्तव्यमिति कर्मविधेरये स्थान स्मरणात्किमुत सिद्धस्य विज्ञानात्मत्वेस्य साधकस्य कर्मतत्त्वोऽनवका
शस्ततः परोक्षज्ञान्येव बहुधाकृत प्रवणा आभासात्मता न्यहमनादिवाह्यवासनाबद्धो लोकसंग्रहवचनेस्यावि
षयः अथवा लोकानुग्रहार्थं ब्रह्मणा स्वकामहीनोऽप्यसावागस्य परायणरवाति शादपतीत्स दृष्टा वा अन्ये आधि
कारिकाः विग्रहानुग्रहसमार्थेवा मे वेदलोकसंग्रहवचनस्य विषयाः ननु सिद्धो नापि ज्ञसाधको मुमुक्षुर्यति

[illegible]विधि
[illegible]दत्वात्
[illegible]यते

राम०
५६

क्षिपते विशुद्धात्मत्वादिविशेषणं ज्ञानं कथं परो सत्तानिवः सिध्येद्धि नाब्रह्मविदं ब्रूयाविष्टं शुभि शितिलत्वविदितित्र
ह्मविद्विंगदर्शनात्ततोऽपरो सत्तानिनो पिलोकसंग्रहार्थं कर्मकर्त्तव्यमेवेति चेन्न सर्वविशुद्धात्मत्वादिविशेषणजा
ते नितरस्मा ह्रस्य विदंव्यावर्णेपक्षितरिदं मुक्तिफलं लक्षणं जन्मफलकोटप्राप्त्येपामलप्यंतयो प्यत्रतंमेपवः
अपरो सत्तानो हि द्विविधः सिद्धः साधकश्चेति तयोः किं सिद्धस्योच्यते उत साधकस्य वा लोकसंग्रह इति नाद्यः मुक्तत्वा
स्य लोकसंग्रहानुपपत्तेः सर्वमिदमहं च ब्रह्मैवेति निश्चयनिश्चितंत स्वस्य निष्ठापापिशितकृतनपरार्थैक विज्ञानत्वज्ञेनहत
ममेवं धीविच्छिद्य ब्रह्मादिस्तंबपर्यंतैः सह सर्वं प्रशिक्षिः स्वं मुक्तं पश्यतो ब्रह्मविद्यते हि कस्माद्बहुलौकाः भावानं
संग्रहो सम्भवाद्यथा देवदत्तः सर्वेभ्यः दत्तं स्वयं भुक्त्वा स्वमेव भुक्तवंतं पश्यति नान्यं यथा वा यज्ञदत्तः स्वयं एवं
मति बुध्यस्वेमेवं मतिद्वेष्टं पश्यति न तथा विद्वानात्मानमेव मुक्तं पश्यति किंतु स्वविज्ञानेन स्वं च सर्वं च मायिजातं
मुक्तमेव पश्यति यथा शुक्तिमान् स्वस्य चेतनत्वे धर्मवेत्ति एव विज्ञानेन ब्रह्माण्डस्य मायिजातं सर्वं चेतनत्वधर्मं वि
शिष्टमेव विजानाति यथा वा पाचकः स्थालीपुलाकं स्वेकस्य पक्वं ज्ञातेन सर्वं स्थाल्यन्नस्य पक्वतां विजा
नाति तथा ब्रह्मविद्यतिः स्वमुक्त्या सर्वान्मुक्तानेव विजानाति ननु स्वमात्रं पश्यतु स्वमात्रमेव मुक्तं पश्यति तत्वसं
न्न सम्यग्ब्रह्मविदेवं भवति नापि च मुक्तः किंतु सर्वथा बद्धः न तु विद्यावंधाद्यथा विवेकी स्वस्य तु ध्यानरंगके न बुद्धि
दाद्यन्नं सर्वं जलमात्रं पश्यति यथा कटककुंडलादि हेमं सर्वं हेममात्रं पश्यति यथा वा रज्जुसर्पं रज्जुमात्रं पश्यति
तिनैव तु स्वस्य हस्त्यादि जगत्सर्वं ब्रह्ममात्रं पश्यति स ह एव ब्रह्मविद् हेतद् स्वपविद्यावंधविमुक्तः ब्रूते से

न हानिर्वृद्धं भवति एष नित्यो महिमा ब्राह्मणस्येति श्रुतेः ब्रह्मवित्त्वरूपस्य कर्माकर्मभ्यां वृद्धिक्षयाभावश्रवणात् ब्रह्मविदोऽक-
गी०अ०३ र्मणा स्वरूपहानिश्च न भवतीति तस्मादकृतेनाकृतेन कश्चिदप्यनर्थ इत्यर्थः ननु तस्य मुक्तिप्रतिबंधकनिवृत्त्यर्थं वाध्या-
९ त्मिकाद्युपद्रवनिवृत्त्यर्थं वाप्युपास्तिक्रियया शिवो वा विष्णुर्वान्यो वाश्रयणीयो भवति अथवा शरीरयात्रार्थं
ब्राह्मणो वा क्षत्रियो वाप्यनुसराश्रयणीयो भवत्यतो विदुषः सर्वदा कर्मसाधनमुच्यत एवेत्याशंक्याह न
चेति अस्याऽकलक्षणस्य ब्रह्मवित्तमस्य देवेषु शिवो वा विष्णुर्वा सर्वभूतेषु ब्राह्मणो वान्यो वा कश्चिदपि यत्किंचि-
100 त्कार्यमुक्तलक्षणमुद्दिश्य क्रियया व्यपाश्रय आश्रयणीयः कश्चिदपि नास्ति इहैव तैर्जितः सर्गो येषां साम्ये स्थितं
मनः इति वचनात् इहैवास्मिन् शरीरे नित्यनिरंतरब्रह्मनिष्ठया भाविशरीरप्रापकमतीतानंतकोटिसंचितादि सर्वं कर्मजातं च वि-
निर्मलस्य स्वल्पं शरीरसंबंधरहितत्वेनैव सदास्थितत्वात् ब्रह्मविदोऽत्रैव मुक्तस्य इतो मुक्तिप्रतिबंधकासंभवात् आध्यात्मिको-
ऽपद्रवेतः पातित्वाच्च शिवविष्ण्वादिराधनं भवति आध्यात्मिकाद्युपद्रवस्य शरीरत्राणस्य च प्रारब्धाधीनत्वात्तु प्रय-
त्नस्यैवाप्यर्थं दर्शनात् अनेकोऽपि ब्राह्मणादिराश्रयणीयो भवतीत्यतो ब्रह्मविद्रूपस्य मुक्तस्य कश्चिदपि यत्किंचिदपि कर्म
न कर्तव्यमेव कृतं चेत्तत् ब्रह्मविदेवं न भवति तथा च स्मृतिः ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः नैवास्ति
किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित् इति १८ योगारूढोपलक्षितस्यैव मुक्तस्य पतेः एतावात्मस्य कर्म न कर्तव्यं किंतु गी०अ०
ऽऽरुरुक्षोर्मोक्षार्थिनः स्ववर्णकर्म कर्तव्यमेवेति बोधयितुमाह तस्मादसक्तः सततं कार्यं कर्म समाचर असक्तो ह्या- ५७
ऽऽचरन्कर्म परमाप्नोति पूरुषः १९ हि यस्मात्कारणात् मुमुक्षुः पुरुषः स्वधर्मासक्तः फलाभिसंधिरहितो भक्तो

स्तत एवोच्यते भगवता सर्वज्ञेन न तस्य कार्यं न विद्यत इति १७ ननु ब्रह्मेन्द्रादिभिन्नत्वस्य दंतत्वात्मानं प्रपन्नस्य तं न्नेन सर्वजन्यमेवतः
सर्वत्र सुखस्य कर्मसंपाद्यत्वान्नब्रह्मविदोपि सुखार्थित्वाच्च न स्य निरंतर सुखसिध्यै कर्मपत्किंचित्कर्तव्यमेवेत्याशंकायां
न आनंदो ब्रह्मेति विज्ञानमानंदं ब्रह्मेति श्रुत्या आनंदैकरूपत्वश्रवणान्निरंतर ब्रह्मनिष्ठया तद्भावापन्नस्य स्वानं
दस्वरूपेणैव तिष्ठतो स्य निरंतर ब्रह्मानंदरसानुभूतेरेव विच्छिन्नत्वात्क्रियाजन्य सुखस्यानित्यत्वात्तदनपेक्षित्वा
ब्रह्मविदः कर्मसाध्यो र्थस्तदभावे अनर्थो वा न कश्चिदस्तीत्याह नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन न चास्य सर्व
भूतेषु कश्चिदर्थव्यपाश्रयः १८ तस्याहमेवेदं सर्वमिति सर्वमात्मानमेवाद्वितीयं पश्यत आत्मारामस्यात्मानंद
स्य पतेः सिद्धस्य कृतेनानुष्ठितेन कर्मणा अस्मान्नैवार्थः कश्चिदपि नैवास्ति आत्मत्वेनाप्तत्वात् सर्वस्मिन्नप्यात्मदर्शित्वाच्च यो
गक्रियया मामप्याकाशगमनाद्यणिमादिसिद्धिर्नाप्यस्यते सर्वात्मभावापन्नत्वात्तपः क्रियया मामप्ये ब्रह्मेन्द्रादि
पदापेक्षा च न संभवति जीवन्मुक्तत्वाद्देहिकक्रियया मामप्युपचित्तशुद्धिद्वारकमोक्षापेक्षापि नास्य तत्वो ब्रह्मवित्त्वस्य
कर्मणामसाध्यजीव्योऽर्थः कश्चिदपि नास्त्येवेत्यर्थः न चैवतस्य कर्मणामप्रत्तौ प्रत्यवायोभावेऽपि विधुहत्वे घनदोषो वाप्यकेर
णाभेत्त्वापदोषो वास्याज्ञेनेत्तानहानिर्वा स्वरूपहानिर्वा प्रसज्येतेत्याशंकायामाह नाकृतेनेति उक्तलक्षणस्य ब्र
ह्मविदस्त्वकृतेन विहितानाचरणेनानर्थ उक्तः कश्चिदिह लोके न संभवति मायामात्रमिदं द्वैतमिति स्वात्मोपेन विधेरप्रावि
विदितानां विषयकत्वेन मिथ्यात्वाद्विदुषस्तद्दृष्ट्यं घनदोषाभावः उभे ह्येवैष एते आत्मानं स्पृणुते इति श्रवणात् कर्म
णोपि ब्रह्ममात्रत्वदर्शनेन स्वतः संगाभावात् कर्मापि दोषापनकत्वं ते निरंतर ब्रह्मनिष्ठयैव तिष्ठतो विदुषस्तेनेह

गी०टी० ३२ १०७

जं त्वमेवमहापुरुषप्रवृत्या खलु शास्त्रस्य प्रामाण्यं कर्मणः प्राशस्त्यमज्ञतराणां च यथार्थं ये र्णाचारं च योधिगच्छति यतो मुक्ते
नोप्यवश्यं महता कर्म कर्तव्यमित्याशयेनाह लोकसंग्रहमिति लोकः पामरजनस्तस्य संग्रहः सत्कर्ममार्गप्रदर्शनेन तारणमु
न्मार्गान्निवारणं वा तमिमं लोकसंग्रहमेवार्थं संपश्यन्नपि प्रमाणं कर्म लोकोपकाराय भवतीति पश्यन्नपि कर्म कर्तुं त्वम
र्हसीत्यर्थः २० मत्कर्तृकं कर्म कथं लोकस्योपकाराय भवतीति चेदुच्यते यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरु
ते लोकस्तदनुवर्तते २१ वेदशास्त्राध्ययनाध्यापनयोस्तदर्थज्ञानज्ञापनयोस्तदुक्तकर्मानुष्ठानानुष्ठापनयोश्च दक्षिणाः कु
लशीलादिमहत्त्वसंपन्नश्च यो हि द्विजश्रेष्ठः स यद्यच्छ्रौतं स्मार्तं वा अन्यद्वाचरति नियमेनानुतिष्ठति सुस्तुस्तुरितरः पामरो वित
तदेव कर्माचरति न तु स्वयमप्यन्यत्करोति शास्त्रं तत्तानतदुक्तकर्मपरित्यागाभावात् किंचोत्कुलसत्तमः श्रेष्ठः यत्तयच्छा
स्त्रं स्वयं प्रमाणं कुरुते इदमेवं प्रमाणमिति व्यवहरति लोकोऽन्यः जनस्तदेव तेन प्रमाणीकृतमेव शास्त्रमनुवर्तते न ते
देवशास्त्रं स्वयं प्रमाणं करोति श्रेष्ठानुसारी भवति पामर इत्यर्थः एतेन श्रेष्ठस्य कृतार्थस्यापि लोकहिताय कर्म कर्त
व्यमेवेति सिद्धं २१ ननु महात्मनः कृतार्थस्य कर्मणा साध्याभावात् कथं तस्य कर्मकरणं कुत्रापि न दृष्टमित्याशंकायां अस्मिन्न
र्थे त्वहमेव प्रमाणमित्याह श्रीभगवान् न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि
२२ हे पार्थ षड्गुणैश्वर्यसंपन्नस्यावाप्तसर्वकामस्य सर्वेश्वरस्य मे यत्किंचित्कार्यमात्मनश्चयं उद्दिश्य कर्तव्यं कर्म नास्ति
तत्कुतो अनवाप्तमप्राप्तं सत्तु मम क्रियया ऽवाप्तव्यं प्राप्तव्यं वस्तु किंचिदपि त्रिषु लोकेषु न विद्यते गृहे स्वामिनो गृहस्य द्रव्य
वत्कृत्स्नांडस्य सर्ववस्तु ब्रह्मांडस्वामिनो मे प्राप्तमेव भवति ननु प्राप्तव्यं किंचिदस्ति स्वं महाभाग्यं वैराग्यं ज्ञानसमष्टेष्प्यहं लो

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिंगना

३ पम० ५८

वैदिकं कर्माचरन्सम्यगनुतिष्ठन्नेव परं परमपुरुषार्थं मोक्षमाप्नोति पूरुषः । अयमात्मरतिरस्मिन्नुक्तनिजन्मांतरे वा वै
दिकं कर्म कृत्वैव चित्तशुद्धिमाप्य तेनैव मुक्तिं प्राप्तवानन्यस्तु योऽपि कर्मण्यनिष्टः कर्म कृत्वैव ज्ञानं माप्य मुक्तो भवति नैवा
न्येयात्तस्मात्त्वमपि मुमुक्षुरसक्तो निष्कामः सन्सततं कार्यं कर्तव्यं वेदविहितं नित्यनैमित्तिकं च कर्म समाचर अनुष्ठानं कुरु भामो
वैराग्यं राजा बुद्ध्या संयम्य कुरु कर्मणैव चित्तशुद्धिमाप्य ज्ञानं च मोक्षं च प्राप्स्यसीत्यर्थः १९ धर्मेण पापमपनुदतीति
ज्ञानेन मुक्त्युत्पत्तेः संसेयात्सापरस्य कर्मणा इति ज्ञानादेव तु केवलस्मिन्सादिश्रुतिस्मृतिविरोधो मां नुष्ठानादेव पापक्षयः पा
पक्षयादेव ज्ञानं ज्ञानादेव मोक्ष इति भगवत्पादैर्नत्वो मुमुक्षोरज्ञानान्ननन्तस्माच्छ्रेयः कर्मैव कर्तव्यमित्यत्र पदिश्यासि त्वं शे
हृदाचारं सम्यगाणपति श्रीभगवान् कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २० ज
नकादयः जनको वैदेह आदिर्येषां ते जनकादयो ऽश्वपतिभगीरथादयः क्षत्रियाः कर्मणैव श्रौतस्मार्तकर्मानुष्ठानेनैव
चित्तशुद्धिमाप्य ज्ञानेन संसिद्धिमास्थिता मुक्तिं प्राप्य कृतार्था जाताः इत्यतस्त्वमपि कर्मैव कृत्वा तद्द्वारा चित्तशुद्ध्या ज्ञानं मा
प्य मुक्तो भव त्वा सुखेन तिष्ठेत्यर्थः यद्वा जनकादयो ज्ञानयोगनिष्ठा निरुक्तयापि संसिद्धिं मुक्तिं प्राप्यापि लोकहितार्थं क
र्मणैव सह स्थिताः स्वयं कृतार्था अपि प्रारब्धकर्मक्षयार्थं कर्म कुर्वत एव स्थिता इत्यर्थः आरुरुक्षावामेवैवं संसिद्धि मुक्तानां
त्मसेनास रुरुक्षुणा त्वया मोक्षार्थं कर्मैव कर्तव्यमिति एवं मुमुक्षोराज्ञानात्त्वस्याद्ररुरु सोमां क्षार्थमप्रवृत्तं कर्म कर्तव्यमेवेति
निरूप्येदानीं मुक्तेनाप्याधिकारिके णालोकहितार्थं कर्म कर्तव्यमेवेति बोधयितुं न वदत्यं नन्वेन जनकादीनां ज्ञानं ज्ञा
नोत्पत्तिमुदाहृत्य तत्वायोग्यतेऽधिकारोऽपह्यते निष्ठानुष्ठापि जनकादिवत्त्वया लोकहितार्थमपि कर्म एवं

त्रैक एव स्यात् एवं सांकर्यसंपादनेनाऽहं सर्वाः प्रजा उपहन्यां सर्वासां प्रजानामुपहतिकर्ता च स्यां उपहतिर्दुर्गतिप्राप्तिः सहृति
हेतोः सत्कर्मानुष्ठानस्याभावात्सर्वैर्नरकभाजो भवेयुरित्यर्थः यत एवातः न यथेष्टं परापजितनः कृतेह्यन्नस्यापि ममतत्त्व
वित्त्वोप्यात्मविदोऽस्य स्य च लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धं २४ न हि लोकहितार्थं कर्मणि प्रवृत्तेन विदुषा कर्तव्यं कर्म कर्तव्य
मित्याकांक्षायामाह सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ अवि
द्वांसो अनात्मज्ञाः कर्मणि कर्मजन्ये फले स्वर्गपुत्रधनादौ सक्ता आसक्तिमंतो भूत्वा नियमेन श्रद्धाभक्तिभ्यां यथाविहितं
कर्म कुर्वंति तथैव वर्तमानः सन् लोकसंग्रहं चिकीर्षुर्विद्वानात्मविदाधिकारिकः स्वयमसक्तः कर्तृत्वाभिनिवेशरहि
तः फलापेक्षारहितोपि भूत्वा कर्म कुर्यादेवं कुर्वन् स्वयं तीर्णः परानपि तारयतीति भावः कर्तृत्वाभिनिवेशरहित
त्वं फलानपेक्षितत्वं साकल्यवैकल्ययोर्हर्षविषादराहित्यं च तत्त्वज्ञस्यापि वैलक्षण्यं नियमेन कर्मकरणं तत्र अयथार्थ
समस्मेव किंच न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् २६ विद्वानात्म
तत्त्ववित्स्वयं युक्तः आत्मनो देहादितादात्म्याभावदर्शनयोगनिष्ठो भूत्वा समाचरन् कालोचितं कर्म कुर्वन् कर्मसंगिनां
कर्मासक्तानां फलापेक्षया नियमेन कर्म कुर्वतामित्यर्थः एतद्देहेंद्रियादिभिरेव क्रियमाणे एव कर्मणि अहं कर्ता भोक्ते
त्यभिमानः संगः स एषां तेषां कर्मसंगिनामतत्त्वविदां मूढानां स्वयं येतितत्त्वाभिमानेन बुद्धिभेदं ज्योतिष्टोमेन स्व
र्गकामः यजेतेति वचनाज्ज्योतिष्टोमं कृत्वा स्वर्गफलं भोक्ष्य इत्यादिफलविषया या कामना बुद्धिस्तस्याः भेदं चालनं न जनये

कसंग्रहात्मके कर्मणि वर्त एव हि चकारो ह्यर्थः मम लौकिके वैदिके च कर्मणि प्रवर्तनं भवतां मम स्वस्य सिद्धमिति हिः म
सिद्धिबोधनार्थः २२ ननु सर्वेश्वरस्य भगवतो लोकसंग्रहोपि न कर्तव्य अनपेक्षाभावादित्याशंक्याह अश्रेष्ठः श्रेष्ठानुसारी
तिन्यायेन सर्वतः पक्षस्य इति सर्वे मदनुसारिणो भवंति अप्यकर्मणि सति सर्वे प्यकर्मणो भवेयुरतो न लोकसंग्रहः स्यादि
यथेत अतः कर्म मम कर्तव्यमेवेत्याशयेनाह द्वाभ्यां यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः मम वर्त्मानुवर्तंते
मनुष्याः पार्थ सर्वशः २३ अहं हे कौन्तेय यदि जातु कदाचिदपि मम सावधानतया वा अहमतन्द्रितः संवर्तते न स
योगादावसम्पन्नो भूत्वा जातु कदाचिदपि कर्मणि विहिते न वर्तेयं यदि विहितकर्मकर्ता न स्यां चेन्नाम क
र्माणं हे पार्थ सर्वे मनुष्या अप्यकर्मणो भवेयुः हि यस्मान्मत्कारणान्मनुष्याः सर्वे भगवानपि प्रवर्तत इति मयि सर्व
तेन्वेषु धर्मा मम वर्त्म मदीयमेव मार्गमनुवर्तंते अश्रेष्ठस्य श्रेष्ठानुसारित्वस्वभावत्वात् मयाकर्मणि सति तेपि सर्व
पि कर्म त्यजेयुरित्यर्थः २३ ननु तैरपि कर्म त्यज्यतां ततः कोनर्थ इत्यत आह उत्सीदेयुरिमे लोका न कुर्यां कर्म चे
दहं संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः २४ सर्वैः कर्मणि परित्यक्ते अत्र उत्सीदेयुरिति भूतानीत्यर्थः त्याह विभी
गोद्यभावादेवाः प्रक्षीणा भवेयुः देवाद्यभावान्मनुष्यादीनामनुत्पत्तिः तत्र नाचविनाशः स्यादेतावानेवानर्थो न भवति कि
न्तु वर्णसंकरोपि च स्यादित्याह संकरस्येति कृतनष्टस्य त्वाभिमानेनाहं लोकस्थितिकारणं वैदिकं कर्म साजपिता संक
रस्य च कर्ता स्यां तदाहं ज्ञानिभेदव्यवस्थापक कर्माभावे सर्वे धर्मे क्षे आपन्नो वर्णाः संकीर्णे स्युस्तेनापि वर्णसंकरो भव

त्मनः क्रियाआत्मनस्तु कूटस्थासंगचिद्रूपेणावस्थानमात्रं एवं गुणविभागः कर्मविभागश्च तयोऽर्णः कर्मविभागयोस्तत्त्वं न स्वतत्त्वे
गी०टी० यथात्स्वयं सम्यग्वेत्तीति तत्त्ववित् हि हे महाबाहो विद्वानित्यर्थः सर्वकर्मसु गुणाश्चक्षुरादय एव गुणेषु रूपादिषु वर्तन्ते वाताद
१४ यस्त्वदस्य नाहं प्रवर्तने उद्धिरेव तेषां कर्म स्वहं कर्ता हे करोति अहं तु न भोक्ता मिनयथा मिनवदामिनकरोमि नेगच्छामि किं तु
कूटस्थासंगचिदात्मा सर्वदा नष्टो मे वा समिति मत्वा निश्चित्य तेषां कर्मसु न सज्जते नाहं ममेति मत्यं न करोतीत्यर्थः
२८ एवं देहेन्द्रियादिभिः क्रियमाणेषु कर्मसु स्वस्याकर्तृत्व हृष्टा विद्वान् स्वविलक्षणान् ज्ञात्वा कर्मिणः अमादेनापि न
विचालयेदित्युक्तं किं मे वा यथेहष्टपति प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचा
लयेत् २९ कर्मिणां विद्वद्वैलक्षण्यं दर्शयति प्रकृतेर्गुणसंमूढा इति प्रकृतेः सत्त्वलक्षणाया गुणैः ऽकार्यैर्देहेन्द्रिया
दिषु हं भ्रमसंमूढाः सदात्मेनात्मा यत्नाः पामराः स्वयं गुणकर्मसु गुणैः श्रवणादिभिर्वागादिभिः क्रियमाणेषु क
र्मसु श्रवणादर्शनवचनादानभोजनादिषु अहमेव श्रोता द्रष्टा वक्ता दाता कर्ता भोक्तेति सज्जन्तेऽभिनिवेशं कुर्वन्ति एतान्
कर्मिणोऽकृत्स्नविदोऽब्रह्मविदो ज्ञानेऽकृत्स्नवित् सर्वोत्तमलक्षणो ब्रह्मवित् न विचालयेत् कामनया कर्मफलमस्तीति वा कर्त्तो
दिमिथ्येति वा त्वं ब्रह्मैवातत्त्वेन किं चित्कर्ता न असीति वा नावेदयेत् कर्मस्तु त्वा कर्मसु सर्वे प्रवर्तन्ते इत्यर्थः २९ एवं ज्ञानिना ३५
मुमुक्षुणाधिकारिणां लोकसंग्रहार्थमवश्यं कर्मकर्तव्यमिति लोकसंग्रहकारिणोऽस्येवं वर्जितमपि तच्चोपदिश्य अधुना लोक
संग्रहहृष्ट्यापि स्वधर्मं कुर्वित्याह मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगत १५०
ज्वरः ३० लोकसंग्रहकर्तात्मनत्वं तत्त्वमध्यात्मचेतसा सर्वपदयमात्मेति ऽकृत्स्नकरीत्यात्मानमविहितस्य पश्यन् यन्मध्या १४
त्मचेतो ज्ञानं अध्यात्मचेतनेनैवमस्तेनाध्यात्मचेतसा ब्रह्मार्पणं ब्रह्म हविरिति वक्ष्यमाणलक्षणयाप्रज्ञया सर्वं ब्रह्मे ६०

त्, न कर्माणि कामनया कर्तव्यानीति वा स्वर्गादिफलमस्तीति वा कर्त्रादि सर्वं मिथ्येति वा तेषां बुद्धेर्वैकल्यं न संपादयेत्
किंतु अक्षय्यं ह वै चातुर्मास्ययाजिन इति पश्यति पुत्रं पश्यति पौत्रमिति तस्माद्युक्तः स्वयं परमं वदन्तो सादिना च सर्वाणि
कर्माणि वैदिकानि जोषयेत् प्रीत्या सेवयेत् कर्मफलमनुसाक कर्माणि कर्तुमिच्छामेव संपादयेदित्यर्थः २६ मूढानामेव कर्मानुष्ठे
तानामिति सूचयितुमज्ञानां कर्मसंगिनामित्युक्तं कर्मसंगिनामितिपदं तदेव विस्पष्टयति प्रकृतेः क्रियमाणानि गुणैः क
र्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते २७ प्रकृतिर्माया सत्त्वादिगुणमयी आकाशादिमहाभूतरूपेण
परिणतास्तस्याः प्रकृतेः गुणैः कार्यभूतैर्देहेंद्रियादयस्तैरेव कृतचित्सर्वात्मना क्रियमाणानि सर्वाणि कर्माणि प्रति अ
विद्वानहंकारविमूढात्मा स्वाविद्यया देहेंद्रियादावनात्मन्यहमिति बुद्धिरहंकारस्तेन विमूढो विपरीतग्रहणान्तःकरण आ
त्मा मनो यस्य सोऽहंकारविमूढात्मा यद्वा विमूढः स्वयं नानेन भिन्नाणि च देहेंद्रियादिष्वहंकरणेन विमोहितः द्रष्टा
हं स्प्रष्टाहं श्रोताहं घ्राताहं रसयिताहं मन्ताहं बोद्धाहं कर्ताहमिति तदुपाधिसंबंधसंभावितविपरीतदृष्टीनां विषयतां गमित
आत्मा मनःस्वरूपं येन सोऽहंकारविमूढात्मा यद्वा देहेंद्रियादिष्वहंकरणेन विमोहितोऽहंप्रत्ययार्थत्वेनाभिहि
त आत्मा येन सोऽहंकारविमूढात्मा कर्ताहमिति मन्यते दृष्टादृष्टमारब्धवता देहेंद्रियैः कृतेषु दृष्टादृष्टेष्वपि कर्मसु
कर्तारमेवात्मानं मन्यमानो यथापयसि कृतं पुरा यत्कृतमिति तत्र क्रियायाः कर्तारमेव पश्यतीत्यर्थः २७ विद्वांस्तु पुनरित्युक्ते
कर्मात्मनो देहेंद्रियतत्कर्मसंबंधाभावदर्शनं विदुषः तदनेन प्रतिपाद्यते तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते २८ गुणकर्मविभागयोः गुणाश्चक्षुरादयो योगादयो बुद्धिमनश्चक्षुरादयेषु
श्रोत्रादीनामेव दर्शनश्रवणादि क्रियाव्यापारादीनामेव वचनादानादि क्रियाभेदैरेवाहंकारक्रियामनसेवत्वम्

गी०टी०
९५

श्रद्धावंतोऽनसूयंतोऽसूयानामगुणेषु दूषणारोपणं तदपि तामकुर्वंतः किंतु श्रद्धावंतस्तत्र श्रद्धां भक्तिं च कुर्वंतः संतोऽनु
तिष्ठंति मतमनुवर्तंते ये ते सर्वे मनुष्यास्तेऽपि नित्यकर्म कुर्वंतीत्यर्थः ते सत्त्वशुद्धिज्ञानविज्ञानप्राप्त्या कर्मभिः पु
ण्यापुण्यफलरूपैर्बंधनाद्दुःखहेतुभिः संचितादिभिर्मुच्यंते अपिशब्दाज्ज्ञानादिभिश्च मुक्ता भवंतीत्यर्थः ३१ विपर्यये
दोषमाह ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ३२ ये त्ववि विवेकिनो ब्राह्म
णादयो देहाहंकारेण तदुक्तं मम मतं अभ्यसूयंतः त्यजंते दूषयंतः संतो नानुतिष्ठंति निंदाग्रहेण मदाज्ञां न
कुर्वंते सर्वज्ञानविमूढांस्तान् सर्वात्मकत्वाद्बहुलसर्वविषयकं ज्ञानं सर्वज्ञानं तेन निर्विषये विविधविषये विमूढा
स्तान्सर्वज्ञानविमूढांस्तान् अचेतसो विवेकरहितानविवेकिनः कर्मबहुसाधनसाध्यं ज्ञानोपायं पित्रादिदृष्टं फलं वाच्य तत्स्वर्गा
श्रेयः परमसुखमित्येवं विपरीतबुद्धयस्तान्संन्यासानर्हान्कर्मनिष्ठान्नष्टान्विनष्टानेव लोकाच्च विद्धि स
र्वधर्मपरित्यज्य परधर्मे वर्तमानान् स्वयमेव विनश्यंतीत्यर्थः ३२ ममैतन्मतं नादृत्य कर्तव्यं कर्म त्यजंति स्वस्याः प्रकृतेर्व
शीभूता मामवहेलयंति ये तु मन्यंते ते ये प्रकृत्यधीना नाम चैतत्तिष्ठंति स्वभावतं न घटते ज्ञानिनां प्रयत्नेपायाः प्रकृते
र्ममाया या योनिग्रहस्यानिष्टकरत्वादिति कार्यं तेऽप्यवशाः कर्मेति वचनात् स्वयमेव द्वंद्वे ह्युत्पन्ने मतानां कर्मत्यागानि
ष्पन्नार्थं सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३३ नित्यनिरंतरब्र
ह्मनिष्ठानिर्मलितसर्ववासना ग्रंथिरपि ब्रह्मवित्पारगत्वाद्धेतुना पाऽवशिष्टा याः स्वस्याः प्रकृतेर्वासनायाः स
दृशमनुरूपमेवाहारादौ चेष्टते तां निग्रहितुं न शक्नोति शरीरस्थितिहेतोः प्रकृतेर्दुर्निवारत्वादेव ब्रह्मनिष्ठया प्रकृ

रा०
९१

वेति इत्यनेन कर्माणि नित्यनैमित्तिकादीनि सर्वाणि मयि सर्वात्मनि ब्रह्मणि संन्यस्य सर्वं ब्रह्मैवेति प्रविलाप्य ज्ञपेन
मात्मे राज्ये पुत्रकृपाफले निराशो निर्ममो स्वः सर्व बध्यमानेषु भ्रात्रादिषु निर्ममो ममतारहितो भूत्वा एते मदीया मम पाह्न्यंत
इति योज्वरः संतापः स विगतो यस्य स विगतज्वरो निःशोको भूत्वा युध्यस्व लोकसंग्रहार्थं कर्म कुर्वित्यर्थः अत्रायमभि
प्रायः सर्वमिदमहं च ब्रह्मैवेति परावरैकत्वविषयकात्मतिबुद्ध्याऽपरोक्षज्ञानेनाविकारिको ब्रह्मविदन्तोक्त एवास्माल्लो
कहितार्थं कर्म कुर्वाज्जीवन्नेव मुक्तत्वादस्य परतारणामेव प्रयोजनं परोक्षज्ञानी चेदात्मा देहादिभिन्नस्त दुःखत्वा
द्घटदृष्टवदिति स्वस्य देहादिभिन्नत्वज्ञानेन योक्ते नाहं कर्ता कारयिता नत्मा कर्तृत्वबुद्ध्या मायामात्रमिदं द्वैतमि
त्यादिश्रुतिबलेन इदं सर्वं मिथ्या मायाकार्यत्वादैन्द्रजालिकवदित्यादियुक्तिबलेन च कर्माकार्यकरणं च सर्वं मिथ्यैवे
तिकर्तृत्वादेः सर्वस्य मिथ्यात्वमेव पश्यन् सर्वत्र निराशो निर्ममो भूत्वा लोकहितार्थं कर्म कुर्यात्तेन चित्तपरिपाको ज्ञानं
मोक्षश्च सिध्यति लोकोपकारश्चास्य तरेणां तारणां चोभयमप्युपपद्यते अनात्मज्ञश्चेन्मयि ग्रहे ममतारहितः कर्मफ
लानपेक्षश्च भूत्वा श्रौतानि स्मार्तानि च सर्वाणि कर्माणि गोश्वरार्पणबुध्या स्वाधर्मेव कुर्यात्तेन चित्तशुद्धिस्तया ज्ञाने
मोक्षश्चास्य सिध्यतीति ३० न कर्मणामनारंभादित्यारभ्य मयि सर्वाणि कर्माणीत्यंतेन ग्रंथेन मुमुक्षोरवश्यं
मोक्षार्थमीश्वरार्पणबुद्ध्या कर्म कर्तव्यमिदं मम मतमिति निश्चित्य श्रीभगवानेतन्मतानुसारिणां यत्नेमुक्तिं भ
विष्यति यत्ने तु विपरीतकारिणां तेविनंक्ष्यतीति निपमयति ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोऽन
